972

भगवद्गीता with भाष्य by शंकराचार्य

॥अथ शांकरभाष्यगीताप्रारंभः॥५३७५

श्रीगणेशाय नमः॥ ॥ओं नमो भगवते वासुदेवाय नमः॥ ॥नारायणः परोऽव्यक्तादंडमव्यक्तसंभवं॥ अंडस्यांतस्त्विमे लो
काः सप्तद्वीपा च मेदिनी॥१॥ स भगवान् सृष्ट्वेदं जगत्तस्य च स्थितिं चिकीर्षुर्मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्रा
हयामास वेदोक्तं ततोऽन्यांश्च सनकसनंदनादीनुत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास द्विविधो हि वेदोक्तो धर्मः
प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च जगतः स्थितिकारणं प्राणिनां साक्षादभ्युदयनिःश्रेयसहेतुर्यः स धर्मो ब्राह्मणाद्यैर्वर्णिभिरा
श्रमिभिश्च श्रेयोऽर्थिभिरनुष्ठीयमानो दीर्घेण कालेनानुष्ठातॄणां कामोद्भवाद्धीयमानविवेकविज्ञानहेतुकेनाधर्मेणाभिभूयमा
ने धर्मे प्रवर्धमाने चाधर्मे जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता नारायणाख्यो विष्णुर्भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणा
र्थं देवक्यां वसुदेवादंशेन कृष्णः किल संबभूव ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद्वैदिको धर्मः तदधीनत्वाद्वर्णाश्रमभेदानां स च भ
गवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्नः त्रिगुणात्मिकां वैष्णवीं स्वां मायां प्रकृतिं वशीकृत्याजोऽव्ययो भूतानामी
श्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन् लक्ष्यते स्वप्रयोजनाभावेऽपि भूतानु
जिघृक्षया वैदिकं हि धर्मद्वयमर्जुनाय शोकमोहमहोदधौ निमग्नायोपदिदेश गुणाधिकैर्हि गृहीतोऽनुष्ठीयमानः स धर्मः प्रच
यं गमिष्यतीति तं धर्मं भगवतोपदिष्टं भगवान् वेदव्यासः सर्वज्ञो गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबंध तदिदं गीताशास्त्रं
समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थं तदर्थाविष्करणायानेकैर्विवृतपदपदार्थवाक्यार्थन्यायमप्यत्यंतविरुद्धानेकार्थ
त्वेन लौकिकैर्गृह्यमाणमुपलभ्याहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विवरणं करिष्यामि तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयो
जनं परं निःश्रेयसं सहेतुकस्य संसारस्यात्यंतोपरमलक्षणं तच्च सर्वकर्मसन्यासपूर्वकादात्मज्ञाननिष्ठारूपाद्धर्माद्भव
ति तथेममेव गीतार्थं धर्ममुद्दिश्य भगवतैवोक्तं स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने इत्यनुगीतासु तत्रैव चोक्तं॥ नैव धर्मी न चा
धर्मी न चैव हि शुभाशुभी॥ यः स्यादेकासने लीनस्तूष्णीं किंचिदचिंतयन्॥ ज्ञानं सन्यासलक्षणमिति च इहापि चांते उक्तम
र्जुनाय सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेति॥ अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णानाश्रमांश्चोद्दिश्य विहितः
स देवादिस्थानप्राप्तिहेतुरपि सन्नीश्वरार्पणबुध्यानुष्ठीयमानः सत्वशुद्धये भवति फलाभिसंधिवर्जितः शुद्धसत्वस्य च ज्ञान
निष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते॥ तथा च वक्ष्यति ब्रह्मण्याधाय कर्माणि यो
गिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धय इति॥ इमं द्विप्रकारं धर्मं निःश्रेयसप्रयोजनं परमार्थतत्त्वं वासुदेवाख्यं च परं ब्रह्माभिधेय

हरंबु
१

भूतं विशेषतोऽभिव्यंजयद्विशिष्टप्रयोजनसंबंधाभिधेयवद्गीताशास्त्रं यतस्तदर्थे विज्ञाते समस्तपुरुषार्थसिद्धिरतस्तद्वि
वरणे यत्नः क्रियते मया॥ अत्र च दृष्ट्वा तु पांडवानीकमित्यारभ्य यावन्न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव हेत्येतदंतः॥ प्राणि
नां शोकमोहादिसंसारबीजदोषोद्भवकारणहेतुप्रदर्शनार्थत्वेन व्याख्येयो ग्रंथस्तथा ह्यर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्व
जनसंबंधिबांधवेष्वहमेषां ममैत इत्येवं प्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तावात्मनः शोकमोहौ प्रदर्शितौ॥ कथं भीष्ममहं
संख्य इत्यादिना शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः स्वत एव क्षत्रधर्मे युद्धे प्रवृत्तोऽपि तस्माद्युद्धादुपरराम परधर्मं च भि
क्षाजीवनादिकं कर्तुं प्रववृते तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्टचेतसां स्वभावत एव स्वधर्मपरित्यागः प्रतिषिद्धसेवा
च स्यात् स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मनःकायादीनां प्रवृत्तिः फलाभिसंधिपूर्विकैव साहंकारा च भवति तत्रैवं सति धर्माधर्मोप
चयादिष्टानिष्टजन्ममरणसुखदुःखसंप्राप्तिलक्षणः संसारोऽनुपरतो भवतीत्यतः संसारबीजभूतौ शोकमोहौ तयोश्च सर्वक
र्मसन्यासपूर्वकादात्मज्ञानान्नान्यतो निवृत्तिरिति तदुपदिदिक्षुः सर्वलोकानुग्रहार्थमर्जुनं निमित्तीकृत्याह॥ भगवान् वासु
देवोऽशोच्यानित्यादि अत्र केचिदाहुः सर्वकर्मसन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेव केवलात्कैवल्यं न प्राप्यत एव किं तर्ह्यग्नि
होत्रादिश्रौतस्मार्तकर्मसहिताज्ज्ञानात्कैवल्यप्राप्तिरिति सर्वासु गीतासु निश्चितोऽर्थ इति॥ ज्ञापकं चाहुरस्यार्थस्याथ चेत्त्वमि
मं धर्म्यं संग्रामं न करिष्यसि॥ कर्मण्येवाधिकारस्ते॥ कुरु कर्मैव तस्मात्त्वमित्यादि हिंसादियुक्तत्वाद्वैदिकं कर्माधर्मायेतीयमप्या
शंका न कार्या॥ कथं क्षात्रं कर्म युद्धलक्षणं गुरुभ्रातृपुत्रादिहिंसालक्षणमत्यंतक्रूरमपि स्वधर्म इति कृत्वा नाधर्माय तदकर
णे च ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसीति ब्रुवता यावज्जीवादिश्रुतिचोदितानामश्वमेधादिकानां पश्वादिहिंसालक्षणा
नां च कर्मणां प्रागेव नाधर्मत्वमिति सुनिश्चितमुक्तं भवतीति॥ तदसत्॥ ज्ञानकर्मनिष्ठयोर्विभागवचनाद्बुद्धिद्वयाश्रययोरशो
च्यानित्यादिना ग्रंथेन भगवता यावत्स्वधर्ममपि चावेक्ष्येत्येतदंतेन ग्रंथेन यत्परमार्थात्मतत्त्वनिरूपणं कृतं तत्सांख्यं तद्विषया बु
द्धिः॥ आत्मनो जन्मादिषड्विक्रियाभावात्॥ अकर्तात्मेति प्रकरणार्थनिरूपणाद्या जायते सा सांख्यबुद्धिः सा येषामुचिता भ
वति ते सांख्याः॥ एतस्या बुद्धेर्जन्मनः प्रागात्मनो देहादिव्यतिरिक्तत्वकर्तृभोक्तृत्वापेक्षो धर्माधर्मविवेकपूर्वको मोक्षसाधनानु
ष्ठाननिरूपणलक्षणो योगः॥ तद्विषया बुद्धिर्योगबुद्धिः सा येषां कर्मिणामुचिता भवति ते योगिनस्तथा च भगवता विभक्ते द्वे बुद्धी नि

3A
1963

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

गीताभाष्य

२

दिहेतु॥ एषा तेभिहिता सांख्ये बुध्धिर्योगे त्विमां शृण्विति॥ तयोश्च सांख्यबुध्याश्रयां ज्ञानयोगेन निष्ठां सांख्यानां विभक्तां वक्ष्य
ति पुरा वेदात्मना मया प्रोक्तेति तथा च योगबुध्याश्रयां कर्मयोगेन निष्ठां विभक्तां वक्ष्यति कर्मयोगेन योगिनामिति एवं सांख्यबुध्धिं योगबुध्धिं चाश्रि
त्य द्वे निष्ठे विभक्ते भगवता प्रोक्ते ज्ञानकर्मणोः॥ कर्तृत्वाकर्तृत्वानेकत्वैकत्वबुध्याश्रययोरेकपुरुषाश्रयत्वासंभवं पश्यता यथैतद्विभाग
वचनं तथैव दर्शितं शतपथब्राह्मणे एतमेव प्रव्राजिनो लोकमिच्छंतो ब्राह्मणाः प्रव्रजंतीति सर्वकर्मसंन्यासं विधाय तच्छेषेण किं प्रजया
करिष्यामो येषां नोयमात्मायं लोक इति तत्रैव च प्राग्दारपरिग्रहात् पुरुष आत्मा प्राकृतो धर्मजिज्ञासोत्तरकालं लोकत्रयसाधनं
पुत्रं द्विप्रकारं च वित्तं मानुषं दैवं च तत्र मानुषं कर्मरूपं पितृलोकप्राप्तिसाधनं विद्यां च दैवं वित्तं देवलोकप्राप्तिसाधनं सोकामयत इत्यवि
द्याकामवत एव कर्माणि श्रौतादीनि दर्शितानि तेभ्यो व्युत्थानमात्मानमेव लोकमिच्छतोकामस्य विहितं तदेतद्विभागवचनमनुपपन्नं
स्यादित्यतो ज्ञानकर्मणोः समुच्चयोभिप्रेतः स्यात्॥ न चार्जुनस्य प्रश्न उपपन्नो ज्यायसी चेत्कर्मण इत्यादिरेकपुरुषानुष्ठेयत्वासंभ
वं बुध्धिकर्मणोर्भगवता पूर्वमनुक्तं कथमर्जुनेनाश्रुतं बुध्धेश्च कर्मणो ज्यायस्त्वं भगवत्यध्यारोपयेन्मृषैव ज्यायसी चेत्कर्मणस्ते मता
बुध्धिरिति किंच यदि बुध्धिकर्मणोः सर्वेषां समुच्चय उक्तः स्यादर्जुनस्यापि स उक्त एवेति यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितमि
ति॥ कथमुभयोरुपदेशे सत्यन्यतरविषय एव प्रश्नः स्यात्॥ नहि पित्तप्रशमनार्थिनो वैद्येन मधुरं शीतलं च भोक्तव्यमित्युपदिष्टे तयो
रन्यतरत्पित्तप्रशमकारणं ब्रूहीति प्रश्नः॥ संभवत्यथार्जुनस्य भगवदुक्तार्थविवेकानवधारणनिमित्तः प्रश्नः कल्प्यते तथापि भ
गवता प्रश्नानुरूपं प्रतिवचनं देयं मया बुध्धिकर्मणोः समुच्चय उक्तः किमर्थमित्थं त्वं भ्रांतोसीति न तु पुनः प्रतिवचनमननुरूपं पृष्टा
दन्यदेव द्वे निष्ठे मया पुरा प्रोक्ते इति वक्तुं युक्तं नापि स्मार्तेनैव कर्मणा बुध्धेः समुच्चयेभिप्रेते विभागवचनादि सर्वमनुपपन्नं
स्यात्॥ किंच क्षत्रियस्य युध्धं स्मार्तं स्वधर्म इति जानतः तत्किं कर्मणि घोरे मां नियोजयसीत्युपालंभोनुपपन्नः तस्माद्गीताशा
स्त्र ईषन्मात्रेणापि श्रौतेन स्मार्तेन वा कर्मणात्मज्ञानस्य समुच्चयः केनचिदपि दर्शयितुं शक्यो यस्य त्वज्ञानाद्रागादिदोषतो क
र्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा विशुध्धसत्त्वस्य ज्ञानमुत्पन्नं परमार्थतत्त्वविषयमेकमेवेदं सर्वं ब्रह्माकर्तृ चेति तस्य कर्म हेरंबु
णि कर्मप्रयोजने च निवृत्तेपि लोकसंग्रहार्थं यत्नपूर्वं यथा प्रवृत्तिस्तथैव प्रवृत्तस्य कर्मणि यत्प्रवृत्तिरूपं दृश्यते न तत्कर्म येन बु
ध्धेः समुच्चयः स्यात्॥ यथा भगवतो वासुदेवस्य क्षत्रधर्मचेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थसिध्धये तत्फलाभिसंध्यहं २
काराभावस्य तुल्यत्वाद्विदुषस्तत्त्वविन्नाहं करोमीति मन्यते नच तत्फलमभिसंधत्ते॥ यथा च स्वर्गादिकामार्थिनोग्निहो

5/1943

त्रादिकाम्यसाधनानुष्ठानायाहिताग्नेः काम्य एवाग्निहोत्रादौ प्रवृत्तस्य सामिकृते विनष्टेपि कामे तदेवाग्निहोत्राद्यनुतिष्ठतो
पि न तत्काम्यमग्निहोत्रादि भवति तथा दर्शयति च भगवान् कुर्वन्नपि न करोति न लिप्यत इति तत्र तत्र यच्च पूर्वैः पूर्वतरं कृतं कर्म
कर्मणैव हि संसिध्धिमास्थिता जनकादय इति तत्तु विभज्य विज्ञेयं तत्कथं॥ यदि तावत्पूर्वे जनकादयस्तत्त्वविदोपि प्रवृत्तकर्माणः
स्युस्ते लोकसंग्रहार्थं गुणा गुणेषु वर्तंत इति ज्ञानेनैव संसिध्धिमास्थिताः कर्मसंन्यासे प्राप्तेपि कर्मणा सहैव संसिध्धिमास्थिता न कर्म
संन्यासं कृतवंत इत्यर्थः॥ अथ न ते तत्त्वविदः ईश्वरसमर्पितेन कर्मणा साधनभूतेन संसिध्धिं ज्ञानोत्पत्तिलक्षणां वा संसिध्धिमास्थि
ता जनकादय इति व्याख्येयं॥ एतमेवार्थं वक्ष्यति भगवान् सत्त्वशुध्धये कर्म कुर्वंति स्वकर्मणा तमभ्यर्च्य सिध्धिं विंदति मानव इ
त्युक्त्वा सिध्धिं प्राप्तस्य ज्ञाननिष्ठां वक्ष्यति सिध्धिं प्राप्तो यथा ब्रह्मेत्यादिना तस्माद्गीतासु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिर्न कर्म
समुच्चितादिति निश्चितोर्थः यथा चायमर्थस्तथा प्रकरणशो विभज्य तत्र तत्र प्रदर्शयिष्यामः॥ तत्र धर्मसंमूढचेतसो महति शो
कसागरे निमग्नस्यार्जुनस्यान्यत्रात्मज्ञानादुध्धरणमपश्यन् भगवान् वासुदेवस्ततोर्जुनमुद्दिधारयिषुरात्मज्ञानायावतारय

श्रीभगवानुवाच॥ अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे॥ गतासूनगतासूंश्च नानुशोचंति पंडिताः॥ ११॥
नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः॥ न चैव न भविष्यामः सर्वे वयमतः परं॥ १२ ॥ ॥

न्नाह॥ ७ ॥ ॐ नमो भगवते वासुदेवाय नमः॥ अशोच्यानित्यादिना शोच्या अशोच्या भीष्मद्रोणादयः सद्वृत्तत्वात् पर
मार्थरूपेण नित्यत्वात् तानशोच्यानन्वशोचो नु शोचितवानसि एते म्रियंते मन्निमित्तमहं तैर्विनाभूतः किं करिष्यामि राज्यसु
खादिनेति त्वं प्रज्ञावतां बुध्धिमतां वादांश्च वचनानि च भाषसे तदेतन्मौढ्यं पांडित्यं च विरुद्धमात्मनि दर्शयसि उन्मत्त इवेत्यभि
प्रायः यस्मात् गतासून् गतप्राणान् मृतान् अगतासून् अगतप्राणान् जीवतश्च नानुशोचंति पंडिताः॥ आत्मज्ञाः पंडा आत्मविषया बुध्धिर्ये
षां ते हि पंडिताः पांडित्यं निर्विद्येति श्रुतेः॥ परमार्थतस्तु नित्यानशोच्याननुशोचस्यतो मूढोसीत्येतत्॥ ११॥ कुतस्ते शोच्या यतः
ते नित्याः कथं न तु एव जातु कदाचित् अहं नासं किं त्वासमेवातीतेषु देहोत्पत्तिविनाशेषु नित्य एवाहमासमित्यभिप्रायः॥ तथा
न त्वं नासीः किं त्वासीरेव तथा च नेमे जनाधिपाः॥ नासन् किं त्वासन्नेव॥ तथा न च न भविष्यामः किं तु भविष्याम एव च सर्वे वय
मतोस्माद्देहविनाशात् परमुत्तरकालेपि त्रिष्वपि कालेषु नित्या आत्मस्वरूपेणेत्यर्थः॥ १२ ७

गीताभा०
३

देहभेदानुवृत्त्या बहुवचनं नात्मभेदाभिप्रायेण तत्र कथमिव नित्य आत्मेति दृष्टान्तमाह॥ देहिनो देहोऽस्यास्तीति देही तस्य दे-
हिनो देहवत आत्मनोऽस्मिन्वर्तमाने देहे यथा येन प्रकारेण कौमारं कुमारभावो बाल्यावस्था यौवनं यूनो भावो मध्यावस्था जरा वयो-
हानिः॥ जीर्णावस्थेत्येतास्तिस्रोऽवस्थाः अन्योन्यविलक्षणास्तासां प्रथमावस्थानाशेन नाशो द्वितीयावस्थोपजनने नोपजनन आ-
त्मनः किं तर्ह्यविक्रियस्यैव द्वितीयतृतीयावस्थाप्राप्तिरात्मनो दृष्टा यथा तद्वदेव देहादन्यो देहो देहान्तरं तस्य देहान्तरस्य प्रा-
प्तिरविक्रियस्यैवात्मन इत्यर्थः॥ धीरो धीमांस्तत्रैवं सति न मुह्यति न मोहमापद्यते॥ १३॥ यद्यप्यात्मनाशनिमित्तो मोहो न
संभवति नित्य आत्मेति विजानतस्तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते सुखवियोगनिमित्तो दुःखसं-
योगनिमित्तश्च शोक इत्येतदर्जुनस्य वचनमाशङ्क्याह॥ मात्रा आभिर्मीयन्ते शब्दादय इति श्रोत्रादीनीन्द्रियाणि मात्राणां स्पर्शाः
शब्दादिभिः॥ संयोगास्ते शीतोष्णसुखदुःखदाः॥ शीतं उष्णं सुखं दुःखं प्रयच्छन्ति अथवा स्पृश्यन्त इति स्पर्शाः शब्दाद-

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा॥ तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥ १३॥ मात्रास्पर्शास्तु कौन्तेय शी-
तोष्णसुखदुःखदाः॥ आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥ १४॥ यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ॥ समदुःख-
सुखं धीरं सोऽमृतत्वाय कल्पते॥ १५॥ नासतो विद्यते भावो नाभावो विद्यते सतः॥ उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥ १६॥

यो विषयाः मात्रास्ते स्पर्शाश्च शीतोष्णसुखदुःखदाः॥ शीतं कदाचित्सुखं कदाचिद्दुःखं तथोष्णमप्यनियतरूपं सुखदुः-
खे पुनर्नियतरूपे यतो न व्यभिचरतः॥ अतस्ताभ्यां पृथक् शीतोष्णयोर्ग्रहणं यस्मात्ते मात्रास्पर्शादय आगमापायिनः॥ आगमापा-
यशीलास्तस्मादनित्या अतस्तान् शीतोष्णादींस्तितिक्षस्व प्रसहस्व तेषु हर्षं विषादं वा माकार्षीरित्यर्थः॥ १४॥ शीतोष्णादीन्
सहतः किं स्यादिति शृणु यं पुरुषं समदुःखसुखं समे दुःखसुखे यस्य तं समदुःखसुखं सुखदुःखे प्राप्तयोर्हर्षविषादरहितं धी-
रं धीमन्तं न व्यथयन्ति न चालयन्ति नित्यात्मदर्शनादेते यथोक्ताः शीतोष्णादयः स नित्यात्मस्वरूपदर्शननिष्ठो द्वन्द्वसहिष्णुरमृतत्वा-
य अमृतभावाय मोक्षायेत्यर्थः कल्पते समर्थो भवति॥ १५॥ इतश्च शोकमोहावकृत्वा शीतोष्णादिसहनं युक्तं यस्मात्॥ नासतोऽस-
तो विद्यमानस्य शीतोष्णादेः॥ सकारणस्य न विद्यते नास्ति भावो भवनमस्तिता न हि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमा-
णं वस्तु सद्भवति विकारो हि सः विकारश्च व्यभिचरति यथा घटादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्व्यतिरेकेणानुपलब्धेरसत्॥

देरंबु
३

7/1943

तथा सर्वो विकारः कारणव्यतिरेकेणानुपलब्धेरसन् जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं चानुपलब्धेर्मृदादिकारणस्य तत्कारणस्य च तत्का-
रणव्यतिरेकेणानुपलब्धेरसत्त्वं॥ तदसत्त्वे सर्वाभावप्रसंग इति चेन्न सर्वत्र बुद्धिद्वयोपलब्धेः सद्बुद्धिरसद्बुद्धिरिति यद्विषया
बुद्धिर्न व्यभिचरति तत्सत् यद्विषया व्यभिचरति तदसदिति सदसद्विभागे बुद्धितन्त्रे स्थिते सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते समानाधिक-
रणे न नीलोत्पलवत् सन् घटः सन् पटः सन् हस्तीत्येवं सर्वत्र तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति तथा च दर्शितं न तु सद्बुद्धिस्त-
स्मात् घटादिबुद्धिविषयोऽसन् व्यभिचारात् न तु सद्बुद्धिविषयोऽव्यभिचारात्॥ घटे विनष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभि-
चरतीति चेन्न॥ पटादावपि सद्बुद्धिदर्शनात् विशेषणविषयैव सा सद्बुद्धिः तद्वत्पटबुद्धिरपि घटान्तरे दृश्यत इति चेन्न पटादाव-
दर्शनात् सद्बुद्धिरपि नष्टे घटे न दृश्यत इति चेन्न विशेष्याभावात् सद्बुद्धिर्विशेषणविषया सती विशेष्याभावे विशेषणानुपपत्तौ किं-
विषया स्यान्न तु पुनः सद्बुद्धेर्विषयाभावादेकाधिकरणत्वं घटादिविशेष्याभावेन युक्तमिति चेन्नेदमुदकमिति मरीच्यादावन्यतरा-
भावेऽपि सामानाधिकरण्यदर्शनात्तस्माद् देहादेर्द्वन्द्वस्य च सकारणस्यासतो न विद्यते भाव इति तथा सतश्चात्मनोऽभावोऽविद्यमा-

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं॥ विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति॥ १७ ॥

नता न विद्यते सर्वत्राव्यभिचारादित्यवोचाम एवमात्मानात्मनोः सदसतोरुभयोरपि दृष्ट उपलब्धोऽन्तो निर्णयः सत्सदेवासदसदे-
ति त्वनयोर्यथोक्तयोस्तत्त्वदर्शिभिस्तदिति सर्वनाम सर्वं च ब्रह्म तस्य नाम तदिति तद्भावस्तत्त्वं ब्रह्मणो याथात्म्यं तत्त्वं द्रष्टुं शीलं
येषां ते तत्त्वदर्शिनस्तैस्तत्त्वदर्शिभिः त्वमपि तत्त्वदर्शिनां दृष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियतरूपाणि द्वन्द्वा-
नि विकारोऽयमसन्नेव मरीचिजलवन्मिथ्यावभासत इति मनसि निश्चित्य तितिक्षस्वेत्यभिप्रायः॥ १६॥ किं पुनस्तत्सदेव सर्वदास्ती-
त्युच्यते अविनाशीति अविनाशि न विनष्टुं शीलमस्येति तु शब्दः सतो विशेषणार्थस्तद्विद्धि जानीहि किं येन सर्वमिदं जगत् ततं व्या-
प्तं सदाख्येन ब्रह्मणा साकाशमाकाशेनेव घटादयो विनाशमदर्शनमभावमव्ययस्य न व्येति उपचयापचयौ न याति इत्यव्ययं त-
स्याव्ययस्य नैतत्सदाख्यं ब्रह्म स्वेन रूपेण व्येति निरवयवत्वाद्देहादिवन्नाप्यात्मीयेन आत्मीयाभावात् यथा देवदत्तो धनहान्या
व्येति न त्वेवं ब्रह्म व्येति न त्वेवं ब्रह्म व्येत्यतोऽव्ययस्यास्य ब्रह्मणो विनाशं न कश्चित्कर्तुमर्हति न कश्चिदात्मानं विनाशयितुं शक्नोति
ईश्वरो ह्यात्मा हि ब्रह्म स्वात्मनि च क्रियाविरोधात्॥ १७ ॥ ॥ श्रीभगवान्॥ ७॥

किं पुनस्तत् सत् यत्वात्मतां यदभिवर्तते इत्युच्यते अंतवंत इति अंतवंतो ऽन्तो विनाशो येषां ते अंतवंतः यथा मृगतृष्णिकादौ सद्बुद्धिरनु
वृत्ताप्रमाणनिरूपणांते विच्छिद्यते स तस्यांतः तथेमे देहाः स्वप्नमायादेहादिवच्चांतवंतः नित्यस्य शरीरिणः शरीरवतो ऽनाशिनो
ऽप्रमेयस्यात्मनः अंतवंत इत्युक्ता विवेकिभिरित्यर्थः नित्यस्यानाशिन इति न पुनरुक्तं नित्यत्वस्य द्विविधत्वाल्लोके नाशस्य च यथा देहो
भस्मीभूतो ऽदर्शनं गतो नष्ट उच्यते विद्यमानो ऽप्यन्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते तथा ऽयं नाशो ऽप्येवं तत्रानाशिनो
नित्यस्येति द्विविधेनापि नाशेनासंबंधस्येत्यर्थः ॥ अन्यथा पृथिव्यादिवदनित्यत्वं स्यादात्मनः तन्मा भूदिति नित्यस्यानाशिन इत्याह
अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्यर्थः ननु आगमेनात्मा परिच्छिद्यते प्रत्यक्षादिना च पूर्वं न आत्मनः स्वतःसिद्धत्वात् सिद्धे ह्या
त्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति नहि पूर्वमित्थमहमित्यात्मानमप्रमाय पश्चात्प्रमेयपरिच्छेदाय प्रवर्तते ॥ नह्यात्मा नाम
कस्यचिदप्रसिद्धो भवति शास्त्रं त्वन्त्यं प्रमाणमतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रमाणत्वमात्मनि प्रपद्यते न त्वज्ञातार्थज्ञापकत्वेन तथा

अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः ॥ अनाशिनो ऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥ १८ ॥ य एनं वेत्ति हंतारं यश्चैनं मन्यते
हतं उभौ तौ न विजानीतो नायं हंति न हन्यते ॥ १९ ॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ॥ अजो नित्यः शाश्वतो ऽयं पुरा
णो न हन्यते हन्यमाने शरीरे ॥ २० ॥ ॥ ॥

च श्रुतिः यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इति यस्मादेवं नित्यो ऽविक्रियश्चात्मा तस्माद्युध्यस्व युद्धादुपरमं मा कार्षीरित्यर्थः नह्य
त्र युद्धकर्तव्यता विधीयते युद्धे प्रवृत्त एव ह्यसौ शोकमोहप्रतिबद्धस्तूष्णीमास्ते ऽतस्तस्य कर्तव्यप्रतिबंधापनयमात्रं भगवता क्रियते त
स्माद्युध्यस्वेति अनुवादमात्रं न विधिः शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रं न प्रवर्तकमित्येतस्यार्थस्य साक्षिभूते ऋचावा
नीनाय भगवान् ॥ १८ ॥ यत्तु मन्यसे युद्धे भीष्मादयो मया हन्यंते ऽहमेव तेषां हंतेत्येषा बुद्धिर्मृषैव ते ॥ कथं ॥ य एनमिति य एनं देहिनं प्रकृ
तं वेत्ति जानाति हंतारं हननक्रियायाः कर्तारं यश्चैनं मन्यते हतं देहहनने हतो ऽहमिति हननक्रियायाः कर्मभूतं तावुभावपि न विजानीतो
ऽविवेकेनात्मानं हंताहं हतो ऽहमिति देहहनने नात्मानमहंप्रत्ययविषयं यो जानीतस्तावात्मस्वरूपानभिज्ञावित्यर्थः यस्मान्नायमात्मा हंति न ह
ननक्रियायाः कर्ता न च हन्यते न च कर्म भवतीत्यर्थो ऽविक्रियत्वात् ॥ १९ ॥ कथमविक्रिय आत्मेति द्वितीयो मंत्रः न जायत इति ॥ न जायते नोत्प
द्यते जनिलक्षणा वस्तुविक्रिया नात्मनो विक्रियत इत्यर्थः तथा न म्रियते वा शब्दश्चार्थे न म्रियते चेत्यंत्या विनाशलक्षणा विक्रिया प्रतिषिध्य
ते कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैः संबध्यते न कदाचिज्जायते न कदाचिन्म्रियत इत्येवं यस्मादयमात्मा भूत्वा भवनक्रियामनुभू

9
1943

य पश्चादभविता अभावं गंता न भूयः पुनस्तस्मान्न म्रियते यो हि भूत्वा न भवति स म्रियत इत्युच्यते लोके वाशब्दान्नशब्दाच्चायमात्मा ऽ
भूत्वा भविता वा देहवन्न भूयः पुनस्तस्मान्न जायते यो ह्यभूत्वा भविता स जायत इत्युच्यते नैवमात्मा ऽतो न जायते यस्मादेवं तस्माद
जो यस्मान्न म्रियते तस्मान्नित्यश्च यद्यप्याद्यंतयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवंति तथापि मध्यभाविनीनां विक्रि
यायां स्वशब्दैरेव प्रतिषेधः कर्तव्य इत्यनुक्तानामपि यौवनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्यादित्याह शाश्वत इत्यादि शाश्वत
इत्यपक्षयलक्षणा विक्रिया प्रतिषिध्यते शश्वद्भवः शाश्वतो नापक्षीयते स्वरूपेण निरवयवत्वान्निर्गुणत्वाच्च नापि च गुणक्षयेणापक्ष
यः अपक्षयविपरीतापि वृद्धिलक्षणा विक्रिया प्रतिषिध्यते पुराण इति यो ह्यवयवागमेनोपचीयते स वर्धते अभिनव इति चोच्यते अयं
त्वात्मा निरवयवत्वात्पुरापि नव एवेति पुराणो न वर्धत इत्यर्थः यथा न हन्यते न विपरिणम्यते हन्यमाने विपरिणम्यमाने ऽपि शरीरे हंति
रत्र विपरिणामार्थो द्रष्टव्यो ऽपुनरुक्ततायै न विपरिणमत इत्यर्थः अस्मिन्मंत्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषि
ध्यंते सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः यस्मादेवं तस्मादुभौ तौ न विजानीत इति पूर्वेण मंत्रेणास्य संबंधः ॥ २० ॥ य एनं

वेदाविनाशिनं नित्यं य एनमजमव्ययं कथं स पुरुषः पार्थ कं घातयति हंति कं २१ ॥

वेत्ति हंतारमित्यनेन हननक्रियायाः कर्ता कर्म च न भवतीति प्रतिज्ञाय न जायत इत्यनेनाविक्रियत्वं हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहर
ति वेदेति वेद विजानाति अविनाशिनमंत्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेदेति संबंधः एनं पूर्वेण मंत्रेणोक्तलक्षण
मजं जन्मरहितमव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वान् पुरुषो ऽधिकृतो हंति हननक्रियां करोति कथं घातयति हंतारं प्रयोजयति न कथंचि
त्कंचिद्धंति न कथंचित्कंचिद्घातयतीत्युभयत्राक्षेप एवार्थः प्रश्नार्थासंभवात् हेत्वर्थस्याविक्रियत्वस्य तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एव प्र
करणार्थो ऽभिप्रेतो भगवता हंतेस्त्वाक्षेप उदाहरणार्थत्वेन विदुषः कं कर्मासंभवहेतुविशेषं पश्यन् कर्माण्याक्षिपति भगवान् कथं स
पुरुष इति ननूक्त एवात्मनो ऽविक्रियत्वं कर्मासंभवहेतुः कारणविशेषः सत्यमुक्तो न तु स कारणविशेषो ऽन्यत्वाद्विदुषो ऽविक्रियादात्म
न इति न ह्यविक्रियं स्थाणुं विदितवतः कर्म न संभवतीति चेन्न विदुष आत्मत्वान्न देहादिसंघातस्य विद्वत्ता अतः पारिशेष्यादसंहत
आत्मा विद्वानविक्रिय इति तस्य विदुषः कर्मासंभवादाक्षेपो युक्तः कथं स पुरुष इति यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्याविक्रिय ए
व सन् बुद्धिवृत्त्यविवेकविज्ञानेनाविद्ययोपलब्धात्मा कल्प्यते ॥ एवमेवात्मानात्मविवेकविज्ञानेन बुद्धिवृत्त्या विद्ययासत्यरूपया प
रमार्थतो ऽविक्रिय एवात्मा विद्वानुच्यते विदुषः कर्मासंभववचनाद्यानि कर्माणि शास्त्रेण विधीयंते तान्यविदुषो विहितानीति भगवतो

निश्चयो गम्यते ननु विद्याय विदुष एव विधीयते विदितविद्यस्य पिष्टपेषणवत् विद्याविधानानर्थक्यात् तत्राविदुषः कर्माणि विधीयं
ते न विदुष इति विशेषो नोपपद्यते नानुष्ठेयस्य भावाभावविशेषोपपत्ते अग्निहोत्रविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाध
नोपसंहारपूर्वकमनुष्ठेयं कर्ताहं मम कर्तव्यमित्येवंप्रकारविज्ञानवतो विदुषो यथानुष्ठेयं भवति न नु तथा न जायत इत्याद्यात्मस्वरूपवि
ष्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेयं भवति किंतु नाहं कर्ता न भोक्त्यात्मैकत्वाकर्तृत्वविषयज्ञानादन्यन्नोत्पद्यत इत्येष विशेष उपपद्य
ते यः पुनः कर्ताहमिति वेत्त्यात्मानं तस्य ममेदं कर्तव्यमित्यवश्यंभाविनी बुद्धिः स्यात् तदपेक्षया सोऽधिक्रियत इति तं प्रति कर्माणि स चाविद्वा
नुभौ तौ न विजानीत इति वचनात् विशेषितस्य च विदुषः कर्माक्षेपवचनात् कथं स पुरुष इति तस्माद्विदुषो मुमुक्षोश्च सर्वकर्मसन्न्या
स एवाधिकारः अत एव भगवान्नारायणः सांख्यान्विदुषोऽविदुषश्च कर्मिणः प्रविभज्य द्वे निष्ठे ग्राहयति ज्ञानयोगेन सांख्यानां कर्म
योगेन योगिनामिति तथा च पुत्रायाह भगवान्व्यासः द्वाविमावथ पन्थानावित्यादि तथा च क्रियापथश्चैव पुरस्तात्पश्चात्संन्यासश्चेत्य
तमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान् अतत्त्वविदहंकारविमूढात्मा कर्ताहमिति मन्यते तत्त्ववित्तु नाहं करोमीति तथा च सर्व
कर्माणि मनसा संन्यस्यास्त इत्यादि तत्र केचित्पण्डितंमन्या वदन्ति जन्मादिषड्भावविक्रियारहितोऽविक्रियोऽकर्तैकोऽहमात्मेति न क
स्यचित् ज्ञानमुत्पद्यते यस्मिन्सति सर्वकर्मसंन्यास उपदिश्यत इति न जायत इत्यादि शास्त्रोपदेशानर्थक्यप्रसंगात् यथा च शास्त्रोपदे
शसामर्थ्याद्धर्माधर्मास्तित्वविज्ञानं कर्तुश्च देहान्तरसंबंधविज्ञानमुत्पद्यते यथा शास्त्रात्तस्यैवात्मनोऽविक्रियत्वाकर्तृत्वैकत्वादिवि
ज्ञानं कस्मान्नोत्पद्यत इति प्रष्टव्यास्ते करणागोचरत्वादिति चेत् न मनसैवानुद्रष्टव्यमिति श्रुतेः अतत्त्वमस्यादिवाक्यार्थमनोवृत्ताव
भिव्यक्तं वस्त्वात्मैकत्वं सविकल्पव्यवहारगोचरमित्यर्थः शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणं तथा च तदधि
गमाय अनुमाने आगमे च सति ज्ञानं नोत्पद्यत इति साहसमेतत् ज्ञानं चोत्पद्यमानं तद्विपरीतमज्ञानमवश्यं बाधत इत्यभ्युपगन्तव्यं त
च्चाज्ञानं दर्शितं हन्ताहं हतोऽस्मीत्युभौ तौ न विजानीत इत्यत्र चात्मनो हननक्रियायाः कर्तृत्वं कर्मत्वं हेतुकर्तृत्वं चाज्ञानकृतं दर्शितं त
च्च सर्वक्रियास्वपि समानं कर्तृत्वादेरविद्याकृतत्वमविक्रियत्वादात्मनो विक्रियावान् हि कर्तात्मनः कर्मभूतमन्यं प्रयोजयति कुर्वि
ति तदेतद्विशेषण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान् कर्माधिकाराभावप्रदर्शनार्थं वेदाविनाशिनं कथं स
पुरुष इत्यादिना क पुनर्विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव ज्ञानयोगेन सांख्यानामिति तथा सर्वकर्मसंन्यासं वक्ष्यति सर्वकर्माणि मन
सा संन्यस्येत्यादिना ननु मनसेति वचनाद्वाचिकानां कायिकानां च संन्यास इति चेत् न सर्वकर्माणीति विशेषितत्वात् मानसानां

11/1943

मेव सर्वकर्मणामिति चेत् न मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनोव्यापाराभावे वाक्कायव्यापारानुपपत्तेः शास्त्रीयाणां वाक्कायकर्म
णां कारणानि मानसानि कर्माणि वर्जयित्वान्यानि सर्वकर्माणि मनसा संन्यस्यास्त इति चेत् न नैव कुर्वन्न कारयन्निति विशेषणात् सर्वकर्मसंन्या
सोऽयं भगवता कोक्तः मरिष्यतो न जीवत इति चेत् न नवद्वारे देहे आस्त इति विशेषणात् सर्वकर्मसंन्यासेन मृतस्य तद्देहे आसनं संभ
वति अकुर्वतोऽकारयतश्च देहे संन्यस्येति संबंधो न देह आस्त इति चेत् न सर्वत्रात्मनोऽविक्रियत्वावधारणात् आसनक्रियायाश्चाधिक
रणापेक्षत्वात् तदनपेक्षत्वाच्च संन्यासस्य संपूर्वस्तु न्यासशब्दोऽत्र त्यागार्थो न निक्षेपार्थः तस्माद्गीताशास्त्रे आत्मज्ञानवतः संन्यास एवा
धिकारो न कर्मणीति तत्र तत्रोपरिष्टादात्मज्ञानप्रकरणे दर्शयिष्यामः २१ तत्रात्मनोऽविनाशित्वं प्रतिज्ञातं तत्किमिवेत्युच्यते वासां
सीति वासांसि वस्त्राणि जीर्णानि दुर्बलतां गतानि यथा लोके विहाय परित्यज्य नवान्यभिनवानि गृह्णाति उपादत्ते नरः पुरुषोऽपराण्य
न्यानि तथा तद्वदेव शरीराणि विहाय जीर्णान्यन्यानि संयाति संगच्छति नवानि देही आत्मा पुरुषवदविक्रिय एवेत्यर्थः २२ कस्मादविक्रि
य एवेत्याह नैनमिति नैनं प्रकृतं देहिनं छिन्दन्ति शस्त्राणि निरवयवत्वान्नावयवविभागं कुर्वन्ति शस्त्राण्यस्यादीनि तथा नैनं दहति पाव

> वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि । तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥ २२
> नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ॥ न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ २३ ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव
> च । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ २४ ॥

कोऽग्निरपि न भस्मीकरोति तथा नैनं क्लेदयन्त्यापः अपां हि सावयवस्य वस्तुन आर्द्रीभावकरणेनावयवविश्लेषापादने सामर्थ्यं तन्निरव
यवे आत्मनि न संभवति यथा स्नेहवद्द्रव्यं स्नेहशोषणेन शोषयति वायुरेवमेनमात्मानं न शोषयति मारुतोऽपि २३ यत एवं तस्मात्
अच्छेद्य इति यस्मादन्योन्यनाशहेतुभूतान्येनमात्मानं नाशयितुं नोत्सहन्ते अस्यादीनि तस्मान्नित्यो नित्यत्वात् सर्वगतः सर्व
गतत्वात् स्थाणुरिव स्थिर इत्येतत् स्थिरत्वादचलः अयमात्मा अतः सनातनश्चिरंतनो न कारणात् कुतश्चिन्निष्पन्नोऽभिनव इत्यर्थः
नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयं यत एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रियत्वं चोक्तं न जायते म्रियते वेत्यादिना तत्र यदे
वात्मविषयं किंचिदुच्यते तदेतस्मात् श्लोकार्थान्नातिरिच्यते किंचिच्छब्दतः पुनरुक्तं किंचिदर्थत इति दुर्बोधत्वादात्मवस्तुनः पुनः
पुनः प्रसंगमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान्वासुदेवः कथं नु नाम संसारिणां बुद्धिगोचरमापन्नं सत्
तत्त्वं संसारनिवृत्तये स्यादिति २४ ॥ ॥ ॥ ॥

गीताभा० किंच अव्यक्तइति अव्यक्तः सर्वकरणाविषयत्वान्न व्यज्यत इत्यव्यक्तोऽयमात्मा अत एवाचिंत्योयं यध्धींद्रियगोचरं तच्चिंताविषयमाप
६ ते अयंत्वात्मानिंद्रियगोचरत्वात् अचिंत्यो अत एवाविकार्योयंयथाक्षीरं दध्यातंचनादिनाविकार्यं नतथायमविक्रियोनहिनिरवयवंविक्रि
यात्मकं दृष्टमविक्रियत्वादविकार्योयमात्मोच्यते तस्मादेवं यथोक्तप्रकारेणैनमात्मानंविदित्वा त्वंनानुशोचितुमर्हसि हंताहमेषां
येमहन्यंत इति २५ आत्मनोनित्यत्वमभ्युपगम्येदमुक्तं अथचेति अथचत्वमभ्युपगमार्थः एवंप्रकृतमात्मानंनित्यजातंलोकप्रसि
ध्यामन्यसे अनेकशरीरोत्पत्तिं जातोजातइति वा मन्यसे कुध्यानातो हतोनात इति अंतःकरणविक्रियाभेदमनुविक्रियत इति मन्यसेनथात
त्मन्ययविनाशमनुविनश्यतीति नित्यंवामन्यसे मृतोमृत इति तथापितथाभाविन्यप्यात्मनित्वंमहाबाहोनैनंशोचितुमर्हसि २६
जन्मवतोनाशो नाशवतश्च जन्मावश्यंभाविनावितितथा च सति जातइति जातस्यहिलब्धजन्मनोध्रुवोअव्यभिचारिमृत्युर्मरणंध्रुवंज
न्मसृतस्य च तस्मादपरिहार्योर्थस्वाभाविकश्चेदपरिहार्यः स्वाअर्थजन्ममरणलक्षणोर्थः तस्मिन्नपरिहार्येर्थेनत्वंशोचितुमर्हसि २७

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते॥ तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि॥२५॥ अथचैनंनित्यजातंनित्यंवामन्यसेमृतं॥
तथापित्वंमहाबाहोनैनंशोचितुमर्हसि॥२६॥ जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्य च॥ तस्मादपरिहार्येर्थेनत्वंशोचितुमर्हसि॥२७
॥अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत॥ अव्यक्तनिधनान्येवतत्रकापरिदेवना २८ आश्चर्यवत्पश्यतिकश्चिदेनमाश्चर्य
वद्वदतितथैवचान्यः॥ आश्चर्यवच्चैनमन्यः शृणोतिश्रुत्वाप्येनंवेदनचैवकश्चित॥२९॥

कार्यकारणसंघातात्मकान्यपिभूतान्युद्दिश्यशोकोनयुक्तः॥ कर्तुंयतः अव्यक्तेति अव्यक्तमदर्शनमनुपलब्धिरादिर्येषांपुत्रमि
त्रादिकार्यकरणसंघातात्मकानांतान्यव्यक्तादीनिभूतानिप्रागुत्पत्तेरुत्पन्नानिचप्राक्मरणात् अव्यक्तमध्यान्यव्यक्तनिधनान्येव
पुनरुपदर्शनंनिधनंमरणंयेषांतान्यव्यक्तनिधनानिमरणादूर्ध्वमप्यव्यक्ततामेवप्रतिपद्यंत इत्यर्थः तथाचोक्तं अदर्शनादापतितः हेरंबु
पुनश्चादर्शनंगत इति तत्रकापरिदेवना कोवाप्रलापः अदृष्टदृष्टप्रनष्टभ्रांतिभूतेषु भूतेष्वित्यर्थः २८ दुर्विज्ञेयोयंप्रकृतआ
त्माकिंत्वामेवैकमुपालभेसाधारणेभ्रांतिनिमित्ते कथंदुर्विज्ञेयआत्मेत्याह आश्चर्यइति आश्चर्यवदाश्चर्यमदृष्टपूर्वमद्भुतमकस्मा
द्दृश्यमानं तेनतुल्यमाश्चर्यवदाश्चर्यमिवैनमात्मानंपश्यतिकश्चिदाश्चर्यवदेवंवदतितथैवचान्यः आश्चर्यवच्चैनमन्यः शृणोति ६
श्रुत्वाप्युक्त्वादृष्ट्वाप्येनंवेदनचैवकश्चिदथवायात्मानंपश्यतिस आश्चर्यतुल्योयोवदतियश्चशृणोतिसोनेकसहस्रेषुक
श्चिदेवभवत्यतोदुर्बोधआत्मेत्यभिप्रायः॥ २९॥ वासुदेव गोविंद हेरंब ७

13
1943

अथेदानींप्रकरणार्थउपसंह्रियते देहीति देहीशरीरीनित्यंसर्वदासर्वावस्थास्ववध्योनिरवयवत्वान्नित्यत्वाच्चतत्रावध्योयं
देहेशरीरेसर्वस्यसर्वगतत्वात्स्थावरादिषुस्थितोपिसर्वस्यप्राणिजातस्यदेहेवध्यमानेप्ययंदेहीनवध्योयस्मात् तस्माद्भीष्मादी
निसर्वाणिभूतान्युद्दिश्यनत्वंशोचितुमर्हसि इहपरमार्थतत्वापेक्षायांशोकोमोहोवानसंभवतीत्युक्तं नकेवलंपरमार्थतत्वापेक्षाया
मेवस्वधर्मइति स्वधर्ममपिस्वोधर्मः क्षत्रियस्ययुध्धंतमप्यवेक्ष्यत्वंनविकंपितुंप्रचलितुमर्हसि ३० धर्म्यात्क्षत्रियस्यस्वाभाविका
त् धर्मादात्मस्वाभाव्यादित्यभिप्रायः तच्चयुध्धंपृथिवीजयद्वारेणधर्मार्थप्रजारक्षणार्थं चेतिपरंधर्म्यधर्मादनपेतंतस्मात्धर्म्या
त् युध्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ३१ हियस्मात्कुतश्चततयुध्धंकर्तव्यमित्युच्यते यदृच्छयेतियदृच्छयाचाप्रार्थितमागतं
उपपन्नंस्वर्गद्वारं आवावृतमुद्घाटितंयत् ईदृशंयुध्धंलभंतेक्षत्रियाः हेपार्थकिंनसुखिनस्ते ३२ एवंकर्तव्यतामप्राप्तमपि अथचे
त्वमिति अथचेत्त्वमिमंधर्म्यंधर्मादनपेतंविहितंसंग्रामंयुध्धंनकरिष्यसिचेत् ततस्तदकरणात् स्वधर्मंकीर्तिंचमहादेवादिसमाग
मनिमित्तांहित्वाकेवलंपापमवाप्स्यसि ३३ नकेवलंस्वधर्मकीर्तिपरित्यागः अकीर्तिमिति अकीर्तिंचापिभूतानिकथयिष्यंतितेत्व

देहीनित्यमवध्योयंदेहेसर्वस्यभारत॥ तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ३० स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि॥
धर्म्याध्दियुध्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते॥३१॥ यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं॥ सुखिनःक्षत्रियाःपार्थलभंतेयुध्धमीदृशं
३२॥ अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि॥ ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि ३३ अकीर्तिंचापिभूतानिकथयिष्यंतितेव्य
यां संभावितस्यचाकीर्तिर्मरणादतिरिच्यते॥३४॥ भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः॥ येषांचत्वंबहुमतोभूत्वायास्यसिलाघवं ३५
अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः॥ निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं॥३६॥ हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं

अव्ययांदीर्घकालांधर्मात्माशूर इत्येवमादिभिर्गुणैः संभावितस्यचाकीर्तिर्मरणादतिरिच्यते संभावितस्यचाकीर्तिर्वरंमरणमित्यर्थः
॥३४॥ किंचभयादिति भयात्कर्णादिभ्योरणात्युध्धात् उपरतंनिवृत्तंमंस्यंतेचिंतयिष्यंति नकृपयेतित्वांमहारथाः दुर्योधनप्रभृ
तयः येषांतत्वंदुर्योधनादीनांचबहुमतोबहुभिर्गुणैर्युक्तइत्येवंमतोभूत्वापुनस्त्वंयास्यसिलाघवंलघुभावं॥३५॥ किंच
अवाच्येतिअवाच्यवादानवक्तव्यान्वादांश्चबहूननेकप्रकारान्वदिष्यंतितवाहिताः शत्रवोनिंदंतःकुत्सयंतस्तवत्वदीयंसामर्थ्यंत
स्मात्ततोनिंदाप्राप्तेर्दुःखात्॥ दुःखतरंनुकिंततः कष्टतरंदुःखंनास्तीत्यर्थः ३६ युध्धेपुनःक्रियमाणेकर्णादिभिः हतोवेति हतोवा
प्राप्स्यसिस्वर्गंजित्वावाकर्णादीन्भोक्ष्यसेमहीं॥ उभयथापितवलाभएवेत्यभिप्रायः यतएवं तस्मादुत्तिष्ठकौंतेययुध्धायकृतनिश्चयः॥

गीताभा०

जेष्यामि त्वां मरिष्यामि वेति निश्चयं कृत्वेत्यर्थः ॥ ३७ ॥ तत्र स्वधर्मं इत्येवं युध्यमानस्योपदेशमिमं शृणु सुखदुःखे इति सुखदुःखे
समे कृत्वा तुल्ये कृत्वा रागद्वेषावकृत्वेत्येतत् तथा लाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व घटस्व नैवं युद्धं कुर्वन् पाप
मवाप्स्यसि एष उपदेशः प्रासंगिकः शोकमोहापनयाय लौकिको न्यायः स्वधर्ममपि चावेक्ष्य न्यायः श्लोकैरुक्तो न तु तात्पर्येण परमार्थ
दर्शनं त्विह प्रकृतं तच्चोक्तमुपसंहरत्येषा तेऽभिहितेति शास्त्रविषयविभागप्रदर्शनायेह हि दर्शितं ३८ शास्त्रविषयविभागे उपरि
ष्टात् ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्तिष्यते श्रोतारः स्वविषयविभागेन सुखं ग्रही
ष्यंतीत्यत आह एषेति एषा ते तुभ्यमभिहितोक्ता सांख्ये परमार्थवस्तुविवेकविषये बुद्धिर्ज्ञानं साक्षाच्छोकमोहादिसंसारहेतुदोष
निवृत्तिकारणं योगे तु तत्प्राप्त्युपाये निःसंगतया द्वंद्वप्रहाणपूर्वकमीश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे च मामनंतरमे
वोच्यमानां बुद्धिं शृणु तां बुद्धिं स्तौति प्ररोचनार्थं बुद्ध्या यया योगविषयया युक्तो हे पार्थ कर्मबंधं धर्माधर्माख्यो बंधः कर्मबंधस्तं

तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ३७ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ॥ ततो युद्धाय युज्यस्व नैवं पापमवा
प्स्यसि ॥ ३८ एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥ बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ३९ नेहाभिक्रमनाशो
ऽस्ति प्रत्यवायो न विद्यते ॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ४० व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन ॥ बहुशा
खा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ॥ ४१ यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ॥ वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४२

प्रहास्यसीश्वरप्रसादनिमित्तज्ञानप्राप्त्येत्यभिप्रायः ३९ किं चान्यत् नेति नेह मोक्षमार्गे कर्मयोगे अभिक्रमनाशोऽभिक्रमणम
भिक्रमः प्रारंभस्तस्य नाशो नास्ति यथा कृष्यादेर्योगविषयप्रारंभस्य नानैकांतिकफलत्वमित्यर्थः किं च नापि चिकित्सावत् प्रत्यवा
यो विद्यते किं तु भवति स्वल्पमप्यस्य योगधर्मस्यानुष्ठितं त्रायते रक्षति महतः संसारभयात् जन्ममरणादिलक्षणात् ४० येयं सां
ख्ये बुद्धिरुक्ता योगे च वक्ष्यमाणलक्षणा सा व्यवसायेति व्यवसायात्मिका निश्चयस्वभावैकैव बुद्धिः इतरविपरीतबुद्धिशाखा
भेदस्य बाधिका सम्यक्प्रमाणजनितत्वात् इहश्रेयोमार्गे हे कुरुनंदन याः पुनरितरा बुद्धयो यासां शाखाभेदप्रचारवशादनंतो
ऽपारोऽनुपरतः संसारो नित्यप्रततो भवति प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्चोपरतास्वनंतभेदबुद्धिषु संसारोऽप्युपरम
ते ता बुद्धयो बहुशाखा बह्व्यः शाखा यासां ताः बहुशाखा बहुभेदा इत्येतत् प्रतिशाखाभेदेन ह्यनंताश्च बुद्धयः केषामव्यव
सायिनां प्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः ४१ येषां व्यवसायात्मिका बुद्धिर्नास्ति ते यामिमामिति यामिमां वक्ष्यमाणां
पुष्पितां पुष्पितवृक्ष इव शोभमानां श्रूयमाणरमणीयां वाचं वाक्यलक्षणां प्रवदंति केऽविपश्चितः अमेधसोऽविवेकिन इत्यर्थः वेदवादरता बहर्थवा
दरताः बह्वर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषु रताः हे पार्थ नान्यत् स्वर्गपश्वादिफलसाधनेभ्यः कर्मभ्योऽस्तीत्येवं वादिनो वदनशीलाः ४२

७

हेरंबु

७

15
1943

तेच कामात्मानः कामस्वभावाः कामपरा इत्यर्थाः स्वर्गपराः स्वर्गः परः पुरुषार्थो येषां ते स्वर्गपराः स्वर्गप्रधानाः जन्मकर्मफलप्रदां क
र्मणः फलं कर्मफलं जन्मैव कर्मफलं तत्प्रददातीति जन्मकर्मफलप्रदा तां वाचं प्रवदंतीत्यनुषज्यते क्रियाविशेषबहुलां क्रियाणां विशेषाः
क्रियाविशेषाः ते बहुला यस्यां तां स्वर्गपुत्रपश्वाद्यर्थाय यया वाचा बाहुल्येन प्रकाश्यंते भोगैश्वर्यगतिं प्रति भोगश्चैश्वर्यं च भोगैश्वर्ये तयोः
गतिः प्राप्तिर्भोगैश्वर्यगतिस्तां प्रति साधनभूतास्तु क्रियाविशेषास्तद्बहुलां तां वाचं प्रवदंतो मूढाः संसारे परिवर्तंत इत्यभिप्रायः
४३ तेषां च भोगैश्वर्यप्रसक्तानामिति भोगैश्वर्यप्रसक्तानां भोगः कर्तव्य ऐश्वर्यं चेति भोगैश्वर्ययोरेव प्रणयवतां तदात्मभूतानां
तया क्रियाविशेषबहुलया वाचा अपहृतचेतसां आच्छादितविवेकप्रज्ञानां व्यवसायात्मिका सांख्ये योगे वा बुद्धिः समाधौ समाधीय
ते तस्मिन् पुरुषोपभोगाय सर्वमिति समाधिरंतःकरणं बुद्धिस्तस्मिन् समाधौ न विधीयते न भवतीत्यर्थः ४४ य एवं विवेकबुद्धिरहि
तास्तेषां कामात्मनां त्रैगुण्यविषया इति त्रैगुण्यविषयास्त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते वेदास्त्रैगुण्यविषयाः त्वं तु
निस्त्रैगुण्यो भवार्जुन निष्कामो भवेत्यर्थः सुखदुःखहेतू सप्रतिपक्षौ पदार्थौ द्वंद्वशब्दवाच्यौ ततो निर्गतो निर्द्वंद्वो भव नित्यसत्त्वस्थः स

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ४३ भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ४४ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आ
त्मवान् ४५ यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६ ॥

दा सत्त्वगुणाश्रितो भव तथा निर्योगक्षेमोऽनुपात्तस्योपादानं योग उपात्तस्य रक्षणं क्षेमो योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो
निर्योगक्षेमो भव आत्मवानप्रमत्तश्च भव एष तवोपदेशः ४५ धर्ममनुष्ठितः सर्वेषु वेदोक्तेषु कर्मसु यान्यनंतानि फलानि तानि नापेक्ष्यं
ते चेत् किमर्थं तानीश्वरायेत्यनिष्पद्यंत इत्युच्यते शृणु यावानर्थ इति यथा लोके कूपतडागाद्यनेकस्मिन् उदपाने परिच्छिन्नोद
के यावान् यावत्परिमाणः स्नानपानादिरर्थः फलं प्रयोजनं स सर्वोऽर्थः सर्वतः संप्लुतोदके योऽर्थस्तावानेव संपद्यते तत्रांतर्भवतीत्
त्यर्थः एवं तावांस्तावत्परिमाण एव संपद्यते सर्वेषु वेदेषु वेदोक्तेषु कर्मसु योऽर्थो यत्कर्मफलं सोऽर्थो ब्राह्मणस्य संन्यासिनः परमार्थ
तत्त्वं विजानतो योऽर्थो यद्विज्ञानफलं सर्वतः संप्लुतोदकस्थानीयं तस्मिंस्तावानेव संपद्यते यथा कृताय विजितायाधरेयाः संयंत्ये
वमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेदेति श्रुतेः सर्वं कर्माखिलमिति च वक्ष्यति तस्मात्प्राक् ज्ञाननिष्ठा
धिकारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्यं ४६ ॥ ॥ ॥

तत्र च कर्मण्येवेति कर्मण्येवाधिकारो न ज्ञाननिष्ठायां तेतव तत्र च कर्म कुर्वतो मा फलेष्वधिकारोऽस्तु कर्मफलतृष्णा मा भूत् कदाचन कस्यांचित् अप्यवस्थायामित्यर्थः यदा कर्मफले तृष्णा ते स्यात्तदा कर्मफलप्राप्तेर्हेतुः स्यात् एवं कर्मफले माहेतुर्भूर्यदा हि कर्मफलतृष्णाप्रयुक्तः कर्मणि प्रवर्तते तदा कर्मफलस्यैव जन्मनो हेतुर्भवेत् यदि कर्मफलं नेष्यते किं कर्मणा दुःखरूपेणेति मा ते तव संगोऽस्त्वकर्मण्यकरणे प्रीतिर्मा भूत् ४७ यदि फलप्रयुक्तेन न कर्तव्यं कर्म कथं तर्हि कर्तव्यमित्युच्यते योगस्थ इति योगस्थः सन् कुरु कर्माणि केवलमीश्वरार्थं तत्रापीश्वरो मे तुष्यत्विति संगं त्यक्त्वा धनंजय फलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिस्तद्विपर्ययजा असिद्धिस्तयोः सिद्ध्यसिद्ध्योरपि समस्तुल्यो भूत्वा कुरु कर्माणि कोऽसौ योगो यत्रस्थः कुर्विति उक्तमिदमेव तत् सिद्ध्यसिद्ध्योः समत्वं योग उच्यते ४८ यत्पुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्मैतस्मात्कर्मणः दूरेणेति दूरेणातिविप्रकर्षेणात्यवरं निकृष्टं कर्मफलार्थिना क्रियमाणं बुद्धियोगात् समबुद्धियुक्तात् कर्मणो जन्ममरणादिहेतुत्वात् धनंजय यत एवं योगविषयायां बुद्धौ तत्परिपाकजायां सांख्यबुद्धौ शरणमाश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व परमार्थज्ञानशरणो भवेत्यर्थः यतोऽवरं कर्म कुर्वाणाः कृपणा दीनाः

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ४७ योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ४८ दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ४९ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ५० कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ५१

फलहेतवः फलतृष्णाप्रयुक्ताः संतो यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः ४९ समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तच्छृणु बुद्धीति बुद्धियुक्तः समत्वविषयया बुद्ध्या युक्तो बुद्धियुक्तो जहाति परित्यजति इहास्मिन् लोके उभे सुकृतदुष्कृते पुण्यपापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यतः तस्मात्समत्वबुद्धियोगाय युज्यस्व घटयस्व योगो हि कर्मसु कौशलं स्वधर्माख्येषु कर्मसु वर्तमानस्य या सिद्ध्यसिद्ध्योः समत्वबुद्धिरीश्वरार्पितचेतस्तया तद्धि कौशलं कुशलभावः बंधकौशलं यद्बंधस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावान्निवर्तंते तस्मात्समत्वबुद्धियुक्तो भव त्वं ५० यस्मात् कर्मजमिति कर्मजं फलं त्यक्त्वेति व्यवहितेन संबंधः इष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं बुद्धियुक्ताः समत्वबुद्धियुक्ता हि यस्मात् फलं त्यक्त्वा परित्यज्य मनीषिणो ज्ञानिनो भूत्वा जन्मबंधविनिर्मुक्ता जन्मैव बंधो जन्मबंधस्तेन विनिर्मुक्ता जीवंत एव जन्मबंधान्निर्मुक्ताः संतः पदं परमं विष्णोर्मोक्षाख्यं गच्छंत्यनामयं सर्वोपद्रवरहितमित्यर्थः अथवा बुद्धियोगाद्धनंजयेत्यारभ्य परमार्थदर्शनलक्षणा सर्वतः संप्लुतोदकस्थानीया कर्मयोगजसत्त्वशुद्धिजनिता बुद्धिर्दर्शिता साक्षात्सुकृतदुष्कृतप्रहाणादिहेतुत्वश्रवणात् ५१

हेरंबु
८

17
1943

योगानुष्ठानजनितसत्त्वशुद्धिः कदा प्राप्यत इत्युच्यते यदेति यदा यस्मिन्काले ते तव मोहकलिलं मोहात्मकमविवेकरूपं कालुष्यं तेनात्मानात्मविवेकबोधं कलुषीकृत्य विषयं प्रत्यंतःकरणं प्रवर्तते तेन तव बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति शुद्धभावमापत्स्यत इत्यर्थः तदा तस्मिन् काले गंतासि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुतस्य च तदा श्रोतव्यं श्रुतं च निःफलं प्रतिभात इत्यभिप्रायः ५२ मोहकलिलात्ययद्वारेण लब्धात्मविवेकजप्रज्ञः कदा कर्मयोगजं फलं परमार्थयोगमवाप्स्यसीति तच्छृणु श्रुतीति श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसंबंधप्रकाशनश्रुतिभिः श्रवणैर्विप्रतिपन्ना नानाप्रतिपन्ना श्रुतिविप्रतिविक्षिप्ता सती ते तव बुद्धिर्यदा यस्मिन्काले स्थास्यति स्थिरीभूता भविष्यति निश्चला विक्षेपचलनवर्जिता सती समाधौ समाधीयते चित्तमस्मिन्निति समाधिरात्मा तस्मिन् आत्मनीत्येतदचला तत्रापि विकल्पवर्जितेत्येतद्बुद्धिरंतःकरणं तदा योगमवाप्स्यसि योगं विवेकप्रज्ञां समाधिं प्राप्स्यसि ५३ प्रश्नबीजं प्रतिलभ्यार्जुन उवाच लब्धसमाधिप्रज्ञस्य लक्षणबुभुत्सया स्थितप्रज्ञस्येति स्थितप्रज्ञस्य स्थिता प्रतिष्ठिता अहमस्मि परं ब्रह्मेति प्रज्ञा यस्य स स्थितप्रज्ञः तस्य का भाषा भाषणं वचनं कथमसौ परैर्भाष्यते समाधिस्थस्य केशव स्थितधीः स्थि

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ५३ अर्जुन उवाच स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ५४ श्रीभगवानु० प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञ

तप्रज्ञः स्वयं वा किं प्रभाषेत किमासीत व्रजेत किं किं आसनं व्रजनं वा तस्य कथमित्यर्थः ५४ स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छते यो ह्यादित एव संन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तो यश्च कर्मयोगेन तयोः स्थितप्रज्ञस्य प्रजहातीत्यारभ्याध्यायपरिसमाप्तेः स्थितप्रज्ञलक्षणं साधनं चोपदिश्यते सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनान्युपदिश्यंते यत्नसाध्यत्वाद्यानि यत्नसाध्यानि साधनानि लक्षणानि च भवंति तानि श्रीभगवानुवा० प्रजहाति प्रकर्षेण जहाति परित्यजति यदा कामान् यस्मिन्काले इष्टभेदात्सर्वान् समस्तान्हे पार्थ मनोगतान् मनसि प्रविष्टान् सर्वकामपरित्यागे तुष्टेः कारणाभावाच्छरीरधारणनिमित्तशेषे च सत्युन्मत्तप्रमत्तस्येव प्रवृत्तिः प्राप्तेत्यत उच्यते आत्मन्येव प्रत्यगात्मस्वरूप एवात्मना स्वेनैव बाह्यलाभनिरपेक्षस्तुष्टः परमार्थदर्शनामृतरसलाभेनान्यस्मादलं प्रत्ययवान् स्थितप्रज्ञः स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञो विद्वांस्तदोच्यते त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्मारामात्मक्रीडः स्थितप्रज्ञ इत्यर्थः ५५

 किंच दुःखेष्विति दुःखेषु आध्यात्मिकादिषु प्राप्तेषु न उद्विग्नं न प्रक्षुभितं दुःखं प्राप्तेषु मनो यस्य सोऽनुद्विग्नमनाः तथा सुखेषु प्राप्तेषु विगतस्पृहः
विगता स्पृहा तृष्णा यस्य नाग्निरिवेंधनाद्याधाने सुखान्यनु विवर्धते स विगतस्पृहो वीतरागभयक्रोधो रागश्च भयं च क्रोधश्च वीता वि
 गता यस्मात्स वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञो मुनिः संन्यासी तदोच्यते ५६ किंच यइति यो मुनिः सर्वत्र देहजीवितादिष्वपि
अनभिस्नेहोऽभिस्नेहवर्जितः तत्तत्प्राप्य शुभाशुभं तत्तत् शुभमशुभं वा लब्ध्वा नाभिनंदति न द्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यति अशु
भं प्राप्य न द्वेष्टीत्यर्थः तस्यैवं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता ५७ किंच यदेति यदा संहरते सम्यगुपसंहरते चायं ज्ञा
ननिष्ठायां प्रवृत्तो यतिः कूर्मोऽङ्गानीव यथा कूर्मो भयात्स्वान्यङ्गानि उपसंहरते सर्वतः एवं ज्ञाननिष्ठ इंद्रियाणि इंद्रियार्थेभ्यः सर्व
विषयेभ्यः उपसंहरते तस्य प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यं ५८ तत्र विषयानाहरत आतुरस्यापि इंद्रियाणि कूर्माङ्गानीव संह्रीय
ते न तु विषयविषयो रागः स कथं संह्रियत इत्युच्यते विषया इति यद्यपि विषयोपलक्षितानि विषयशब्दवाच्यानि इंद्रियाणि अथवा विषया एव
निराहारस्य अनाह्रियमाणविषयस्य कष्टे तपसि स्थितस्य मूर्खस्यापि निवर्तंते देहिनो देहवतो रसवर्जं रसो रागो विषयेषु यस्तं

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभा
शुभं नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७ यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रति
ष्ठिता ५८ विषया विनिवर्तंते निराहारस्य देहिनः रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ५९ यततो ह्यपि कौंतेय पुरुषस्य विप
श्चितः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६० तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रति

ष्ठिता वर्जयित्वा रसशब्दो रागे प्रसिद्धः स्वरसेन प्रवृत्तो रसिको रसज्ञ इत्यादिदर्शनात् सोऽपि रसो रंजनारूपः सूक्ष्मोऽस्य यतेः परं परमा
र्थतत्त्वं ब्रह्म दृष्ट्वोपलभ्याहमेव तदिति वर्तमानस्य निवर्तते निर्बीजं विषयविज्ञानं संपद्यत इत्यर्थः नासति सम्यक्दर्शने रसस्योच्छेद
स्तस्मात् सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्तव्यमित्यभिप्रायः ५९ सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता आदाविंद्रि
याणि स्ववशे स्थापयितव्यानि यस्मात्तदनवस्थापने दोषमाह यततो ह्यपीति यततः प्रयत्नं कुर्वतो हि यस्मात् अपि कौंतेय पुरुषस्य वि
पश्चितो मेधाविनोऽपीति व्यवहितेन संबंधः इंद्रियाणि प्रमाथीनि प्रमथनशीलानि विषयाभिमुखं हि पुरुषं विक्षोभयंत्याकुलीकुर्वंति
आकुलीकृत्य च हरंति प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकविज्ञानयुक्तं मनो यस्मात्तस्मात् ६० तानीति तानि सर्वाणि संयम्य सं
यमनं वशीकरणं कृत्वा युक्तः समाहितः सन् आसीत मत्परोऽहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परः नान्योऽहं तस्मादित्यासीते
त्यर्थः एवमासीनस्य यतेर्वशे हि यस्येंद्रियाणि वर्तंते अभ्यासबलात् तस्य प्रज्ञा प्रतिष्ठिता ६१ ॥

हेरंबु

९

19
1943

अथेदानीं पराभविष्यतः सर्वानर्थमूलमिदमुच्यते ध्यायतेति ध्यायतः चिंतयतो विषयान् शब्दादीन् विषयविशेषानालोचयतः
पुंसः पुरुषस्य संग आसक्तिः प्रीतिस्तेषु विषयेषूपजायते संगात् प्रीतेः संजायते समुत्पद्यते कामः तृष्णा तस्मात् कामात् कुतश्चित्
प्रतिहतात् क्रोधोऽभिजायते ६२ क्रोधादिति क्रोधाद्भवति संमोहोऽविवेकः कार्याकार्यविषयः क्रुद्धो हि संमूढः सन् गुरुमप्याक्रोश
ति संमोहात् स्मृतिविभ्रमः शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्याद्विभ्रमो भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौ अनुत्प
त्तिः ततः स्मृतिभ्रंशात् बुद्धेर्नाशः कार्याकार्यविषयविषयविवेकायोग्यता अंतःकरणस्य बुद्धेर्नाश उच्यते बुद्धेर्नाशात् प्रणश्यति
पुरुषार्थायोग्यो भवतीत्यर्थः ६३ सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानमथेदानीं मोक्षकारणमिदमुच्यते रागेति रागद्वेषवियुक्तैः
रागश्च द्वेषश्च रागद्वेषौ तत्पुरःसरा हींद्रियाणां प्रवृत्तिः स्वाभाविकी तत्र यो मुमुक्षुर्भवति स ताभ्यां वियुक्तैः श्रोत्रादिभिरिंद्रियैर्विष
यानवर्जनीयांश्चरन्नुपलभमानः आत्मवश्यैः आत्मनो वश्यानि वशीकृतानि तैरात्मवश्यैर्विधेयात्मा इच्छातो विधेय आत्मा अंतःकरणं
यस्य सोऽयं प्रसादमधिगच्छति प्रसादः प्रसन्नता स्वास्थ्यं ६४ प्रसादे सति किं स्यादित्युच्यते प्रसाद इति प्रसादे सर्वदुःखानामाध्या

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोऽभिजायते। ६२ क्रोधाद्भवति संमोहः संमोहात्स्मृ
तिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३ रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसा
दमधिगच्छति ६४ प्रसादे सर्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५ नास्ति बुद्धिरयुक्तस्य न
चायुक्तस्य भावना न चाभावयतः शांतिरशांतस्य कुतः सुखं ६६ ॥ ॥

त्मिकादीनां हानिर्विनाशोऽस्य जायते उपजायते किंच प्रसन्नचेतसः स्वस्थांतःकरणस्य हि यस्मात् आशु शीघ्रं बुद्धिः पर्यवतिष्ठते
आकाशमिव परिसमंतादवतिष्ठते आत्मस्वरूप एव निश्चलीभवतीत्यर्थः एवं प्रसन्नचेतसोऽवस्थितबुद्धेः कृतकृत्यता यतस्तस्मा
द्रागद्वेषवियुक्तैरिंद्रियैः शास्त्राविरुद्धेष्ववर्जनीयेषु युक्तः समाचरेदिति वाक्यार्थः ६५ सेयं प्रसन्नता स्तूयते नास्तीति नास्ति
न विद्यते न भवतीत्यर्थः बुद्धिरात्मस्वरूपविषया अयुक्तस्यासमाहितस्य न चास्ति अयुक्तस्य भावना आत्मज्ञानाभिनिवेशः तथा
च नास्त्यभावयतः आत्मज्ञानाभिनिवेशमकुर्वतः शांतिरुपशमः अशांतस्य कुतः सुखं इंद्रियाणां हि विषयसेवातृष्णातो नि
वृत्तिर्यत्तत्सुखं न विषयविषया तृष्णा दुःखमेव हि सा न तृष्णायां सत्यां सुखस्य गंधमात्रमप्युपपद्यत इत्यर्थः ६६

 अयुक्तस्य कस्माद्बुद्धिर्नास्तीत्युच्यते इंद्रियाणामिति इंद्रियाणां हि यस्माच्चरतां स्वविषयेषु प्रवर्तमानानां यन्मनोनुविधीयते अनु
 प्रवर्तते तदिंद्रियविषयविकल्पनेन प्रवृत्तं मनः स्य यतेर्हरति प्रज्ञामात्मानात्मविवेकजां वायुर्नावमिवांभसि उदके जिगमिषतां मार्गादु
द्धृत्योन्मार्गे यथा वायुः प्रवर्तयत्येवमात्मविषयां प्रज्ञां हृत्वा मनो विषयविषयां करोति ६७ यततो ह्यपीत्युपन्यस्तस्यार्थस्यानेकधो
पपत्तिमुक्त्वा तं चार्थमुपपाद्योपसंहरति तस्मादिति इंद्रियाणां प्रवृत्तौ दोष उपपादितो यस्मात् तस्मादिति तस्माद्यस्य यते हि महा
बाहो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८ योयं लौकिको वैदिकश्च व्यवहारः स उत्पन्नविवेकज्ञान
स्य स्थितप्रज्ञस्याविद्याकार्यत्वादविद्यानिवृत्तौ निवर्तते अविद्यायाश्च विद्याविरोधान्निवृत्तिरित्येतमर्थं स्फुटीकुर्वन्नाह या निशेति
या निशा रात्रिः सर्वपदार्थानामविवेककरी तमःस्वभावत्वात् सर्वेषां भूतानां सर्वभूतानां किं तत् परमार्थतत्त्वं स्थितप्रज्ञस्य विषयो
यथा नक्तंचराणामहरेव सदन्येषां निशा भवति तद्वन्नक्तंचरस्थानीयानामज्ञानां सर्वभूतानां निशेव निशा परमार्थतत्त्वमगोचरत्वा
दतद्बुद्धीनां तस्यां परमार्थतत्त्वलक्षणायामज्ञाननिद्रायाः प्रबुद्धो जागर्ति संयमी संयमवान् जितेंद्रियो योगीत्यर्थः यस्यां ग्राह्य

इंद्रियाणां हि चरतां यन्मनोनुविधीयते तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ६७ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः
इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८ या निशा सर्वभूतानां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ६९

ग्राहकभेदलक्षणायामविद्यानिद्रायां प्रसुप्तान्येव भूतानि जाग्रतीत्युच्यते यस्यां निशायां प्रसुप्ता इव स्वप्नदृशः सा निशा अविद्या
रूपत्वात् परमार्थतत्त्वं पश्यतो मुनेः अतः कर्माण्यविद्यावस्थायामेव चोद्यंते न विद्यावस्थायां विद्यायां हि सत्यामुदिते सवितरि शार्वर
मिव तमः प्रणाशमुपगच्छति अविद्या प्राग्विद्योत्पत्तेरविद्या प्रमाणबुद्ध्या गृह्यमाणा क्रियाकारकफलभेदरूपा सती सर्वकर्महेतु
त्वं प्रतिपद्यते नाप्रमाणबुद्ध्या गृह्यमाणायाः कर्महेतुत्वोपपत्तिः प्रमाणभूतेन वेदेन मम चोदितं कर्तव्यं कर्मेति हि कर्मणि कर्ता प्रव
र्तते नाविद्यामात्रमिदं सर्वं निशेवेति यस्य पुनर्निशेवाविद्यामात्रमिदं सर्वं भेदजातमिति ज्ञानं तस्यात्मज्ञस्य सर्वकर्मसंन्यास हेत्व
एवाधिकारो न प्रवृत्तौ तथा च दर्शयिष्यति तद्बुद्धयस्तदात्मान इत्यादिना ज्ञाननिष्ठायामेवाधिकारं तत्रापि प्रवर्तकप्रमाणाभावे प्र
वृत्त्यनुपपत्तिरिति चेन्न स्वात्मविषयत्वादात्मज्ञानस्य न ह्यात्मनः स्वात्मनि प्रवर्तकप्रमाणापेक्षा आत्मत्वादेव तदंतत्वाच्च सर्वप्रमाणा १०
नां प्रमाणत्वस्य न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति प्रमातृत्वं ह्यात्मनो निवर्तयत्यंत्यं प्रमाणं निवर्तयदे
व चाप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे लोके च वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य तस्मान्नात्मविदः कर्मण्यधिकार

21/1943

विदुषः स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिर्न त्वसंन्यासिनः कामकामिन इत्येतमर्थं दृष्टांतेन प्रतिपादयिष्यन्नाह आ
पूर्यमाणमिति आपूर्यमाणमद्भिरचलप्रतिष्ठमचलतया प्रतिष्ठावस्थितिर्यस्य तमचलप्रतिष्ठं समुद्रमापः सर्वतो गताः प्रविशंति स्वात्मस्थ
मविक्रियमेव संतं यद्वत्तद्वत्कामा विषयसंनिधावपि सर्वत इच्छाविशेषा यं समुद्रमिवापो विकुर्वंतः प्रविशंति स्वात्मस्थमविक्रियमे
व संतं आत्मन्येव प्रलीयंते न स्वात्मवशं कुर्वंति स शांतिं मोक्षं प्राप्नोति नेतरः कामकामी काम्यंत इति कामा विषयास्तान् कामयितुं शीलं
यस्य स कामकामी नैव प्राप्नोतीत्यर्थः ७० यस्मादेवं तस्मात् विहायेति विहाय परित्यज्य कामान् यः संन्यासी पुमान् सर्वानशेषां
श्चरति जीवनमात्रचेष्टाशेषः पर्यटतीत्यर्थः निःस्पृहः शरीरजीवनमात्रेपि निर्गता स्पृहा यस्य स निःस्पृहः सन् इत्यभिप्रायः
निर्ममः शरीरजीवनमात्राक्षिप्तपरिग्रहेपि ममेदमित्यभिनिवेशवर्जितो निरहंकारो विद्यावत्त्वादिनिमित्तात्मसंभावनारहित इत्ये
तत् स एवंभूतः स्थितप्रज्ञो ब्रह्मवित् शांतिं सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्यामधिगच्छति प्राप्नोति ब्रह्मभूतो भवतीत्य
र्थः ७१ सैषा ज्ञाननिष्ठा स्तूयते एषेति इत्येषा यथोक्ता ब्राह्मी ब्रह्मणि भवेयं स्थितिः सर्वकर्म संन्यस्य ब्रह्मस्वरूपेणैवावस्थानमि

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ७०
विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः निर्ममो निरहंकारः स शांतिमधिगच्छति ७१ एषा ब्राह्मी स्थितिः पार्थ
नैनां प्राप्य विमुह्यति स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति ७२ ॐ तत्सदिति श्री० द्वितीयोध्यायः ॥२

त्यर्थः नैनां स्थितिं प्राप्य लब्ध्वा विमुह्यति न मोहं प्राप्नोति स्थित्वास्यां स्थितौ ब्राह्म्यां यथोक्तायामंतकालेपि अंत्येपि वयस्यपि ब्रह्मनिर्वा
णं ब्रह्मणि निर्वृतिं मोक्षमृच्छति गच्छति किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येवावतिष्ठते स ब्रह्मनिर्वाणमृच्छतीति ७२
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरभगवतः कृतौ गीताभाष्ये सांख्ययोगो नाम द्वितीयोध्यायः ॥ २ ॥
शास्त्रस्य प्रवृत्तिनिवृत्तिविषयभूते द्वे बुद्धी भगवता निर्दिष्टे सांख्ये बुद्धिर्योगे बुद्धिरिति च तत्र प्रजहाति यदा कामानित्यारभ्या
ध्यायपरिसमाप्तेः सांख्यबुद्ध्याश्रितानां संन्यासं कर्तव्यमुक्त्वा तेषां तन्निष्ठतयैव च कृतार्थतोक्ता एषा ब्राह्मी स्थितिरिति अर्जुनाय च कर्मण्ये
वाधिकारस्ते मा ते संगोस्त्वकर्मणीति कर्मैव कर्तव्यमुक्तवान् योगबुद्धिमाश्रित्य न तत एव श्रेयःप्राप्तिमुक्तवान् तदेतदालक्ष्य पर्याकुली
भूतबुद्धिरर्जुन उवाच कथं भक्ताय श्रेयोर्थिने यत्साक्षाच्छ्रेयःसाधनं सांख्यबुद्धिनिष्ठां श्रावयित्वा मां कर्मणि दृष्टानेकान
र्थयुक्ते पारंपर्येणाप्यनैकांतिकश्रेयःप्राप्तिफले नियुंज्यादिति युक्तः पर्याकुलीभावोर्जुनस्य तदनुरूपश्च प्रश्नो ज्यायसी चेदित्यादिः
प्रश्नापाकरणवाक्यं च भगवतो युक्तं यथोक्तविभागविषये शास्त्रे केचित्तु अर्जुनस्य प्रश्नार्थमन्यथा कल्पयित्वा तत्प्रतिकूलं भगवतः प्र

तिवचनं वर्णयंति यथा चात्मनासंबंधग्रंथे गीतार्थो निरूपितस्तस्मातिकूलं चेह पुनः प्रश्नप्रतिवचनेनार्थं निरूपयंति कथं तत्रसं
बंधग्रंथे तावत्सर्वेषामाश्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोर्थ इत्युक्तं पुनर्विशेषितं यावज्जीवंश्रुतिचोदितानि क
र्माणि परित्यज्य केवलादेव ज्ञानान्मोक्षः प्राप्यत इत्येतदेकांतेनैव प्रतिषिद्धमिति हत्वाश्रमविकल्पं दर्शयता यावज्जीवंश्रुतिचोदिता
नि नामेव कर्मणां परित्याग उक्तस्तत्कथमिदं विरुद्धमर्थमर्जुनाय ब्रूयात् भगवान् श्रोता वा कथं विरुद्धमर्थमवधारयेत् तत्रैतत्स्या
त् गृहस्थानामेव श्रौतकर्मपरित्यागेन केवलादेव ज्ञानान्मोक्षः प्रतिषिध्यते न त्वाश्रमांतराणामित्येतदपि पूर्वोत्तरविरुद्धमेव कथं सर्वा
श्रमाणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोर्थ इति प्रतिज्ञाय इह कथं तद्विरुद्धं केवलादेव ज्ञानान्मोक्षं ब्रूयादाश्रमांतराणा
मथ मतं श्रौतकर्मापेक्षयैतद्वचनं केवलादेव ज्ञानाच्छ्रौतकर्मरहितात् गृहस्थानां मोक्षः प्रतिषिध्यते इति तत्र गृहस्थानां विद्यमानम
पि स्मार्तकर्म विद्यमानवदुपेक्ष्य ज्ञानादेव केवलादित्युच्यत इत्येतदपि विरुद्धं कथं गृहस्थस्यैव स्मार्तकर्मणा समुच्चिताज्ज्ञानान्मोक्षः
प्रतिषिध्यते नत्वाश्रमांतराणामिति कथं विवेकिभिः शक्यमेवमवधारयितुं किंच यदि मोक्षसाधनत्वेन स्मार्तानि कर्माणि ऊर्ध्वरेतसां स
मुच्चीयंते तदा गृहस्थस्यापि इष्यतां स्मार्तैरेव समुच्चयो न श्रौतैरथ श्रौतैः स्मार्तैश्च गृहस्थस्यैव समुच्चयो मोक्षायोर्ध्वरेतसां तु स्मा
र्तकर्ममात्रसमुच्चिताज्ज्ञानान्मोक्ष इति तत्रैवं सति गृहस्थस्यायासबाहुल्यं श्रौतं स्मार्तं च बहुदुःखरूपं कर्म शिरस्यारोपितं स्या
त् अथ गृहस्थस्यैवायासबाहुल्यकारणान्मोक्षः स्यान्नाश्रमांतराणां श्रौतनित्यकर्मरहितत्वादिति तदप्यसत् सर्वोपनिषत्सु इति
हासपुराणयोगशास्त्रेषु च ज्ञानांगत्वेन मुमुक्षोः सर्वकर्मसन्यासविधानादाश्रमविकल्पसमुच्चयविधानाच्च श्रुतिस्मृत्योः सिद्ध
स्तर्हि सर्वाश्रमाणां ज्ञानकर्मणोः समुच्चयो न मुमुक्षोः सर्वकर्मसन्यासविधानादाश्रमविकल्पसमुच्चयविधानाच्च श्रुत्वा यथाभि
ष्टाचर्यं चरंति तस्मात्सन्यासमेषां तपसामतिरिक्तमाहुः न्यास इति ब्रह्मा न्यास एवात्यरेचयदिति न कर्मणा न प्रजया धनेन त्यागेनैके
अमृतत्वमानशुः ब्रह्मचर्यादेव प्रव्रजेदित्याद्याः त्यज धर्ममधर्मं च उभे सत्यानृते त्यज उभे सत्यानृते त्यक्त्वा येन त्यजसि त
त्यज संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिता इति बृहस्पतिः कर्मणा बध्यते जंतुर्विद्य
या च विमुच्यते तस्मात्कर्म न कुर्वंति यतयः पारदर्शिन इति शुकानुशासनं इहापि च सर्वकर्माणि मनसा सन्यस्येत्यादि मोक्षस्य
चाकार्यत्वात् मुमुक्षोः कर्मानर्थक्यं नित्यानि प्रत्यवायपरिहारार्थानीति चेत् नासन्यासीविषयत्वात् प्रत्यवायप्राप्तेर्नह्यग्निका
र्याद्यकरणात् सन्यासिनः प्रत्यवायः कल्पयितुं शक्यो यथा ब्रह्मचारिणामसन्यासिनामपि कर्मिणां न तावन्नित्यानामकरणा
त् अभावाद्भावरूपस्य प्रत्यवायस्योत्पत्तिः कल्पयितुं शक्या युक्ता च कथमसतः सज्जायेतेति असतः सज्जन्मासंभवश्रुतेः

हेरंब
२१

२३
1943

यदि विहिताकरणादसंभाव्यमपि प्रत्यवायं ब्रूयाद्वेदस्तदानर्थकरो वेदोऽप्रमाणमित्युक्तं स्यात् विहितस्य करणाकरणयोर्दुःख
मात्रफलत्वात् यथा च कारकं शास्त्रं न ज्ञापकमित्यनुपपन्नार्थं कल्पितं स्यात् न चैतदिष्टं तस्मात्सन्यासिनां न कर्माणि अतो ज्ञान
कर्मणोः समुच्चयानुपपत्तिः ज्यायसी चेदित्यर्जुनस्य प्रश्नानुपपत्तेश्च यदि हि भगवता द्वितीयेध्याये ज्ञानं कर्म च त्वया एकेनानुष्ठे
यमिति उक्तं स्यात्ततोर्जुनस्य प्रश्नो नुपपन्नो ज्यायसी चेत्कर्मणस्ते मता बुद्धिरिति अर्जुनाय चेत् बुद्धिकर्मणी त्वयानुष्ठेये इत्युक्ते
या कर्मणो ज्यायसी बुद्धिः साप्युक्तैवेति तत्किं कर्मणि घोरे मां नियोजयसीति प्रश्नो न कथंचनोपपद्यते न चार्जुनस्यैव ज्याय
सी बुद्धिर्नानुष्ठेयेति भगवतोक्तं पूर्वमिति कल्पयितुं युक्तं येन ज्यायसी चेदिति प्रश्नः स्यात् यदि पुनरेकस्य पुरुषस्य ज्ञानकर्म
णोर्विरोधाद्युगपदनुष्ठानं न संभवतीति भिन्नपुरुषानुष्ठेयत्वं भगवतः प्रतिवचनं नोपपद्यते न तेनोक्तो वाननिमित्तं भगवत्प्रतिव
चनं कल्प्यं अस्माच्च भिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्मनिष्ठयोर्भगवतः प्रतिवचनदर्शनात् ज्ञानकर्मणोः समुच्चयानुपपत्तिः

अर्जुन उवाच ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन तत्किं कर्मणि घोरे मां नियोजयसि केशव १

केवलादेव ज्ञानान्मोक्ष इत्येषोर्थो निश्चितो गीतासु सर्वोपनिषत्सु च ज्ञानकर्मणोरेकं वद निश्चित्येति चैकविषयैव प्रार्थनानुपप
न्नोभयोः संभवे कुरु कर्मैव तस्मात्त्वमिति च ज्ञाननिष्ठासंभवमर्जुनस्यावधारणेन दर्शयिष्यति ज्यायसी चेदिति ज्यायसी श्रेय
सी चेद्यदि कर्मणः सकाशात्ते तव मता अभिप्रेता बुद्धिर्ज्ञानं हे जनार्दन यदि बुद्धिकर्मणी समुच्चिते इष्टे तदेकं श्रेयःसाधनमिति
कर्मणो ज्यायसी बुद्धिरिति च कर्मणोतिरिक्तकरणं बुद्धेरनुपपन्नमर्जुनेन कृतं स्यान्नहि तदेव तस्मात्फलतोतिरिक्तं स्यात्तथा
कर्मणः श्रेयस्करी भगवतोक्ता बुद्धिरश्रेयस्करं च कर्म कुर्विति मां प्रतिपादयति तत्किं नु कारणमिति भगवत उपालंभमि
व कुर्वंस्तत्किं कस्मात्कर्मणि घोरे क्रूरे हिंसालक्षणे मां नियोजयसि केशवेति च यदाह तच्च नोपपद्यते १ ॥

अथ स्मार्तेनैव कर्मणा समुच्चयः सर्वेषां भगवतोक्तोर्जुनेन चावधारितश्चेत्तत्किं कर्मणि घोरे मां नियोजयसीत्यादि कथं युक्तं वच
नं किंच व्यामिश्रेणेति व्यामिश्रेणेव यद्यपि विविक्ताभिधायी भगवांस्तथापि मम मंदबुद्धेर्व्यामिश्रमिव भगवद्वाक्यं प्रतिभाति
तेन मम बुद्धिं मोहयसीव मम बुद्धिव्यामोहापनयाय हि प्रवृत्तस्त्वं कथं मोहयस्यतो ब्रवीमि बुद्धिं मोहयसीवेति यदुक्तं तत्र भिन्न
कर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासंभवं यदि मन्यसे तत्रैवं सति तत्तयोरेकं बुद्धिकर्मवाद् इदमेवार्जुनस्य योग्यं बुद्धिश
क्त्यवस्थानुरूपमिति निश्चित्य वद येन ज्ञानेन कर्मणा वान्यतरेण श्रेयोहमाप्नुयां प्राप्नुयां यदि हि कर्मनिष्ठायां गुणभूतमपि
ज्ञानं भगवतोक्तं स्यात्कथं तयोरेकं वदेत्येकविषयैवार्जुनस्य शुश्रूषा स्यान्न हि भगवतोक्तमन्यतरदेव ज्ञानकर्मणोर्वक्ष्यामि
नैव द्वयमिति येनोभयप्राप्त्यसंभवमात्मनो मन्यमान एकमेव प्रार्थयेत् २ प्रश्नानुरूपमेव प्रतिवचनं श्रीभगवानुवाच लो
केस्मिन्निति लोकेस्मिन् शास्त्रानुष्ठानाधिकृतानां त्रैवर्णिकानां द्विविधा द्विप्रकारा निष्ठा स्थितिरनुष्ठेयतात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः
सृष्ट्वा तासामभ्युदयनिःश्रेयसप्राप्तिसाधनं वेदार्थसंप्रदायं कुर्वता प्रोक्ता मया सर्वज्ञेनेश्वरेणानघ अपाप तत्र कासा द्विविधा

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयां २ श्रीभगवानुवाच लोके
स्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां ३ ॥

निष्ठेत्याह तत्र ज्ञानयोगेन ज्ञानमेव योगः तेन ज्ञानयोगेन सांख्यानामात्मानात्मविषयविवेकविज्ञानवतां ब्रह्मचर्याश्रमा
देव कृतसन्यासानां वेदांतविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्मण्येवावस्थितानां निष्ठा प्रोक्ता कर्मयोगेन कर्मैव
योगः कर्मयोगस्तेन कर्मयोगेन योगिनां कर्मिणां निष्ठा प्रोक्तेत्यर्थः यदि चैकेन पुरुषेणैकस्मै पुरुषार्थाय ज्ञानं कर्म च समुच्चि
त्यानुष्ठेयं भगवतेष्टमुक्तं वक्ष्यमाणं वा गीतासु वेदेषु चोक्तं कथमिहार्जुनायोपसन्नाय प्रियाय विशिष्टभिन्नपुरुषकर्तृके ए
व ज्ञानकर्मनिष्ठे ब्रूयाद्यदि पुनरर्जुनो ज्ञानं कर्म च द्वयं श्रुत्वा स्वयमेवानुष्ठास्यत्यन्येषां तु भिन्नपुरुषानुष्ठेये तां वक्ष्यामीति मते
भगवतः कल्प्येत तदा रागद्वेषवानप्रमाणभूतो भगवान् कल्पितः स्यात् तच्चायुक्तं तस्मात्कयापि युक्त्या समुच्चयो ज्ञान
कर्मणोर्यदर्जुनेनोक्तं कर्मणो ज्यायस्त्वं बुद्धेस्तच्च स्थितमनिराकरणात् तस्याश्च सन्न्यासिनैवानुष्ठेयत्वं भिन्नपुरुषा
नुष्ठेयत्ववचनात् भगवत एवमेवानुमतमिति गम्यते मां च बंधकारणे कर्मण्येव नियोजयसीति विषण्णमनसमर्जुनं कर्म ना

हेरंब
१२

25/1943

रंभद्वेषं मन्वानमालक्ष्याह भगवान् न कर्मणामनारंभादिति अथवा ज्ञानकर्मनिष्ठयोः परस्परविरोधादेकेन पुरुषेण
युगपदनुष्ठातुमशक्यत्वे सतीतरेतरानपेक्षयोरेकपुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठाया ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थहेतु
त्वं न स्वातंत्र्येण ज्ञाननिष्ठा तु कर्मनिष्ठोपायलब्धात्मिका सती स्वातंत्र्येणैव पुरुषार्थहेतुरन्यानपेक्षेत्येनमर्थं प्रदर्शयन्नाह भग
वान् ३ न कर्मणामिति न कर्मणामनारंभात्कर्मणां क्रियाणां यज्ञादीनामिह जन्मनि जन्मांतरे वानुष्ठितानामुपात्तदुरितक्षयहे
तुत्वेन सत्वशुद्धिकारणानां तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारेण ज्ञाननिष्ठाहेतूनां ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः यथा
दर्शतलप्रख्ये पश्यत्यात्मानमात्मनीत्यादिस्मरणादनारंभादननुष्ठानान्नैष्कर्म्यं निष्कर्मभावं कर्मशून्यतां ज्ञानयोगेन निष्ठां
निष्क्रियात्मस्वरूपेणैवावस्थानमिति यावन्नाश्नुते न प्राप्नोतीत्यर्थः कर्मणामनारंभान्नैष्कर्म्यं नाश्नुत इत्युच्यते कर्मारंभस्य नै
ष्कर्म्योपायत्वात् नह्युपायमंतरेणोपेयप्राप्तिरस्ति कर्मयोगोपायत्वं च नैष्कर्म्यलक्षणस्य ज्ञानयोगस्य श्रुताविह च प्रतिपादनात्
श्रुतौ तावत्प्रकृतस्यात्मलोकस्य वेद्यस्य वेदनोपायत्वेन तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेनेत्यादिना कर्मयोगस्य ज्ञा

न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुते न च सन्न्यसनादेव सिद्धिं समधिगच्छति ४ न हि कश्चित्क्षणमपि जातु तिष्ठत्य
कर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ५ ॥ ॥

नयोगोपायत्वं प्रतिपादितमिहापि च सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये य
ज्ञो दानं तपश्चैव पावनानि मनीषिणामित्यादि प्रतिपादयिष्यति ननु चाभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेदित्यादौ कर्तव्यक
र्मसन्न्यासादपि नैष्कर्म्यप्राप्तिं दर्शयति लोके च कर्मणामनारंभान्नैष्कर्म्यमिति प्रसिद्धतरमतश्च नैष्कर्म्यार्थिनः किं कर्मारंभे
णेति प्राप्तमत आह न च सन्न्यसनादेवेति नापि सन्न्यसनादेव केवलात्कर्मपरित्यागमात्रादेव ज्ञानरहितात् सिद्धिं नैष्कर्म्यल
क्षणां पुरुषो नाधिगच्छंतीति हेत्वाकांक्षायामाह नहीति न हि यस्मात्क्षणमपि कालं जातु कदाचित्कश्चित्तिष्ठत्यकर्म
कृत्सन् कस्मात् कार्यते हि यस्मादवश एव कर्म सर्वः प्राणी प्रकृतिजैः प्रकृतितो जातैः सत्त्वरजस्तमोभिर्गुणैः अज्ञ इति वा
क्यशेषः यतो वक्ष्यति गुणैर्यो न विचाल्यत इति सांख्यानां पृथक्करणात् अज्ञानामेव हि कर्मयोगो न ज्ञानिनां ज्ञानिनां तु गु
णैरचाल्यमानानां स्वतश्चलनाभावात्कर्मयोगो नोपपद्यते तथा च व्याख्यातं वेदाविनाशिनमित्यत्र ५ ॥

यस्त्वनात्मज्ञश्चोदितं कर्म नारभत इति सोऽयं दुष्टः (?) इत्याह कर्मेंद्रियाणीति कर्मेंद्रियाणि हस्तादीनि संयम्य संहृत्य य आस्ते तिष्ठति म
नसा स्मरन् चिंतयन् इंद्रियार्थान् विषयान् विमूढात्मा विमूढांतःकरणो मिथ्याचारो मृषाचारः पापाचारः स उच्यते ६ यस्त्विति
यस्तु पुनः कर्मण्यधिकृतो ज्ञो बुद्धींद्रियाणि मनसा नियम्यारभते कर्म कर्मेंद्रियैर्वाक्पाण्यादिभिः किमारभत इत्याह कर्मयोगमसक्तः
सन् स विशिष्यत इतरस्मान्मिथ्याचारात् ७ यत एवमतो नियतमिति नियतं नित्यं शास्त्रोपदिष्टं यो यस्मिन् कर्मण्यधिकृतः फलाय चा
श्रुतं तं नियतं कर्म कुरु त्वं हे अर्जुन यतः कर्म ज्यायोऽधिकतरं फलतो हि यस्मात् तेन कर्मणोऽकरणादनारंभात् कथं शरीरया
त्रापि शरीरस्थितिरपि च ते तव न प्रसिध्येत् न सिद्धिं गच्छेदकर्मणोऽकरणादतो दृष्टः कर्माकर्मणोर्विशेषो लोके यच्च मन्यसे बंध
कत्वात् कर्म न कर्तव्यमिति तदप्यसत् ८ कथं यज्ञार्थादिति यज्ञो वै विष्णुरिति श्रुतेर्यज्ञ ईश्वरस्तदर्थं यत् क्रियते तद्यज्ञार्थं कर्म तस्मात्कर्मणो
ऽन्यत्रान्येन कर्मणा लोकोऽयमधिकृतः सन् कर्मकृत् कर्मबंधनः कर्म बंधनं यस्य स कर्मबंधनो लोको न तु यज्ञार्थादतस्तदर्थं यज्ञार्थं

कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ६ यस्त्विंद्रियाणि मनसा नियम्या
रभतेऽर्जुन कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ७ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः शरीरयात्रापि च ते न प्रसि
ध्येदकर्मणः ८ यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः तदर्थं कर्म कौंतेय मुक्तसंगः समाचर सहयज्ञाः प्रजाः सृष्ट्वा पुरोवा
च प्रजापतिः अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् १० देवान्भावयतानेन ते देवा भावयंतु वः परस्परं भावयंतः श्रेयः पर
मवाप्स्यथ ११ इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः १२

कर्म कौंतेय मुक्तसंगः कर्मफलासंगवर्जितः सन् समाचर निर्वर्तय ९ इतश्चाधिकृतेन कर्म कर्तव्यं सहयज्ञा इति सहयज्ञाः यज्ञ
सहिताः प्रजास्त्रयो वर्णास्ताः सृष्ट्वोत्पाद्य पुरा पूर्वं सर्गादावुवाच उक्तवान् प्रजापतिः प्रजानां स्रष्टा अनेन यज्ञेन प्रसविष्यध्वं प्रसवो
वृद्धिरुत्पत्तिस्तां कुरुध्वं एष यज्ञो वो युष्माकं अस्तु भवतु इष्टकामधुक् इष्टानभिप्रेतान् कामान् फलविशेषान् दोग्धीतीष्टका
मधुक् १० कथमेवं देवानामिति देवानिंद्रादीन् भावयत वर्धयत अनेन यज्ञेन ते देवा वो युष्मान् भावयंतु वृष्ट्यादिना भावयंत आप्याययंतु पर
स्परं अन्योन्यं भावयंतः आप्याययंतः श्रेयः परं ब्रह्म ज्ञानप्राप्तिक्रमेणावाप्स्यथ स्वर्गं वा परं श्रेयो वावाप्स्यथ ११ किंच इष्टानिति इष्टा
नभिप्रेतान् भोगान् हि वो युष्मभ्यं देवा दास्यंते वितरिष्यंति स्त्रीपशुपुत्रादीन् यज्ञभाविता यज्ञैर्वर्धितास्तोषिता इत्यर्थः तैर्दे
वैर्दत्तान् भोगानप्रदायादत्त्वाऽनृण्यमकृत्वेत्यर्थः एभ्यो देवेभ्यो यो भुंक्ते स्वदेहेंद्रियाण्येव तर्पयति स्तेन एव तस्कर एव स देवादिस्वा

हेरंब
१३

27
1943

ये पुनः यज्ञशिष्टेति देवयज्ञादीन्निर्वर्त्य तच्छिष्टममृताख्यममशितुं शीलं येषां ते यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः स
र्वैः पापैः चुल्ल्यादिपंचसूनाकृतैः प्रमादकृतहिंसादिजनितैश्चान्ये ये त्वात्मंभरयः भुंजते ते त्वघं पापं स्वयमपि पापा ये पचंति पाकं नि
र्वर्तयंति आत्मकारणादात्महेतोः इतश्चाधिकृतेन कर्म कर्तव्यं १३ जगच्चक्रप्रवृत्तिहेतुर्हि कर्म कथमित्युच्यते अन्नादिति अ
न्नाद्भुक्ताल्लोहितरेतःपरिणतात् प्रत्यक्षं भवंति जायंते भूतानि पर्जन्यात् वृष्टेरन्नस्य संभवोऽन्नसंभवः यज्ञाद्भवति पर्जन्यः अ
ग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति यज्ञोऽपूर्वं स च कर्मसमुद्भवः ऋत्विग्य
जमानयोश्च व्यापारः कर्म ततः समुद्भवो यस्य यज्ञस्यापूर्वस्य स यज्ञः कर्मसमुद्भवः १४ तच्च कर्म ब्रह्मणोद्भवमिति कर्म ब्रह्मोद्भ
वं ब्रह्म वेदः स उद्भवो यस्य तत्कर्म ब्रह्मोद्भवं विद्धि जानीहि ब्रह्म पुनर्वेदाख्यमक्षरसमुद्भवं अक्षरं परमात्मा तत् समुद्भवो यस्य
तदक्षरसमुद्भवं ब्रह्म वेदः यस्मात् साक्षात्परमात्माख्यादक्षरात् पुरुषनिश्वासवत् समुद्भूतं ब्रह्म तस्मात् सर्वार्थप्रकाशकत्वात्

यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् १३ अन्नाद्भवंति भूतानि पर्जन्याद
न्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः १४ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं
यज्ञे प्रतिष्ठितं एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः अघायुरिंद्रियारामो मोघं पार्थ स जीवति १६ यस्त्वात्मरतिरेव
स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १७ ॥

सर्वगतमपि सन्नित्यं सदा यज्ञविधिप्रधानत्वात् यज्ञे प्रतिष्ठितं १५ एवमिति एवमीश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्ति
तं नानुवर्तयतीह लोके यः कर्मण्यधिकृतः सन्नघायुः अघं पापं यस्यायुः जीवनं सोऽघायुः पापजीवन इत्येतत् इंद्रियाराम इं
द्रियैरारमणमाक्रीडा विषयेषु यस्य स इंद्रियारामो मोघं वृथा हे पार्थ स जीवति तस्मादज्ञेनाधिकृतेन कर्तव्यमेव कर्मेति प्रकर
णार्थः १६ प्रागात्मज्ञाननिष्ठायोग्यताप्राप्तेस्तादर्थ्येन कर्मयोगानुष्ठानमधिकृतेनानात्मज्ञेन कर्तव्यमित्येतत् न कर्मणामनारंभा
दित्यत आरभ्य शरीरयात्रापि च ते न प्रसिध्येदकर्मण इत्येवमंतेन प्रतिपाद्य यज्ञार्थात् कर्मणोऽन्यत्रेत्यादिना मोघं पार्थ स जीवती
त्येवमंतेनापि ग्रंथेन प्रासंगिकमधिकृतस्यानात्मविदः कर्मानुष्ठाने बहुकारणमुक्तं तदकरणे च दोषसंकीर्तनं कृतमेवं स्थिते कि
मेवं प्रवर्तितं चक्रं सर्वेणानुवर्तनीयमाहोस्वित् पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्यामात्मविदां ज्ञानयोगेनैव निष्ठामात्मविद्भिः

गीताभा० सांख्यैरेवानुष्ठेयामधासेनैवेत्येवमर्थमर्जुनस्य भ्रममात्राक्यस्यमेवत्रास्त्यार्थस्यविवेकप्रतिपत्त्यर्थं एवं वेनमात्मानं विदित्वा निवृ
त्तमिथ्याज्ञानाः संतो ब्राह्मणाः मिथ्याज्ञानवद्भिरवश्यकर्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायभिक्षाचर्यंशरीरस्थितिमात्रप्रयुक्तंचरंतिनतेषा
१४ मात्मज्ञाननिष्ठाव्यतिरेकेणान्यत्कार्यमस्तीत्येवं श्रुत्यर्थमिह गीताशास्त्रेप्रतिपिपादयिषितमाविष्कुर्वन्नाह भगवान् यस्त्विति य
स्तुसांख्य आत्मज्ञाननिष्ठ आत्मरति आत्मन्येवरतिर्नविषयेषु यस्य स आत्मरतिरेवस्यादुवत् आत्मतृप्त आत्मनैवतृप्तोनान्नरसादि
नामनवानवोमनुष्यः सन्यासी आत्मन्येवच संतुष्टः संतोषोहिवाह्यार्थलाभेसर्वस्यभवतितमनपेक्ष्यात्मन्येवच संतुष्टः सर्वतोवीत
तृष्णइत्येतत् य ईदृशआत्मवित्तस्य कार्यंकरणीयंनविद्यतेनास्तीत्यर्थः १७ किंच नैवेति नैवतस्यपरमात्मरतेः कृतेनकर्मणार्थः प्रयो
जनमस्तितर्ह्यकृते नप्रत्यवायाख्योऽनर्थोनाकृतेनेह लोके कश्चन कश्चिदपि प्रत्यवायप्राप्तिरूप आत्महानिलक्षणोनैवास्ति नचा
स्यसर्वभूतेषु ब्रह्मादिस्थावरांतेषुकश्चिदर्थव्यपाश्रयः प्रयोजननिमित्तः क्रियासाध्योव्यपाश्रयोव्यपाश्रयणं किंचित् भूतविशेषमा

नैवतस्यकृतेनार्थोनाकृतेनेह कश्चन नचास्यसर्वभूतेषु कश्चिदर्थव्यपाश्रयः १८ तस्मादसक्तः सततं कार्यंकर्मसमाचर
असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः १९ कर्मणैवहिसंसिद्धिमास्थिताजनकादयः लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसि २०

श्रित्यनसाध्यः कश्चिदर्थोस्ति येनतदर्था क्रियानुष्ठेयास्यात् नतुत्वमेवं तस्मिन्सर्वतः संप्लुतोदकस्थानीयेसम्यग्दर्शनेवर्तसे
१८ यतएवं तस्मादिति तस्मादसक्तः संगवर्जितः सततंसर्वदाकार्यंकर्तव्यं नित्यंकर्मसमाचर निर्वर्तयअसक्तोहियस्मात्स
माचरन्नीश्वरार्थंकर्मकुर्वन्परमाप्नोतिपुरुषः परं मोक्षमाप्नोतिपुरुषः सत्वशुध्दिद्वारेणेत्यर्थः १९ यस्माच्च कर्मणैवहीति
कर्मणैवहिपूर्वेक्षत्रियाविद्वांसः संसिद्धिंमोक्षंगंतुमास्थिताः प्रवृत्ताः केजनकादयोजनकाश्वपतिप्रभृतयोयदितेप्राप्तसम्यक् हेरंब
दर्शिनास्ततोलोकसंग्रहार्थंप्रारब्धकर्मत्वात्कर्मणासहैवासंन्यस्यैवकर्मसंसिद्धिमास्थिताइत्यर्थः अथाप्राप्तसम्यग्दर्शि
नाः जनकादयस्तदाकर्मणासत्वशुध्दिसाधनभूतेनक्रमेणसंसिद्धिमास्थिताः ये।। इतिव्याख्येयश्लोकः अथमन्यसेपूर्वै १४
रप्यज्ञानवद्भिरेवकर्तव्यंकृतंतावतानावश्यमन्येन कर्तव्यंसम्यग्दर्शनवता कृतार्थेनेति तथापिप्रारब्धकर्मायत्तस्त्वंलोक
संग्रहमेवापिलोकस्योन्मार्गप्रवृत्तिनिवारणंलोकसंग्रहस्तमेवापिप्रयोजनंसंपश्यन्कर्तुमर्हसि २० ।।

29
1943

लोकसंग्रहः किमर्थंकर्तव्यइत्युच्यते यद्यदिति यत्यत्कर्माचरतियेषुयेषुश्रेष्ठः प्रधानभूतस्तत्तदेवकर्माचरतीतरोन्यो
जनस्तदनुगतः किंचसश्रेष्ठो यत्प्रमाणंकुरुतेलौकिकंवैदिकंवालोकस्तदनुवर्ततेतदेवप्रमाणीकरोतीत्यर्थः २१ यद्यत्रतेलो
कसंग्रहकर्तव्यतायांविप्रतिपत्तिस्तर्हिमांकिंनपश्यसि नमेतिनमेममपार्थनास्तिनविद्यतेकर्तव्यं त्रिष्वपिलोकेषुकिंचनकिं
चिदपि कस्मान्नानवाप्तं अप्राप्तंअवाप्तव्यंप्रापणीयं तथापिवर्तएवकर्मण्यहं २२ यदीति यदिपुनरहंनवर्तेयं जातुकदा
चित् कर्मण्यतंद्रितोनलसः सन्ममश्रेष्ठस्यसतोवर्त्ममार्गमनुवर्ततेमनुष्याः हेपार्थसर्वशः सर्वप्रकारैः २३ तथाचकोदोष
इत्याह उत्सीदेयुरिति उत्सीदेयुर्विनश्येयुरिमेसर्वेलोकाः लोकस्थितिनिमित्तस्यकर्मणोभावान्नकुर्यांकर्मचेदहं किंचसंक
रस्यचकर्तास्यांतेनकारणेनोपहन्यामिमाःप्रजाः प्रजानामनुग्रहायप्रवृत्तउपहतिमुपहननंकुर्यामितिममेश्वरस्याननुरूपमा
पद्येत २४ यदिपुनरहमिवत्वंकृतार्थबुद्धिरात्मविदन्योवातस्याप्यात्मनः कर्तव्याभावेपिपरानुग्रहएवकर्तव्यइति सक्ताइति

यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते २१ नमेपार्थास्तिकर्तव्यंत्रिषुलोकेषुकिंचन
नानवाप्तमवाप्तव्यंवर्तएवचकर्मणि। २२ यदिह्यहंनवर्तेयंजातुकर्मण्यतंद्रितः ममवर्त्मानुवर्ततेमनुष्याःपार्थसर्वशः २३
उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहं संकरस्यचकर्तास्यामुपहन्यामिमाः प्रजाः २४ सक्ताः कर्मण्यविद्वांसोयथाकुर्व
तिभारतकुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं २५ नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां जोषयेत्सर्वकर्माणि
विद्वान्युक्तः समाचरन् २६ प्रकृतेः क्रियमाणानिगुणैः कर्माणिसर्वशः अहंकारविमूढात्माकर्ताहमितिमन्यते २७

सक्ताः कर्मण्यस्यफलममभविष्यतीतिकेअविद्वांसोयथाकुर्वंतिभारतकुर्याद्विद्वानात्मवित्तथाअसक्तः सन्तद्वत् किमर्थंक
रोतीतितच्छृणुचिकीर्षुः कर्तुमिच्छुर्लोकसंग्रहं २५ एवंलोकसंग्रहंचिकीर्षोर्नममात्मविदः कर्तव्यमस्त्यन्यस्यवालोकसंग्रह
मुक्त्वा तस्यात्मविदइदमुपदिश्यतेनबुद्धिभेदमिति बुद्धेर्भेदोबुद्धिभेदः मयेदंकर्तव्यंकर्मभोक्तव्यंचास्यकर्मणः फलमिति
निश्चितरूपायाबुद्धेर्भेदनंचालनंबुद्धिभेदस्तन्नजनयेनोत्पादयेदज्ञानामविवेकिनांकर्मण्यासंगवतांकिंतुकुर्यात्जो
षयेत्कारयेत्प्रेरयेत् सर्वकर्माणिविद्वान् स्वयंतदेवाविदुषांकर्मयुक्तोभियुक्तः समाचरन् २६ अविद्वानज्ञः कथंकर्म
सुसज्जत इत्याह प्रकृतेरिति प्रकृतेः प्रकृतिः प्रधानंसत्वरजस्तमसांसाम्यावस्थातस्याः प्रकृतेर्गुणैर्विकारैः कार्यकरण
रूपैः क्रियमाणानिकर्माणिलौकिकानिशास्त्रीयाणिचसर्वशः सर्वप्रकारैरहंकारविमूढात्माकार्यकरणसंघातेआत्मप्रत्य

गीताव्या० योहंकारस्तेन विविधं नानाविधं मूढ आत्मा अंतःकरणं यस्य सोयं कार्यकरणाभिमान्यात्मा । विषया कर्माण्यात्मनि मन्य
मानः सत्कर्मणामहं कर्तेति मन्यते २७ यः पुनर्विद्वांस्तत्त्वविदिति तत्त्ववित्तु महाबाहो कस्य तत्त्ववित् गुणकर्मविभागयोः गुण
१५ विभागस्य कर्मविभागस्य च तत्त्ववित् इत्यर्थः गुणाः करणात्मिका गुणेषु विषयात्मकेषु वर्तंते नात्मेति मत्वा न सज्जते सक्तिं न करो
ति २८ ये पुनः प्रकृतेरिति प्रकृतेः प्रधानस्य गुणैः सम्यक् मूढाः संतः सज्जंते गुणानां कर्मसु गुणकर्मसु वयं कुर्मः कर्मफला
येति तान् कर्मसंगिनः कृत्स्नविदः कर्मफलमात्रदर्शिनो मंदान् मंदप्रज्ञान् कृत्स्नविदात्मवित् स्वयं न विचालयेत् बुद्धिभे
दकरणमेव चालनं तन्न कुर्यादित्यर्थः २९ कथं पुनः कर्मण्यधिकृतेनाज्ञेन मुमुक्षुणा कर्म कर्तव्यमित्यपेक्ष्यते मयि सर्वाणीति
मयि वासुदेवे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि कर्माणि संन्यस्य निक्षिप्य अध्यात्मचेतसा विवेकबुद्ध्या अहं कर्तेश्वराय भृत्यवत्
करोमीत्यनया बुद्ध्या किंच निराशीः त्यक्ताशीः निर्ममो ममभावश्च निर्गतो यस्य तव स त्वं निर्ममो भूत्वा युध्यस्व विगतज्वरो

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्तंत इति मत्वा न सज्जते २८ प्रकृतेर्गुणसंमूढाः सज्जंते गुण
कर्मसु तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत् २९ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशी
र्निर्ममो भूत्वा युध्यस्व विगतज्वरः ३० ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः श्रद्धावंतोनसूयंतो मुच्यंते तेपि कर्मभिः
३१ ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ३२ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञा
नवानपि प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ३३ ॥ ॥ ॥

विगतसंतापो विगतशोकः सन्नित्यर्थः ३० यदेतन्मम मतं कर्म कर्तव्यमिति सप्रमाणमुक्तं तत्तथा ये मे मतमिति ये मे मदी
यं इदं मतमनुतिष्ठंत्यनुवर्तंते मानवा मनुष्याः श्रद्धावंतः श्रद्दधानाः अनसूयंतः असूयां च मयि परमगुरौ वासुदेवे अकुर्वंतो हेरंब
मुच्यंते तेप्येवंभूताः कर्मभिर्धर्माधर्माख्यैः ३१ ये त्वेतदिति ये तु तद्विपरीता एतन्मम मतमभ्यसूयंतो निंदंतो नानुतिष्ठंति नानु
वर्तंते सर्वेषु ज्ञानेषु विविधं मूढास्ते सर्वज्ञानविमूढास्तान्विद्धि विजानीहि नष्टान्नाशं गतानचेतसोऽविवेकिनः ३२ क
स्मात्पुनः कारणात्त्वदीयं मतं नानुतिष्ठंतः परधर्ममनुतिष्ठंति स्वधर्मं चानानुवर्तंते त्वत्प्रतिकूलाः कथं न बिभ्यति त्वच्छासनाति १५
क्रमदोषात्तत्राह सदृशमिति सदृशमनुरूपं चेष्टते कस्याः स्वकीयायाः प्रकृतेः प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्का
रा वर्तमानजन्मादावभिव्यक्तः सा प्रकृतिस्तस्याः सदृशमेव सर्वो जंतुर्ज्ञानवानपि किं तु मूर्खस्तस्मात्प्रकृतिं यांति अनुगच्छंति

31
1945

भूतानि प्राणिनः निग्रहः निषेधरूपः किं करिष्यति मम वान्यस्य वा ३३ यदि सर्वो जंतुः आत्मनः प्रकृतिः सदृशमेव
चेष्टते न च प्रकृतिशून्यः कश्चिदस्ति ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्ताविदमुच्यते इंद्रिय
स्येति इंद्रियस्येंद्रियस्येति सर्वेंद्रियाणामर्थे शब्दादिविषये इष्टे रागः अनिष्टे द्वेषः इत्येवं प्रतींद्रियार्थे रागद्वेषाववः
श्यंभाविनौ तत्रायं पुरुषकारस्य शास्त्रार्थस्य विषय उच्यते शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोः वशं नागच्छेत् या हि पु
रुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव पुरुषं स्वकार्ये प्रवर्तयति तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं भवति यदा पुनः
रागद्वेषौ तत्प्रतिपक्षेण नियमयति तदा शास्त्रार्थदृष्टिरेव पुरुषो भवति न प्रकृतिवशः तस्मात्तयोः रागद्वेषयोर्वशं न
गच्छेत् यतस्तौ ह्यस्य पुरुषस्य परिपंथिनौ श्रेयोमार्गस्य विघ्नकर्तारौ तस्करा इव पथः ३४ तत्र रागद्वेषप्रयुक्तो मन्यते शा
स्त्रार्थमप्यन्यथा परधर्मोऽपि धर्मत्वादनुष्ठेय एवेति तदसत् श्रेयानिति श्रेयान् प्रशस्यतरः स्वधर्मः स्वकीयो धर्मः

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३४ श्रेयान्स्वधर्मो वि
गुणः परधर्मात्स्वनुष्ठितात् स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ अर्जुन उवाच अथ केन प्रयुक्तो
यं पापं चरति पूरुषः अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ३६ ॥ ॥

विगुणोऽपि विगतगुणोऽप्यनुष्ठीयमानः परधर्मात्स्वनुष्ठितात् साद्गुण्येन संपादितादपि स्वधर्मे स्थितस्य निधनं मर
णमपि श्रेयः परधर्मे स्थितस्य जीवितात् यद्वा स्व आत्मा तस्य धर्मः अध्यात्मावगतिरूपः विगुणः सत्त्वादिप्राकृतगु
णविमुक्तः मुक्तिहेतुत्वात् इंद्रियाणि पराणि तेषां धर्मः प्राकृतिकः तस्मात्स्वनुष्ठितादपि स्वधर्मे निधनं श्रेयः अपुनर्भवत्वा
त् परधर्मो भयावहः अविद्यारूपत्वात् संसारहेतुत्वात् कस्मात् परधर्मो भयावहो नरकादिलक्षणं भयमावहति ३५ यच्च
ध्यानर्थमूलं ध्यायतो विषयान् रागद्वेषौ ह्यस्य परिपंथिनाविति चोक्तं विक्षिप्तमनवधारितं च तदुक्तं तत्संक्षिप्तं वि
श्चितं च दमे वेति ज्ञातुमिच्छन्नर्जुन उवाच ज्ञाते हि तस्मिंस्तदुच्छेदाय यत्नं कुर्यादिति अथ केनेति अथ केन हेतुभूतेन प्र
युक्तः सन् राज्ञेव भृत्योयं पापं कर्म चरत्याचरति पुरुषः स्वयमनिच्छन्नपि हे वार्ष्णेय बलादिव नियोजितो राज्ञेव भृत्य इत्युक्तो दृष्टांतः

अभ्युतं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसीति श्रीभगवानुवाच ऐश्वर्यस्य समग्रस्य वीर्यस्य धर्मस्य यशसः श्रियः वै
राग्यस्याथ मोक्षस्य षण्णां भग इतीरणा ऐश्वर्यादिषट्कं यस्मिन् वासुदेवे नित्यमप्रतिबंधेन सामस्त्येन वर्तते उत्पत्तिं प्रलयं
 चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति उत्पत्त्यादिविषयं च विज्ञानं यस्य स वासुदेवो वाच्यो भगवा
निति काम एष इति काम एषः सर्वलोकशत्रुः यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनां स एष कामः प्रतिहतः केनचित्क्रोधत्वेन
परिणमते अतः क्रोधोऽप्येष एव रजोगुणसमुद्भवः रजश्च तद्गुणश्च रजोगुणः समुद्भवो यस्य स कामो रजोगुणसमुद्भवो
रजोगुणस्य वा समुद्भवः कामो ह्युद्भूतो रजः प्रवर्तयन् पुरुषं प्रवर्तयति तृष्णया ह्यहं कारित इति दुःखितानां रजःकार्ये
सेवादौ प्रवृत्तानां प्रलापः श्रूयते महाशनो महदशनमस्येति महाशनः अत एव महापाप्मा कामेन हि प्रेरितो जंतुः पाप
करोत्यतो विध्येनं काममिह संसारे वैरिणं ३७ कथं वैरीति दृष्टांतैः प्रत्याययति धूमेनेति धूमेन सहजेनाव्रियते व

श्रीभगवानुवाच काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विध्येनमिह वैरिणं ३७ धूमे
नाव्रियते वह्निर्यथादर्शो मलेन च यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं ३८ आवृतं ज्ञानमेतेन ज्ञानिनो नित्य
वैरिणा कामरूपेण कौंतेय दुःपूरेणानलेन च ३९ इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनं

ह्निः प्रकाशात्मकोऽप्रकाशात्मकेन यथा वादर्शो मलेन च यथोल्बेन गर्भवेष्टनेन जरायुणा आवृत आच्छादितो गर्भस्तथा ते
नेदमावृतं ३८ किं पुनस्तदिदं शब्दवाच्यं यत्कामेनावृतमित्युच्यते आवृतं ज्ञानमिति आवृतमेतेन ज्ञानं ज्ञानिनो नित्यवैरि
णा ज्ञानी हि जानात्यनेनाहमनर्थे प्रयुक्तः इति पूर्वमेव अतो दुःखी च भवति नित्यमेव ततो ज्ञानिनो नित्यवैरी न तु मू
र्खस्य स हि कामं तृष्णाकाले मित्रमिव पश्यन् तत्कार्ये दुःखे प्राप्ते जानाति तृष्णया दुःखित्वमापादित इति न पूर्वमेव
तो ज्ञानिन एव नित्यवैरी किं रूपेण कामरूपेण काम इच्छैव रूपमस्येति कामरूपः तेन दुःपूरेण दुःखेन पूरणमस्येति दुः
पूरेणातस्तेनानलेन नास्यालं पर्याप्तिर्विद्यत इत्यनलस्तेन च ३९ किमधिष्ठानः पुनः कामो ज्ञानस्यावरणत्वेन वैरी
सर्वस्य लोकस्येत्यपेक्षायामाह ज्ञाते ह्यधिष्ठाने सुखेन शत्रोर्निबर्हणं कर्तुं शक्यत इति इंद्रियाणीति इंद्रियाणि मनो बुद्धि
श्चास्य कामस्याधिष्ठानमाश्रय उच्यते एतैरिंद्रियादिभिराश्रयैर्विमोहयति विविधं मोहयत्येष कामो ज्ञानमावृत्याच्छाद्य देहिनं

33/1943

यत एवं तस्मात्त्वमिति तस्मात्त्वमिंद्रियाण्यादौ पूर्वमेव नियम्य वशीकृत्य भरतर्षभ पाप्मानं कामं प्रजहिहि परित्यज एनं प्रकृतं वैरि
णं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्रतः आचार्यतश्च आत्मादीनामवबोधो विज्ञानं नाशकरं आत्मनः परित्यजेत्यर्थः ४१ इं
द्रियाण्यादौ नियम्य कामं शत्रुं जहि इत्युक्तं तत्र किमाश्रयः कामं जह्यादित्युच्यते इंद्रियाणीति इंद्रियाणि श्रोत्रादीनि पं
च देहं स्थूलं बाह्यं परिच्छिन्नं चापेक्ष्य सौक्ष्म्यांतरत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टान्याहुः पंडितास्तथेंद्रियेभ्यः परं मनः संक
ल्पविकल्पात्मकं तथा मनसस्तु परा बुद्धिः निश्चयात्मिका तथा यः सर्वदृश्येभ्यो बुद्ध्यंतेभ्योऽभ्यंतरो यं देहिनमिंद्रियादिभिरा
श्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं बुद्धेः परतस्तु सः स बुद्धेर्द्रष्टा परमात्मा ४२ एवमिति एवं बुद्धेः परमा
त्मानं बुद्ध्वा ज्ञात्वा संस्तभ्य सम्यक् स्तंभनं कृत्वात्मानं स्वेनैवात्मना सम्यक् समाधायेत्यर्थः जहि एनं शत्रुं हे महाबाहो कामरूपं दुरा
सदं दुःखेनासद आसादनं प्राप्तिर्यस्य तं दुरासदं दुर्विज्ञेयानेकविशेषमिति ४३ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्री

तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनं ४१ इंद्रियाणि पराण्याहुरिंद्रियेभ्यः
परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ४२ एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना जहि शत्रुं महाबाहो काम
रूपं दुरासदं ४३ ॐ तत्सदिति श्री० कर्मयोगो नाम तृतीयोऽध्यायः ३ भगवानुवाच इमं विवस्वते योगं प्रोक्तवानहमव्ययं विवस्वा
न्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् १ एवं परंपराप्राप्तमिमं राजर्षयो विदुः स कालेनेह महता योगो नष्टः परंतप २ ॥

शंकरभगवतः कृतौ गीताभाष्ये कर्मप्रशंसा योगो नाम ३ ध्यायः योऽयं योगोऽध्यायद्वयेनोक्तो ज्ञाननिष्ठालक्षणः ससंन्यासः क
र्मयोगोपायो यस्मिन् वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च गीतासु सर्वास्वयमेव योगो विवक्षितो भगवता अत
परिसमाप्तं वेदार्थं मन्वानस्तं वंशकथनेन स्तौति भगवान् इममिति इमम् अध्यायद्वयेनोक्तं योगं विवस्वते आदित्याय सर्गादौ प्रो
क्तवानहं जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय तेन हि योगबलेन युक्ताः समर्था भवंति ब्रह्म परिरक्षितुं ब्रह्मक्षत्रे
परिपालयितुं अलमव्ययं अव्ययफलत्वात् अस्य सम्यग्दर्शननिष्ठालक्षणस्य मोक्षाख्यं फलं न व्येति स च विवस्वान्मनवे
प्राह मनुरिक्ष्वाकवे स्वपुत्राय आद्याय राज्ञेऽब्रवीत् १ एवं परंपराप्राप्तमिमं राजर्षयो राजानश्च ते ऋषयश्च राजर्षयो वि
दुरिमं योगं स योगः कालेनेह महता दीर्घेण नष्टो विच्छिन्नसंप्रदायः संवृत्तः हे परंतप आत्मनो विपक्षभूताः परा उच्यंते तान्
शौर्यतेजोगभस्तिभिर्भानुरिव तापयतीति परंतपः शत्रुतापन इत्यर्थः २ ॥ ॥

उद्बलानजितेंद्रियान् प्राप्यनष्टं योगमुपलभ्य लोकानां पुरुषार्थसंबंधिनं स एवायमिति स एवायं मयातेतुभ्यंअद्यइदानींयो
गः प्रोक्तः पुरातनः भक्तोसिमेसखाचासीतिरहस्यंहियस्मादेतदुत्तमंयोगोज्ञानमित्यर्थः ३ भगवतोविप्रतिषिद्धमुक्तमि
तिमाभूत्कस्यचिद्बुद्धिरितिपरिहारार्थंचोद्यमिवकुर्वन्नर्जुनउवाच अपरंभवतइति अपरमर्वाग्वसुदेवगृहे भगवतोजन्मपरं
पूर्वसर्गादौजन्मोत्पत्तिर्विवस्वतआदित्यस्यतत्कथमेतद्विजानीयांअविरुद्धार्थतयायस्त्वमेवादौप्रोक्तवानिमंयोगंसएवत्व
मिदानींमह्यंप्रोक्तवानसीति ४ या वासुदेवेनीश्वरासर्वज्ञाशंकामूर्खाणांतांपरिहरन् श्रीभगवानुवाच यदर्थोह्यर्जु
नस्यप्रश्नः बहूनीति बहूनिमेव्यतीतानिअतिक्रांतानिजन्मानि तवचहेअर्जुनतान्यहंवेदजाने सर्वाणितत्वंवेत्थ जानीषेधर्मा
धर्मादिप्रतिबद्धज्ञानशक्तित्वादहंपुनर्नित्यशुद्धबुद्धमुक्तस्वभावत्वादनावरणज्ञानशक्तिरितिवेद्मिहेपरंतप ५ कथंतर्हितव
नित्येश्वरस्यधर्माधर्माभावेपिजन्मेत्युच्यते अजोपीति अजोपिजन्मरहितोपिसंस्तथाव्ययात्माऽक्षीणज्ञानशक्तिस्वभावो

सएवायंमयातेद्ययोगःप्रोक्तःपुरातनः भक्तोसिमेसखाचेतिरहस्यंह्येतदुत्तमं ३ अर्जुनउवाच अपरंभवतोजन्मपरंज
न्मविवस्वतः कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति ४ श्रीभगवानुवाच बहूनिमेव्यतीतानिजन्मानितवचार्जुन तान्य
हंवेदसर्वाणिनत्वंवेत्थपरंतप ५ अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन् प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया ६
यदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं ७ परित्राणायसाधूनांविनाशायचदुष्कृतां
धर्मसंस्थापनार्थायसंभवामियुगेयुगे ८ जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्वतः त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसोर्जुन ९

पिसंस्तथाभूतानांब्रह्मादिस्तंबपर्यंतानांईश्वरईशनशीलोपिसन् प्रकृतिंस्वांमायांममवैष्णवींत्रिगुणात्मिकांयस्यावशेस
र्वंजगद्वर्ततेययामोहितःसन्सर्वःस्वमात्मानंवासुदेवंनजानातितांप्रकृतिंस्वामात्ममायामधिष्ठायवशीकृत्यसंभवामि
देहवानिवभवामिजातइवआत्ममाययाआत्मनोमाययानपरमार्थतोलोकवत् ६ तच्चजन्मकदाकिमर्थंचेत्युच्यते यदायदे
तियदायदाहिधर्मस्यग्लानिर्हानिर्वर्णाश्रमादिलक्षणस्यप्राणिनांअभ्युदयनिःश्रेयससाधनस्यभवतिहेभारतअभ्युत्थान
मुद्भवःअधर्मस्यतदाआत्मानंसृजाम्यहंमायया ७ किमर्थं परित्राणायेतिपरित्राणायपरिरक्षणायसाधूनां
सन्मार्गस्थानांविनाशायचदुष्कृतांपापकारिणां किंच धर्मसंस्थापनार्थायधर्मस्यसम्यक्स्थापनंधर्मसंस्थापनंतदर्थंसंभवामि
युगेयुगेप्रतियुगंतत् ८ जन्मेति जन्ममायारूपंकर्मचसाधूनांपरित्राणादिममदिव्यमप्राकृतमैश्वर्यमेवंयथोक्तंयोवेत्तितत्व
तस्तत्वेनयथावत् त्यक्त्वादेहमिमंपुनर्जन्मपुनरुत्पत्तिंनैतिनप्राप्नोतिमामेत्यागच्छतिसमुच्यतेहेअर्जुन ॥

35
1943

नेषमोक्षमार्गइदानींप्रवृत्तः किंतर्हिपूर्वमपिवीतरागभयक्रोधाःरागश्चभयंचक्रोधश्चरागभयक्रोधाःवीताःविगतायेभ्यस्ते
वीतरागभयक्रोधाःमन्मयाब्रह्मविदईश्वराभेददर्शिनोमामेवपरमेश्वरमुपाश्रिताःकेवलज्ञाननिष्ठाइत्यर्थः बहवोनेकयोगिनः
ज्ञानतपसाज्ञानमेवपरमात्मविषयंतपस्तेनज्ञानतपसापूताःपरशुद्धिंगताःसंतोमद्भावमीश्वरभावंमोक्षमागताःसमनुप्राप्ताः १०
इतरतपांसिनिरपेक्षाज्ञाननिष्ठाइत्यस्यलिंगंज्ञानतपसेतिविशेषणंतवतर्हिरागद्वेषौस्तः यतःकेभ्यश्चिदेवात्मभावंप्रयच्छसिनसर्वे
भ्यइत्युच्यते येयथेति येयथायेनप्रकारेणयेनप्रयोजनेनयत्फलार्थितयामांप्रपद्यंतेतांस्तथैवतत्फलदानेनभजाम्यनुगृह्णा
म्यहमित्येतत्तेषांमोक्षंप्रत्यनर्थित्वात्नह्येकस्यमुमुक्षुत्वंफलार्थित्वंचयुगपत्संभवत्यतोयेफलार्थिनस्तान्फलप्रदानेनयेयथोक्त
कारिणस्त्वफलार्थिनोमुमुक्षवश्चतान्ज्ञानप्रदानेनयेज्ञानिनःसन्यासिनोमुमुक्षवश्चतान्मोक्षप्रदानेनतथार्तानार्तिहर
णेनेत्येवंयथाप्रपद्यंतेयेमांतांस्तथैवभजामीत्यर्थःनपुनःरागद्वेषनिमित्तंमोहनिमित्तंवाकंचिद्भजामिसर्वथापिसर्वावस्थ

वीतरागभयक्रोधामन्मयामामुपाश्रिताः बहवोज्ञानतपसापूतामद्भावमागताः १० येयथामांप्रपद्यंतेतांस्तथैवभजाम्य
हं ममवर्त्मानुवर्ततेमनुष्याःपार्थसर्वशः ११ कांक्षंतःकर्मणांसिद्धिंयजंतइहदेवताः क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिकर्मजा १२
चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशः तस्यकर्तारमपिमांविद्ध्यकर्तारमव्ययं १३ ॥ ॥

स्यममेश्वरस्यवर्त्ममार्गमनुवर्ततेमनुष्याःयत्फलार्थितयायस्मिन्कर्मण्यधिकृतायेप्रयतंतेमनुष्याउच्यंतेहेपार्थसर्वशः
सर्वप्रकारैः ११ यदितवेश्वरस्यरागादिदोषाभावात्सर्वप्राणिष्वनुजिघृक्षायांतुल्यायांसर्वफलदानसमर्थेचत्वयिस
तिवासुदेवःसर्वमितिज्ञानेनैवमुमुक्षवःसंतःकस्मात्त्वामेवसर्वेनप्रतिपद्यंतइति शृणुतत्रकारणं कांक्षंतःअभिप्र
र्थयंतःकर्मणांसिद्धिंफलनिष्पत्तिंप्रार्थयंतोयजंतेइहास्मिन्लोकेदेवताइंद्राग्न्याद्याअथयोन्यांदेवतामुपास्तेन्योसावन्यो
हमस्मीतिनसवेदयथापशुरेवंसदेवानामितिश्रुतेःतेषांहिभिन्नदेवतायाजिनांफलकांक्षिणांक्षिप्रंशीघ्रंहियस्मान्मा
नुषेलोकेमनुष्यलोकेहिशास्त्राधिकारःक्षिप्रंमानुषेलोकइतिविशेषणादन्येष्वपिकर्मफलसिद्धिंदर्शयतिभगवान्मा
नुषेलोकेवर्णाश्रमादिकर्माणीतिविशेषःतेषांचवर्णाश्रमाद्यधिकारिकर्मणांफलसिद्धिःक्षिप्रंभवतिकर्मजाकर्मभ्यो
जाता १२ मानुषएवलोकेवर्णाश्रमादिकर्माधिकारोनान्येषुलोकेष्वितिनियमःकिंनिमित्तइतिअथवावर्णाश्रमादिप्रवि
भागोपेतामनुष्याःममवर्त्मानुवर्ततेसर्वशइत्युक्तंकस्मात्पुनःकारणात्नियमेनतवैववर्त्मानुवर्ततेनान्यस्येत्युच्यते ॥

गीताभा० चातुर्वर्ण्यं चत्वार एव वर्णाश्चातुर्वर्ण्यं मया ईश्वरेण सृष्टमुत्पादितं गुणकर्मविभागशः ब्राह्मणोऽस्य मुखमासीदिति श्रुतेः गुणकर्म
विभागशः गुणविभागशः कर्मविभागशश्च गुणाः सत्त्वरजस्तमांसि तत्र सात्त्विकस्य सत्त्वप्रधानस्य ब्राह्मणस्य शमो दमस्तप इत्या
१८ दीनि कर्माणि सत्त्वोपसर्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजःप्रभृतीनि कर्माणि तमउपसर्जनरजःप्रधानस्य वैश्यस्य
कृष्यादीनि कर्माणि रजउपसर्जनतमःप्रधानस्य शूद्रस्य शुश्रूषैव कर्मेत्येवं गुणकर्मविभागशश्चातुर्वर्ण्यं मया सृष्टमित्य
र्थः तच्चेदं चातुर्वर्ण्यं नान्येषु लोकेषु अतो मानुषे लोके इति विशेषणं हन्त तर्हि चातुर्वर्ण्यस्य सर्गादेः कर्मणः कर्तृत्वात्तत्फलेन
युज्यसे अतो न त्वं नित्यमुक्तो नित्येश्वर इत्युच्यते यद्यपि मायासंव्यवहारेण तस्य कर्मणः कर्तारमपि संतं मां परमार्थतो विध्यकर्ता
रमत एवाव्ययमसंसारिणं च मां विद्धि १३ येषां तु कर्मणां कर्तारं मां मन्यसे परमार्थतस्तु तेषामकर्ताहं यतो न मां तानि कर्मा
णि लिंपंति देहाद्यारंभकत्वेनाहंकाराभावात् न च तेषां कर्मणां फलेषु मे स्पृहा तृष्णा येषां तु संसारिणामहं कर्तेत्यभिमानः क

न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा इति मां योऽभिजानाति कर्मभिर्न स बध्यते १४ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षु
भिः कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं १५ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसे
ऽशुभात् १६

र्मसु स्पृहा तत्फलेषु च तान्कर्माणि लिंपंतीति युक्तं तदभावान्न मां कर्माणि लिंपंतीत्येवं योऽन्योऽपि मामात्मत्वेनाभिजानाति नाहं
कर्ता न मे कर्मफले स्पृहेति स कर्मभिर्न बध्यते तस्यापि न देहाद्यारंभकाणि कर्माणि भवंतीत्यर्थः १४ नाहं कर्ता न मे कर्मफ
ले स्पृहेति एवं ज्ञात्वा कृतं कर्म पूर्वैरप्यतिक्रांतैर्मुमुक्षुभिः कुरु तेन कर्मैव त्वं न तूष्णीमासनं नापि संन्यासः कर्तव्यः तस्मात्त्वं पू
र्वैरप्यनुष्ठितत्वात् यद्यनात्मवित् त्वं तत आत्मशुद्ध्यर्थं तत्त्ववित् चेल्लोकसंग्रहार्थं पूर्वैर्जनकादिभिः पूर्वतरं कृतं नाधुनातनं हरंवु
तत्र चेत्कर्म कर्तव्यं त्वद्वचनादेव करोम्यहं किं विशेषितेन पूर्वैः पूर्वतरं कृतमित्युच्यते यस्मान्महद्वैषम्यं कर्मणि कथं
कृतं निर्वर्तितं १५ किं कर्म किं वा अकर्मेति कवयो मेधाविनोऽप्यत्रास्मिन्कर्मादिविषये मोहिता मोहं गताः अतस्ते तु १८
भ्यमहं कर्म अकर्म च प्रवक्ष्यामि यज्ज्ञात्वा कर्मादि मोक्ष्यसे अशुभात् संसारात् १६ ॥ ॥

37
1943

न च त्वया मंतव्यं कर्म नाम देहादिचेष्टा लोकप्रसिद्धमकर्म तदक्रिया तूष्णीमासनं किं तत्र बोद्धव्यमिति कस्मादुच्यते कर्मणः
शास्त्रविहितस्य हि यस्मात् अप्यस्ति बोद्धव्यं बोद्धव्यं चास्त्येव विकर्मणः प्रतिषिद्धस्य तथा अकर्मणश्च तूष्णीभावस्य बोद्ध
व्यमस्तीति त्रिष्वप्यध्याहारः कर्तव्यो यस्माद्गहना विषमा दुर्ज्ञाना कर्मण इत्युपलक्षणार्थं कर्मादीनां कर्माकर्मविकर्मणां गतिर्या
थात्म्यं तत्त्वमित्यर्थः १७ किं पुनस्तत्त्वं कर्मादेर्यद्बोद्धव्यं वक्ष्यामीति प्रतिज्ञातमुच्यते कर्मणि क्रियत इति व्यापारमात्रं
तस्मिन्कर्मणि अकर्म कर्माभावं यः पश्येदकर्मणि च कर्माभावे कर्तृतंत्रत्वात्प्रवृत्तिनिवृत्त्योर्वस्त्वप्राप्यैव हि सर्व एव कारकादिव्य
वहारोऽविद्याभूमावेव कर्म यः पश्येत् पश्यति स बुद्धिमान् मनुष्येषु स युक्तो योगी च यः कृत्स्नकर्मकृत् समस्तकर्मकृच्च स
इति स्तूयते कर्माकर्मणोरितरेतरदर्शिनः ननु किमिदं विरुद्धमुच्यते कर्मण्यकर्म यः पश्येदकर्मणि च कर्मेति न हि कर्माक
र्म स्यादकर्म वा कर्म तत्र कथं विरुद्धं पश्येत् द्रष्टा ननु अकर्मैव परमार्थतः सत्कर्मवदवभासते मूढदृष्टेर्लोकस्य तथा कर्मैवा

कर्मणोऽप्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः १७ कर्मण्यकर्म यः पश्ये
दकर्मणि च कर्म यः स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् १८ ॥ ॥ ॥

कर्मवत् तत्र यथाभूतदर्शनार्थमाह भगवान् कर्मण्यकर्म यः पश्येदित्यादि अतो न विरुद्धं बुद्धिमत्त्वाद्युपपत्तेश्च बोद्धव्य
मिति च यथाभूतमुच्यते न च विपरीतज्ञानादशुभान्मोक्षणं स्यात् यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति चोक्तं तस्मात्कर्माकर्म
णी विपर्ययेण गृहीते प्राणिभिस्तद्विपर्ययग्रहणनिवृत्त्यर्थं भगवतो वचनं कर्मण्यकर्म इत्यादि न चात्र कर्माधिकरणमकर्मा
स्ति कुंडे बदराणीव नाप्यकर्माधिकरणं कर्मास्ति कर्माभावत्वादकर्मणोऽतो विपरीतगृहीते एव कर्माकर्मणी लौकिकै
र्यथा मृगतृष्णिकायामुदकं शुक्तिकायां वा रजतं ननु कर्म कर्मैव सर्वेषां न क्वचिद्व्यभिचरति तन्न नौस्थस्य नावि गच्छंत्यां
तटस्थेष्वगतिषु नगेषु प्रतिकूलगतिदर्शनात् दूरेषु चक्षुषाऽसंनिकृष्टेषु गच्छत्सु गत्यभावदर्शनात् एवमिहाप्यकर्म
णि अहं करोमीति कर्मदर्शनं कर्मणि चाकर्मेति विपरीतदर्शनं येन तन्निराकरणार्थमुच्यते कर्मण्यकर्म य इत्यादि
देहाद्यात्मनि शंकितं सक्रियत्वं आसक्तं कं प्रतिवचनमप्यसकृदत्यंतविपरीतदर्शनभावितत या मोमुह्यमानो लोकः
श्रुतमप्यसकृत्तत्त्वं विस्मृत्य मिथ्याप्रसंगमवतार्यावतार्य चोदयतीति पुनः पुनरुत्तरमाह भगवान् दुर्विज्ञेयत्वाच्च वस्तु

गीताभाष्य नः अव्यक्तोयमचिंत्यो यं न जायते म्रियते इत्यादिनात्मनि कर्माभावः श्रुतिस्मृतिन्यायप्रसिद्ध उक्तो वक्ष्यमाणश्च तस्मिन्नात्म
निकर्माभावे अकर्मणि कर्मविपरीतदर्शनमत्यंतनिरूढं यतः किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः देहाद्याश्रयं कर्मात्म
१८. न्यध्यारोप्याहं तूष्णीं भवामि येनाहं निरायासो कर्मा सुखी स्यामिति कार्यकरणाश्रयं व्यापारोपरमं तत्कृतं च सुखित्वमात्मन्य
ध्यारोप्य न करोमि किंचित् तूष्णीं सुखमासमिति अभिमन्यते लोकस्तत्रेदं लोकस्य विपरीतदर्शनापनयायाह भगवान् कर्मण्य
कर्म इत्यादि अत्र च कर्म कर्मैव सत् कार्यकरणाश्रयं कर्मरहिते विक्रिय आत्मनि सर्वैरध्यस्तं यतः पंडितोप्यहं करोमीति मन्य
तेऽत आत्मसमवेततया सर्वलोकप्रसिद्धे कर्मणि नदीकूलस्थेष्विव वृक्षेषु गतिप्रातिलोम्येन तत्राकर्म कर्माभावं यथाभूतं ग
त्यभावमिव वृक्षेषु यः पश्येत् अकर्मणि च कार्यकरणव्यापारोपरमे कर्मवदात्मन्यध्यारोपिते तूष्णीमकुर्वन् सुखमास इ
त्यहंकाराभिसंधिहेतुत्वात् तस्मिन्नकर्मणि च कर्म यः पश्येद्य एवं कर्माकर्मविभागज्ञः स बुद्धिमान् पंडितो मनुष्येषु स
युक्तो योगी कृत्स्नकर्मकृच्च सोऽशुभान्मोक्षितः कृतकृत्यो भवतीत्यर्थः अयं श्लोको अन्यथा व्याख्यातः कैश्चित्कथं नित्या
नां किल कर्मणामीश्वरार्थेऽनुष्ठीयमानानां तत्फलाभावादकर्माणि तान्युच्यंते गौण्या वृत्त्या तेषां चाकरणमकर्म तच्च प्रत्य
वायफलत्वात् कर्मोच्यते गौण्यैव वृत्त्या तत्र नित्ये कर्मण्यकर्म यः पश्येत् फलाभावाद्यथा धेनुरपि गौरगौरुच्यते क्षीराख्यं फ
लं न प्रयच्छतीति तद्वत्तथा नित्याकरणे त्वकर्मणि च कर्म यः पश्येत् नरकादिप्रत्यवायफलं प्रयच्छतीति
नैतद्युक्तं व्याख्यानमेवं ज्ञानादशुभान्मोक्षानुपपत्तेर्यत् ज्ञात्वा मोक्ष्यसेऽशुभादिति भगवतोक्तं बाध्येत कथं नित्यानामनु
ष्ठानादशुभात्स्यान्नाम मोक्षणं ननु तेषां फलाभावज्ञानान्न हि नित्यानां फलाभावज्ञानमशुभमुक्तिफलत्वेन चोदितं नि
त्यकर्माकर्मेति ज्ञानं वा न च भगवतैवेहोक्तमेतेनाकर्मणि कर्मदर्शनं प्रत्युक्तं न ह्यकर्मणि कर्मेति दर्शनं कर्तव्यतयेह चोद्य हेरंबु
ते नित्यस्य तु कर्तव्यतामात्रं न चाकरणान्नित्यस्य प्रत्यवायो भवतीति विज्ञानात्किंचित्फलं स्यात् नापि नित्याकरणं ज्ञेय
त्वेन चोदितं नापि कर्माकर्मेति मिथ्यादर्शनादशुभान्मोक्षणं बुद्धिमत्त्वं युक्तता कृत्स्नकर्मकृत्त्वादि च फलमुपपद्यते स्तु १८
तिर्वा मिथ्याज्ञानमेव हि साक्षादशुभरूपं कुतोन्यस्मादशुभान्मोक्षणं न हि तमस्तमसो निवर्तकं भवति ननु कर्मणि
यदकर्मदर्शनमकर्मणि च कर्मदर्शनं न तन्मिथ्याज्ञानं किं तर्हि गौणं फलभावाभावनिमित्तं न कर्माकर्मविज्ञानादपि गौ

39
1943

णात्फलस्याश्रवणान्नापि श्रुतहान्यश्रुतपरिकल्पनायां कश्चिद्विशेष उपलभ्यते स्वशब्देनापि शक्यं वक्तुं नित्यकर्मणां फलं ना
स्त्यकरणाच्च तेषां नरकपातः स्यादिति तत्र व्याजेन परव्यामोहरूपेण कर्मण्यकर्म यः पश्येदित्यादिना किं तत्रैवं व्याचक्षाणे
न भगवतोक्तं वाक्यं लोकव्यामोहार्थमिति व्यक्तं कल्पितं स्यात् न चैतच्छद्मरूपेण वाक्येन रक्षणीयं वस्तु नापि शब्दांतरेण
पुनः पुनरुच्यमानं च सुबोधं स्यादित्येवं वक्तुं युक्तं कर्मण्येवाधिकारस्त इत्यत्र च स्फुटतर उक्तोर्थो न पुनर्वक्तव्यो भवति सर्वत्र
च प्रशस्तं बोद्धव्यं च कर्तव्यमेव न निःप्रयोजनं बोद्धव्यमित्युच्यते न च मिथ्याज्ञानं बोद्धव्यं भवति तत्प्रत्युपस्थापितं वा वस्त्वा
भासं नापि नित्यानामकरणादभावात्प्रत्यवायभावोत्पत्तिरिति नासतो विद्यते भाव इति वचनात्कथमसतः सज्जायेतेति च निर
स्तत्वात् असतः सज्जन्मप्रतिषेधात् सतः सदुत्पत्तिं ब्रुवता असदेव सद्भवेत्सच्चासद्भवेदित्युक्तं स्यात्तच्चायुक्तं सर्वप्रमाणविरोधा
त् न च निष्फलं विदध्यात्कर्म शास्त्रं दुःखरूपत्वाद्दुःखस्य च बुद्धिपूर्वकतया कार्यत्वानुपपत्तेस्तदकरणे च नरकपाताभ्युप
गमेनर्थायैवोभयथापि करणेऽकरणे च शास्त्रं कल्पितं स्यात् स्वाभ्युपगमविरोधश्च नित्यं निष्फलं कर्मेत्यभ्युपगम्य ते मोक्षफ

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः १९ त्यक्त्वा कर्मफलासंगं नि
त्यतृप्तो निराश्रयः कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः २० ॥ ॥

लायेति ब्रुवतः तस्मात् यथाश्रुत एवार्थः कर्मण्यकर्म इत्यादि तथा च व्याख्यातोस्माभिः श्लोकः १८ तदेतत्कर्मण्यकर्मादिद
र्शनं स्तूयते यस्य यथोक्तदर्शिनः सर्वे यावंतः समारंभाः सर्वाणि कर्माणि समारभ्यंत इति समारंभाः कामसंकल्पव
र्जिताः कामैस्तत्कारणैश्च संकल्पैः वर्जिताः ज्ञानाग्निदग्धकर्माणं मुधैव चेष्टामात्रा अनुष्ठीयंते प्रवृत्तेन चेल्लोकसंग्रहार्थं
निवृत्तेन चेज्जीवनमात्रार्थं तं ज्ञानाग्निदग्धकर्माणं कर्मादावकर्मादिदर्शनं ज्ञानं तदेवाग्निस्तेन ज्ञानाग्निना दग्धानि शुभा
शुभलक्षणानि कर्माणि यस्य तमाहुः परमार्थतः पंडितं बुधाः ब्रह्मविदः १९ यस्त्वकर्मादिदर्शी सोऽकर्मादिदर्शनादेव
निष्कर्मा संन्यासी जीवनमात्रार्थचेष्टः स कर्मणि न प्रवर्तते यद्यपि प्राग्विवेकतः प्रवृत्तः यस्तु प्रारब्धकर्मा सन्नुत्तरकालमुत्प
न्नात्मसम्यग्दर्शनः स्यात् स कर्मणि प्रयोजनमपश्यन् ससाधनं कर्म परित्यजत्येव स कुतश्चिन्निमित्तात् कर्मपरित्यागासं
भवे सति कर्मणि तत्फले च संगरहिततया स्वप्रयोजनाभावाल्लोकसंग्रहार्थं पूर्ववत्कर्मणि प्रवृत्तोपि नैव किंचित् करोति ज्ञा
नाग्निदग्धकर्मत्वात् तदीयं कर्माकर्मैव संपद्यत इत्येतमर्थं दर्शयिष्यन्नाह त्यक्त्वा कर्मस्वभिमानं फलासंगं च यथोक्तेन ज्ञाने

गीताभाष्य नित्यतृप्तो निराकांक्षो विषयेष्विति । निराश्रय आश्रयरहितः आश्रयो नाम यदाश्रित्य पुरुषार्थं सिसाधयिषति दृष्टादृष्टेष्टफल
साध्यसाधनाश्रयरहित इत्यर्थः । विदुषा क्रियमाणं कर्म परमार्थतो अकर्मैव तस्य निष्क्रियात्मदर्शनसंपन्नत्वात् तेनैवंभूतेन स्वप्र
२० योजनाभावात् ससाधनं कर्म त्यक्तव्यमेवेति प्राप्ते ततो निर्गमासंभवात् लोकसंग्रहचिकीर्षया शिष्टविगर्हणापरिजिहीर्षया वा
पूर्ववत् कर्मण्यभिप्रवृत्तोपि निष्क्रियात्मदर्शनसंपन्नत्वान्नैव किंचित् करोति सः ॥ २० ॥ यः पुनः पूर्वोक्तविपरीतः प्रागेव कर्मारंभात्
ब्रह्मणि सर्वांतरे प्रत्यगात्मनि निष्क्रिये संजातात्मदर्शनः स दृष्टादृष्टेष्टविषयाशीर्विवर्जिततया दृष्टादृष्टार्थे कर्मणि प्रयोजनमप
श्यन् ससाधनं कर्म संन्यस्य शरीरयात्रामात्रचेष्टो यतिर्ज्ञाननिष्ठो मुच्यत इत्येतमर्थं दर्शयितुमाह । निराशीः निर्गता आशिषो
यस्मात् स निराशीः यतचित्तात्मा चित्तमंतःकरणं आत्मा बाह्यकार्यकरणसंघातः तावुभावपि यतौ संयतौ येन स यतचित्ता
त्मा त्यक्तसर्वपरिग्रहः त्यक्तः सर्वपरिग्रहो येन स त्यक्तसर्वपरिग्रहः शारीरं शरीरस्थितिमात्रप्रयोजनं केवलं तत्राप्यभिमान
वर्जितः कर्म कुर्वन्नाप्नोति न प्राप्नोति किल्बिषमनिष्टरूपं पापं धर्मं च धर्मोपि मुमुक्षोरनिष्टरूपत्वात् किल्बिषमेव बंधापादकत्वात्
किंच शारीरं केवलं कर्मेत्यत्र किं शरीरनिर्वर्त्यं शारीरं कर्माभिप्रेतमाहोस्विच्छरीरस्थितिमात्रप्रयोजनं कर्म शारीरं कर्मेति किं

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं ॥ २१ ॥

चातो यदि शरीरनिर्वर्त्यं शारीरं कर्म यदि वा शरीरस्थितिमात्रप्रयोजनं शारीरमित्युच्यते । यदा शरीरनिर्वर्त्यं कर्म शारी
रमभिप्रेतं स्यात्तदा दृष्टादृष्टप्रयोजनं कर्म प्रतिषिद्धमपि शरीरेण कुर्वन्नाप्नोति किल्बिषमिति ब्रुवतो विरुद्धाभिधानं प्रस
ज्येत शास्त्रीयं च कर्म दृष्टादृष्टप्रयोजनं शरीरेण कुर्वन्नाप्नोति किल्बिषमित्यपि ब्रुवतो प्राप्तप्रतिषेधः प्रसंगः शारीरं कर्म
कुर्वन्निति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसनिर्वर्त्यं कर्म विधिप्रतिषेधविषयं धर्माधर्मशब्दवाच्यं कुर्वन्नाप्नोति
किल्बिषमित्युक्तं स्यात् तत्रापि वाङ्मनसाभ्यां विहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनं विरुद्धमापद्येत प्रतिषिद्धसेवा
पक्षेपि भूतार्थानुवादमात्रमनर्थकं स्यात् यदा तु शरीरस्थितिमात्रप्रयोजनं शारीरं कर्माभिप्रेतं भवेत् तदा दृष्टादृष्टप्रयोज हरंबु
नं कर्म विधिप्रतिषेधगम्यं शरीरवाङ्मनोनिर्वर्त्यमन्यदकुर्वंस्तैरेव शरीरादिभिः शरीरस्थितिमात्रप्रयोजनं केवलशब्दप्र
योगादहं करोमीत्यभिमानवर्जितः शरीरादिचेष्टामात्रं लोकदृष्ट्या कुर्वन्नाप्नोति किल्बिषमेवंभूतस्य पापशब्दवाच्यकिल्बि २०
षप्राप्त्यसंभवात् किल्बिषं संसारं न प्राप्नोति ज्ञानाग्निदग्धसर्वकर्मत्वादप्रतिबंधेन मुच्यत एवेति पूर्वोक्तसम्यग्दर्शन
फलानुवाद एवैषः एवं शारीरं केवलं कर्मेत्यस्यार्थस्य परिग्रहे निरवद्यं भवति ॥ २१ ॥ ॥ ॥

41/1943

त्यक्तसर्वपरिग्रहस्य यतेरन्नादेः शरीरस्थितिहेतोः परिग्रहस्याभावाद्याचनादिना शरीरस्थितौ कर्तव्यतायां प्राप्तायामया
चितमसंक्लृप्तमुपपन्नं यदृच्छयेत्यादिना वचनेनानुज्ञातं यतेः शरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारमाविष्कुर्वन्नाह । यदृच्छालाभ
संतुष्टो प्रार्थितोपनतो लाभो यदृच्छालाभस्तेन संतुष्टः संजातालंप्रत्ययो द्वंद्वातीतो द्वंद्वैः शीतोष्णादिभिर्हन्यमानोपि अविष
ण्णचित्तो द्वंद्वातीत उच्यते विमत्सरो विगतमत्सरो निर्वैरबुद्धिः समस्तुल्यो यदृच्छालाभस्य सिद्धावसिद्धौ च य एवंभूतो यतिर
न्नादेः शरीरस्थितिहेतोर्लाभालाभयोः समो हर्षविषादवर्जितः कर्मादावकर्मादिदर्शी यथाभूतात्मदर्शननिष्ठः शरीरस्थि
तिमात्रप्रयोजने भिक्षाटनादौ कर्मणि शरीरादिनिर्वर्त्ये नैव किंचित्करोम्यहं गुणा गुणेषु वर्तंत इत्येवं सदा परिसंचक्षाण आ
त्मनः कर्तृत्वाभावं पश्यन्नैव किंचिद्भिक्षाटनादिकं कर्म करोति लोकव्यवहारसामान्यदर्शनेन तु लौकिकैरारोपितकर्तृत्वाद्भि
क्षाटनादिकं कर्म करोति लोकव्यवहारसामान्यदर्शनेन तु लौकिकैरारोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति स्वानुभवे

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः । समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥ गतसंगस्य मुक्तस्य
ज्ञानावस्थितचेतसः । यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥ ॥ ॥ ॥

ननु शास्त्रप्रमाणजनितेनाकर्तृत्वेन स एवं पराध्यारोपितकर्तृत्वः शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकं कर्म कृत्वापि न
निबध्यते बंधहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निदग्धत्वादित्युक्तानुवाद एवैषः । त्यक्त्वा कर्मफलासंगमित्यनेन श्लोकेन यः
प्रारब्धकर्मा सन् यदा निष्क्रियब्रह्मात्मदर्शनसंपन्नः स्यात्तदा तस्यात्मनः कर्तृकर्मप्रयोजनाभावदर्शिनः कर्मपरित्यागे प्रा
प्ते कुतश्चिन्निमित्तात्तदसंभवे सति पूर्ववत्तस्मिन्कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति स इति कर्माभावः प्रदर्शितो य
स्यैवं कर्माभावो दर्शितः तस्यैव गतसंगस्य सर्वतो निवृत्तासक्तेर्मुक्तस्य निवृत्तधर्माधर्मादिबंधस्य ज्ञानावस्थितचेत
सो ज्ञान एव अवस्थितं चेतो यस्य स ज्ञानावस्थितचेताः तस्य यज्ञाय यज्ञनिर्वृत्त्यर्थं आचरतो निर्वर्तयतः कर्म समग्रं
सहाग्रेण फलेन वर्तत इति समग्रं कर्म तत्समग्रं प्रविलीयते विनश्यतीत्यर्थः ॥ २३ ॥ ॥

गीता॰भा॰ कस्मात्पुनः कारणात् क्रियमाणं कर्म स्वकार्यारंभमकुर्वन् समग्रं प्रविलीयत इत्युच्यते यतः ब्रह्मार्पणं येन करणेन ब्रह्म
विद्धविरग्नावर्पयति तद्ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजताभावं पश्यति तदुच्य
२१ ते ब्रह्मैवार्पणमिति यथा यद्रजतं तच्छुक्तिकेति ब्रह्म अर्पणमित्यसमस्ते पदे यदर्पणबुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मै
वेत्यर्थः ब्रह्म हविस्तथा यद्धविर्बुद्ध्या गृह्यमाणं तद्ब्रह्मैवास्य तथा ब्रह्माग्नाविति समस्तं पदमग्निरपि ब्रह्मैव यत्र हूयते ब्रह्म
णा कर्त्रा ब्रह्मैव कर्तेत्यर्थः यत्तेन हुतं हवनक्रियापि ब्रह्मैव यत्तेन गंतव्यं फलं तदपि ब्रह्मैव ब्रह्मकर्मसमाधिना ब्रह्मैव कर्म ब्र
ह्मकर्म तत्र ब्रह्मकर्मणि समाधिर्यस्य स ब्रह्मकर्मसमाधिस्तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गंतव्यमेवं लोकसंग्रहं चिकीर्षुणा
पि क्रियमाणं कर्म परमार्थतोऽकर्म ब्रह्मबुद्ध्युपमृदितत्वात् तदेवं सति निवृत्तकर्मणोऽपि सर्वकर्मसंन्यासिनः सम्यग्दर्श
नस्तुत्यर्थं यज्ञत्वसंपादनं ज्ञानस्य सुतरामुपपद्यते यदर्पणाद्यधियज्ञे प्रसिद्धं तदस्याध्यात्मं ब्रह्मैव परमार्थदर्शिन इ
ति अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्तस्माद्ब्रह्मैवेदं सर्वमिति जानतः विदु

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना २४

षः कर्माभावः कारकबुद्ध्यभावाच्च न हि कारकबुद्धिरहितं यज्ञाख्यं कर्म दृष्टं सर्वमेवाग्निहोत्रादिकं कर्म शब्दसमर्पितदेवता
विशेषसंप्रदानादिकारकबुद्धिमत्कर्त्रभिमानफलाभिसंधिमच्च दृष्टं नोपमृदितक्रियाकारकफलभेदबुद्धिमत्कर्तृत्वाभिमा
नफलाभिसंधिरहितं वा इदं तु ब्रह्मबुद्ध्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धि कर्मातोऽकर्मैव तत्तथा च दर्शितं कर्म
ण्यकर्म यः पश्येत् कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः गुणा गुणेषु वर्तंते नैव किंचित्करोमीति युक्तो मन्येत तत्त्वविदित्या
दिभिस्तथा दर्शयंस्तत्र तत्र क्रियाकारकफलभेदबुद्ध्युपमर्दं करोति दृष्टा च काम्याग्निहोत्रादौ कामोपमर्देन काम्याग्नि देवं
होत्रादिहानिस्तथा मतिपूर्वकामतिपूर्वकत्वादीनां कर्मणां कार्यविशेषस्यारंभकत्वं दृष्टं तथेहापि ब्रह्मबुद्ध्युपमर्दितार्प
णादिकारकक्रियाफलभेदबुद्धेर्बाह्यचेष्टामात्रेण कर्मापि विदुषोऽकर्म संपद्यते अत उक्तं समग्रं प्रविलीयत इति अत्र २१
केचिदाहुर्यद्ब्रह्म तदर्पणादीनि ब्रह्मैव किलार्पणादिना कर्तृकर्मकरणसंप्रदानाधिकरणरूपेण पंचविधेन कारका

43/1943

त्मना व्यवस्थितं सत्तदेव कर्म करोति तत्र नार्पणादिषु ब्रह्मबुद्धिर्निवर्त्यते किंत्वर्पणादिषु ब्रह्मबुद्धिराधीयते यथा प्रतिमा
दौ विष्ण्वादिबुद्धिर्यथा वा नामादौ ब्रह्मबुद्धिरेवं सत्यमेवमपि स्याद्यदि ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यादत्र तु सम्यग्दर्श
नं ज्ञानयज्ञशब्दितमनेकान्यज्ञशब्दितान् क्रियाविशेषानुपन्यस्य श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञ इति ज्ञानं स्तौति
अत्र च समर्थमिदं वचनं ब्रह्मार्पणमित्यादि ज्ञानस्य यज्ञत्वसंपादनेऽन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्र
ह्मत्वाभिधानमनर्थकं स्यात् ये त्वर्पणादिषु प्रतिमायां विष्णुदृष्टिरिव ब्रह्मदृष्टिः क्षिप्यते नामादिष्विव चेति ब्रुवते न तेषां
ब्रह्मविद्योक्ता इह विवक्षिता स्यादर्पणादिविषयत्वात् ज्ञानस्य न च दृष्टिसंपादनज्ञानेन मोक्षफलं प्राप्यते ब्रह्मैव तेन गंतव्यमि
ति चोच्यते विरुद्धं च सम्यग्दर्शनमंतरेण मोक्षफलं प्राप्यत इति प्रकृतविरोधश्च सम्यग्दर्शनं च प्रकृतं कर्मण्यकर्म यः
पश्येदित्यत्रांते च सम्यग्दर्शनस्यैवोपसंहारात् श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञो ज्ञानं लब्ध्वा परां शांतिमित्यादि

दैवमेवापरे यज्ञं योगिनः पर्युपासते ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति २५ ॥

ना सम्यग्दर्शनस्तुतिमेव कर्तुं प्रवृत्तो ध्यायस्तत्र कस्मादर्पणादौ ब्रह्मदृष्टिरप्रकरणे प्रतिमायामिव विष्णुदृष्टिरुच्य
त इत्यनुपपन्नं तस्माद्यथाव्याख्यातार्थ एवायं श्लोकः २४ तत्राधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमन्येऽपि य
ज्ञा उपक्षिप्यंते दैवमेवापरे इत्यादिना दैवमेव देवा इज्यंते येन यज्ञेनासौ दैवो यज्ञस्तमेवापरे यज्ञं योगिनः कर्मिणः पर्युपा
सते कुर्वंतीत्यर्थः ब्रह्माग्नौ सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं ब्रह्म यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इत्यादिव
चनोक्तमशनायादिसर्वसंसारधर्मवर्जितं नेति नेतीति निरस्ताशेषविशेषं ब्रह्मशब्देनोच्यते विशिष्टं ब्रह्म च तदग्नि
श्च सः होमाधिकरणत्वविवक्षया ब्रह्माग्निस्तस्मिन् ब्रह्माग्नावपरेऽन्ये ब्रह्मविदः यज्ञं यज्ञशब्दवाच्यमात्मानमात्मनाम
सु यज्ञशब्दस्य पाठात् तमात्मानं यज्ञं परमार्थतः परमेव ब्रह्म संतं बुद्ध्याद्युपाधिसंयुक्तमध्यस्तसर्वोपाधिधर्मकमा
हुतिरूपं यज्ञेनैवात्मनैवोपलक्षणेनोपजुह्वति प्रक्षिपंति सोपाधिकस्यात्मनो निरुपाधिकेन परब्रह्मस्वरूपेणैव यद्दर्श
नं तस्मिन् होमस्तं कुर्वंति ब्रह्मात्मैकत्वदर्शननिष्ठाः संन्यासिन इत्यर्थः २५ ॥

गीताभा० सोयंसम्यग्दर्शनलक्षणोयज्ञोदैवयज्ञादिषुयज्ञेषूक्षिप्यते ब्रह्मार्पणमित्यादिश्लोकैः श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानय
ज्ञ इत्यादिस्तुत्यर्थं श्रोत्रादीनीन्द्रियाण्यन्ये योगिनः संयमाग्निषु जुह्वतीन्द्रियसंयमोभिधीयत इति बहुवचनं संयमाभ्यायाः संयमा
२२ यस्तेषु जुह्वति इंद्रियसंयममेव कुर्वंतीत्यर्थः शब्दादीन्विषयानन्ये इंद्रियाग्निषु इंद्रियाण्येवाग्नयस्तेष्विंद्रियाग्निषु जुह्वति श्रो
त्रादिभिरविरुद्धविषयग्रहणं होमं मन्यंते २६ किंच सर्वाणीन्द्रियकर्माणि इंद्रियाणां कर्माणि तथा प्राणकर्माणि प्राणो वा
युराध्यात्मिकस्तत्कर्माकुंचनप्रसारणादीनि तानि चापरे आत्मसंयमयोगाग्नावात्मनि संयमः आत्मसंयमः स एव
योगाग्निस्तस्मिन्नात्मसंयमयोगाग्नौ जुह्वति प्रक्षिपंति ज्ञानदीपिते स्नेहेनेव प्रदीपे विवेकविज्ञानेनोज्ज्वलाभावमा
पादिते जुह्वति विलापयंतीत्यर्थः २७ द्रव्ययज्ञास्तीर्थेषु द्रव्यविनियोगं यज्ञबुद्ध्या कुर्वंति ये ते द्रव्ययज्ञास्तपोयज्ञा ये तपस्विन
स्ते तपोयज्ञाः योगयज्ञाः प्राणायामप्रत्याहारादिलक्षणो योगो यज्ञो येषां ते योगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्च स्वाध्यायो
यथाविधि ऋगाद्यभ्यासो यज्ञो येषां ते स्वाध्याययज्ञाः ज्ञानयज्ञाः ज्ञानं शास्त्रार्थपरिज्ञानं यज्ञो येषां ते ज्ञानयज्ञाश्च यतयो यतन

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति २६ सर्वाणीन्द्रियकर्माणि प्राण
कर्माणि चापरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते २७ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञा
श्च यतयः संशितव्रताः २८ अपाने जुह्वति प्राणं प्राणेपानं तथापरे प्राणापानगती रुद्ध्वा प्राणायामपरायणाः २९ अप
रे नियताहाराः प्राणान्प्राणेषु जुह्वति सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ३० ॥

शीलाः संशितव्रताः सम्यक् शितानि तनूकृतानि तीक्ष्णीकृतानि व्रतानि येषां ते संशितव्रताः २८ किंच अपाने पानवृत्तौ जुह्वति
प्रक्षिपंति प्राणं प्राणवृत्तिं पूरकाख्यं प्राणायामं कुर्वंतीत्यर्थः प्राणेपानं तथापरे जुह्वति रेचकाख्यं प्राणायामं कुर्वंतीत्येतत् प्राणा
पानगती रुद्ध्वा मुखनासिकाभ्यां वायोर्निर्गमः प्राणस्य गतिस्तद्विपर्ययेणाधोगमनमपानस्य ते प्राणापानगती एते रुद्ध्वा प्राणा
यामपरायणाः प्राणायामतत्पराः सकुंभकं प्राणायामं कुर्वंतीत्यर्थः किंच अपरे नियताहाराः नियतः परिमित आहारो येषां
ते नियताहाराः संतः प्राणान् वायुभेदान् प्राणेष्वेव जुह्वति यस्य यस्य वायोर्जयः क्रियत इतरान् वायुभेदांस्तस्मिन् जु
ह्वति ते तत्र प्रविष्टा इव भवंति सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः यज्ञैः यथोक्तैः क्षपितो नाशितः कल्मषः कर्ममलो ये
षां ते यज्ञक्षपितकल्मषाः ३० ॥ ॥ ॥ ॥ ॥

देसंबु
२२

45
1943

एवं यथोक्तान्यज्ञान् निर्वर्त्य यज्ञशिष्टामृतभुजो यज्ञानां शिष्टं यज्ञशिष्टं तच्च तदमृतं च यज्ञशिष्टामृतं तद्भुंजत इति यज्ञशिष्टा
मृतभुजो यथोक्तान् यज्ञान् कृत्वा तच्छिष्टेन कालेन यथाविधिचोदितमन्नममृताख्यं भुंजत इति यज्ञशिष्टामृतभुजो यांति
गच्छंति ब्रह्म सनातनं चिरंतनं मुमुक्षवश्चेत् कालातिक्रमापेक्षया इति सामर्थ्याद्गम्यते नायं लोकः सर्वप्राणिसाधारणोस्ति य
थोक्तानां यज्ञानामेकोपि यज्ञो यस्य नास्ति सोऽयज्ञस्तस्य कुतोन्यो विशिष्टसाधनसाध्यः कुरुसत्तम ३१ एवं यथोक्ता बहु
विधा बहुप्रकारा यज्ञा वितता विस्तीर्णा ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेणावगम्यमाना ब्रह्मणो मुखे वितता उच्यंते तद्यथा
वाचि हि प्राणं जुहुम इत्यादयः कर्मजान् कायिकवाचिकमानसिककर्मोद्भवान् विद्धि तान् सर्वान् आत्मजान् निर्व्यापारो
ह्यात्मा तत एवं ज्ञात्वा विमोक्ष्यसे अशुभात् न मद्व्यापारा एवैते निर्व्यापारोहमुदासीन इत्येवं ज्ञात्वा अस्मात्सम्यग्दर्शनान्मोक्ष्यसे
संसारबंधनादित्यर्थः ३२ ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितं यज्ञाश्चानेक उपदिष्टास्तैः सिद्धपु

यज्ञशिष्टामृतभुजो यांति ब्रह्म सनातनं नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ३१ एवं बहुविधा यज्ञा वितता ब्र
ह्मणो मुखे कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ३२ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप सर्वं कर्माखि
लं पार्थ ज्ञाने परिसमाप्यते ३३ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ३४

रुषार्थप्रयोजनं ज्ञानं स्तूयते कथं श्रेयान् द्रव्यमयात् द्रव्यसाधनसाध्यात् यज्ञात् ज्ञानयज्ञः परंतप द्रव्यमयो हि यज्ञः
फलस्यारंभको न ज्ञानयज्ञः फलारंभकोऽतः श्रेयान् प्रशस्यतरः कथं यतः सर्वं कर्म समस्तमखिलं अप्रतिबद्धं पार्थ ज्ञाने
मोक्षसाधने सर्वतः संप्लुतोदकस्थानीये परिसमाप्यते अंतर्भवतीत्यर्थः यथा कृताय विजितायाधरेयाः संयंत्येवमेनं सर्वं
तदभिसमेति यत्किंच प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेद इति श्रुतेः ३३ तदेतद्विशिष्टं ज्ञानं तर्हि केन प्राप्यत इत्युच्यते त
द्विद्धि जानीहि येन विधिना प्राप्यत इत्याचार्यानभिगम्य प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन क
थं बंधः कथं मोक्षः का विद्या का चाविद्येति परिप्रश्नेन सेवया गुरुशुश्रूषयेत्येवमादिना प्रश्रयेणावर्जिता आचार्या उपदेक्ष्यं
ति कथयिष्यंति ते ज्ञानं यथोक्तविशेषणं ज्ञानिनो ज्ञानवंतोपि केचिद्यथावत्तत्त्वदर्शनशीला अपरे न भवंति अतो विशिन
ष्टि तत्त्वदर्शिन इति ये सम्यग्दर्शिनस्तैरुपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरदिति भगवतो मतं ॥ ३४ ॥

तथाच सतीदमपि समर्थं वचनं यत् ज्ञात्वा यत् ज्ञानं वक्ष्यमाणं उपदिष्टं अधिगम्य पुनर्भूयो मोहम् एवं यथा इदानीं मोहं गतोऽसि पुनरेवं यास्य
सि हे पाण्डव किंच येन ज्ञानेन भूतानि अशेषेण ब्रह्मादीनि स्तम्बपर्यन्तानि द्रक्ष्यसि साक्षात् आत्मनि प्रत्यगात्मनि मत्संस्थानि मानीमा
२३ नीति अथो अपि मयि वासुदेवे परमेश्वरे इमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः ३५ किंचैतस्य ज्ञान
स्य माहात्म्यम् अपि चेदसि पापेभ्यः पापकृद्भ्यः सर्वेभ्यो अतिशयेन पापकृत् पापकृत्तमः सर्वं ज्ञानप्लवेनैव ज्ञानमेव प्लवं कृत्वा वृजिनं वृ
जिनार्णवं सर्वपापं संतरिष्यसि धर्मोऽपि इह मुमुक्षोः पापमुच्यते यथा धांसि काष्ठानि समिद्धः सम्यगिद्धो दीप्तोऽग्निः भस्मसात् भस्म
भावं कुरुतेऽर्जुन ज्ञानमेवाग्निः ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा निर्बीजीकुरुते इत्यर्थः न हि साक्षादेव ज्ञानाग्निः कर्माण्यि
न्धनवत् भस्मीकर्तुं शक्नोति तस्मात् सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वकारणमित्यर्थोऽभिप्रायः सामर्थ्यात् येन कर्मणा शरीरमार
ब्धं तत् प्रवृत्तफलत्वात् उपभोगेनैव क्षीयते अतो यान्यप्रवृत्तफलानि ज्ञानात्प्राक् कृतानि ज्ञानसहभावीनि च अतीतानेकजन्म
कृतानि च तान्येव सर्वाणि भस्मसात्कुरुते ३७ यत एवमतः नहि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धिकरमिह विद्यते तत्
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ३५ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः स
र्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ३६ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा
३७ नहि ज्ञानेन सदृशं पवित्रमिह विद्यते तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ३८ श्रद्धावाँल्लभते ज्ञानं तत्परः सं
यतेन्द्रियः ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ३९ ॥
ज्ञानं स्वयमेव योगसंसिद्धो योगेन कर्मयोगेन समाधियोगेन च संसिद्धः संस्कृतो योग्यतामापन्नः सन् मुमुक्षुः कालेन महता आत्म
नि विन्दति लभते इत्यर्थः ३८ येनैकान्तेन ज्ञानप्राप्तिर्भवति स उपाय उपदिश्यते श्रद्धावान् श्रद्धालुर्लभते ज्ञानं श्रद्धालुत्वेऽपि भवति हेरंबु
कश्चिन्मन्दप्रस्थानः अत आह तत्परः गुरूपासनादौ अभियुक्तो ज्ञानलब्ध्युपाये श्रद्धावांस्तत्परोऽप्यजितेन्द्रियः स्यात् इत्यत आह संयते
न्द्रियः संयतानि विषयेभ्यो निवर्तितानि यस्येन्द्रियाणि स संयतेन्द्रियः य एवंभूतः श्रद्धावान् तत्परः संयतेन्द्रियश्च सोऽवश्यं ज्ञानं ल
भते प्रणिपातादिस्तु बाह्योऽनैकान्तिकोऽपि भवति मायावित्वादिसंभवात् न तु तथा तत् श्रद्धावत्त्वादीत्यैकान्तिकं ज्ञानलब्ध्युपायः किं २३
पुनर्ज्ञानलाभात् स्यादित्युच्यते ज्ञानं लब्ध्वा परां मोक्षाख्यां शान्तिमुपरतिमचिरेणाधिगच्छति क्षिप्रमेवाधिगच्छति सम्यग्दर्शनात् क्षिप्र
मोक्षो भवतीति सर्वशास्त्रन्यायप्रसिद्धः सुनिश्चितोऽर्थः अत्र संशयो न कर्तव्यः ३९ ॥

47/1943

पापिष्ठो हि संशयः कथमित्युच्यते अज्ञश्चानात्मज्ञोऽश्रद्दधानश्च संशयात्मा च विनश्यति अज्ञाश्रद्दधानौ यद्यपि विनश्यतो न तथा
यथा संशयात्मा संशयात्मा तु पापिष्ठः सर्वेषां कथं नायं लोकः साधारणोऽप्यस्ति तथा न परो लोको न सुखं तत्रापि संशयोपपत्तेः
संशयात्मनः संशयचित्तस्य तस्मात् संशयो न कर्तव्यः ४० कस्मात् योगसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्य
स्तानि कर्माणि येन परमार्थदर्शिना धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणं कथं योगसंन्यस्तकर्मेत्याह ज्ञानसंछिन्नसंशयं
ज्ञानेनात्मेश्वरैकत्वदर्शनलक्षणेन संछिन्नः संशयो यस्य स ज्ञानसंछिन्नसंशयः एवं योगसंन्यस्तकर्माणं आत्मवन्तमप्रमत्तं
गुणचेष्टारूपेण दृष्टानि कर्माणि न निबध्नन्ति अनिष्टादिरूपं फलं नारभन्ते हे धनंजय ४१ यस्मात् कर्मयोगानुष्ठानादशुद्धिक्ष
यहेतुकज्ञानसंछिन्नसंशयो न निबध्यते कर्मभिर्ज्ञानाग्निदग्धकर्मत्वादेव यस्माच्च ज्ञानकर्मानुष्ठानविषये संशयवान् विनश्य
ति तस्मात् पापिष्ठम् अज्ञानसंभूतमज्ञानादविवेकाज्जातं हृत्स्थं हृदि बुद्धौ स्थितं ज्ञानासिना ज्ञानं शोकमोहादिदोषहरं सम्यग्दर्शनं
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ४० योगसंन्यस्तकर्माणं ज्ञानसंछिन्न
संशयं आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ४१ तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः छित्त्वैनं संशयं योगमाति
ष्ठोत्तिष्ठ भारत ४२ ओं तत्सदिति श्रीमद्भगवद्गीता० चतुर्थोऽध्यायः ४ ॥
ज्ञानं तदेवासिः तेन ज्ञानासिना आत्मनः स्वस्य आत्मविषयत्वात् संशयस्य न हि परस्य संशयः परेणाच्छेत्तव्यतां प्राप्तः येन स्वस्येति वि
शेष्यते अत आत्मविषयोऽपि स्वस्यैव भवति छित्त्वैनं संशयं स्वविनाशहेतुभूतं योगं सम्यग्दर्शनोपायं कर्मानुष्ठानमातिष्ठ कुर्वि
त्यर्थः उत्तिष्ठ च युद्धायेदानीं भारत ४२ इति श्रीभगवद्गीताभाष्ये शंकरभगवतः कृतौ ब्रह्मयज्ञप्रशंसा नाम चतुर्थोऽध्यायः ४
ॐ नमो भगवते वासुदेवाय नमः ॥ कर्मण्यकर्म यः पश्येदित्यारभ्य स युक्तः कृत्स्नकर्मकृत् ज्ञानाग्निदग्धकर्माणं शारीरं केव
लं कर्म कुर्वन् यदृच्छालाभसंतुष्टः ब्रह्मार्पणं ब्रह्म हविः कर्मजान्विद्धि तान्सर्वान् सर्वं कर्माखिलं पार्थ ज्ञानाग्निः सर्वकर्माणि
योगसंन्यस्तकर्माणमित्यन्तैर्वचनैः सर्वकर्मणां संन्यासमवोचत् भगवान् छित्त्वैनं संशयं योगमातिष्ठेत्यनेन वचनेन योगं च क
र्मानुष्ठानकर्मसंन्यासयोः स्थितिगतिवत् परस्परविरोधादेकेन सह कर्तुमशक्यत्वात् कालभेदेन चानुष्ठानविधानाभावादर्था
देतयोरन्यतरकर्तव्यतायां प्राप्तायां यत्प्रशस्यतरं तत्कर्तव्यं नेतरदित्येवं मन्यमानः ॥

प्रशास्यतरं बुभुत्सया अर्जुन उवाच संन्यासं कर्मणां कृष्णेत्यादि ननु चात्मविदो ज्ञानयोगेन निष्ठां प्रतिपिपादयिषन् पूर्वोदा
हृतैर्वचनैर्भगवान् सर्वकर्मसंन्यासमवोचन्न त्वनात्मज्ञस्यातश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपुरुषविषयत्वादन्यतरस्य प्रशा
स्यतरत्वबुभुत्सयायं प्रश्नोऽनुपपन्नः सत्यमेवं त्वदभिप्रायेण प्रश्नो नोपपद्यते प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति वदा
मः कथं पूर्वोदाहृतैर्वचनैर्भगवता कर्मसंन्यासस्य कर्तव्यतया विवक्षितत्वात् प्राधान्यमन्तरेण च कर्तारं तस्य कर्तव्यत्वासंभ
वादात्मविदपि कर्तोपक्षिप्यमाणोऽनूद्यत एव न पुनरनात्मवित्कर्तृकत्वमेव संन्यासस्य विवक्षितमित्येवं मन्वानस्यार्जुनस्य कर्मानुष्ठान
कर्मसंन्यासयोरविद्वत्पुरुषकर्तृकत्वमप्यस्तीति पूर्वोक्तेन प्रकारेण तयोः परस्परविरोधादन्यतरस्य कर्तव्यत्वे प्राप्ते प्रशस्यत
रं च कर्तव्यं नेतरदिति प्रशस्यतरविविदिषया प्रश्नोऽनानुपपन्नः प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्राय एवमेवेति
गम्यते कथं संन्यासकर्मयोगौ निःश्रेयसकरौ तयोस्तु कर्मयोगो विशिष्यत इति प्रतिवचनमेतन्निरूप्यं किमनेनात्मवित्कर्तृ
कयोः संन्यासकर्मयोगयोर्निःश्रेयसकरत्वं प्रयोजनमुक्त्वा तयोरेव कुतश्चिद्विशेषात् कर्मसंन्यासात् कर्मयोगस्य विशि
ष्टत्वमुच्यते अहोस्विदनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत इति किं वानात्मवित्कर्तृकयोः सं
न्यासकर्मयोगयोस्तदुभयमुच्यत इति किं चातो यद्यात्मवित्कर्तृकयोः संन्यासकर्मयोगयोर्निःश्रेयसकरत्वं तयोस्तु क
र्मसंन्यासात् कर्मयोगस्य विशिष्टत्वमुच्यते यदि चानात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत इति अत्रोच्य
ते आत्मवित्कर्तृकयोः संन्यासकर्मयोगयोरसंभवात्तयोः निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासात् कर्मयोगस्य वि
शिष्टत्वाभिधानमित्येतदुभयमनुपपन्नं यद्यनात्मविदः सर्वकर्मसंन्यासस्तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयोगः सं
भवेतां तदा तयोर्निःश्रेयसकरत्वोक्तिः कर्मयोगस्य च कर्मसंन्यासाद्विशिष्टत्वाभिधानमित्येतदुभयमुपपद्येत आत्मवि
दस्तु संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्वाभिधानं कर्मसंन्यासाच्च कर्मयोगो विशिष्यत इति चानुपपन्नं अ
त्राह किमात्मविदः संन्यासकर्मयोगयोरुभयोरप्यसंभव आहोस्विदन्यतरस्य यदा चान्यतरस्यासंभवस्तदापि किं कर्मसं
न्यासस्योत कर्मयोगस्यासंभवः स्यात् नन्वादिसर्वक्रियारहितत्वं निःक्रियमात्मानमात्मत्वेन यो वेत्ति तस्यात्मविदः स
म्यग्दर्शनेनापास्तमिथ्याज्ञानस्य निष्क्रियात्मस्वरूपावस्थानलक्षणं सर्वकर्मसंन्यासमुक्त्वा तद्विपरीतस्य मिथ्याज्ञानमू

हेरंब
२४

49
1943

लकर्तृत्वाभिमानपुरःसरस्य सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्येह शास्त्रे तत्र तत्रात्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञान
मिथ्याज्ञानतत्कार्यविरोधादभावः प्रतिपाद्यते तस्मात्तस्मादात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः कर्मयोगो न संभव
तीति युक्तमुक्तं स्यात् केषु केषु पुनरात्मस्वरूपनिरूपणप्रदेशेष्वात्मविदः कर्माभावः प्रतिपाद्यत इत्यत्रोच्यते अविनाशि तु तद्विद्धी
ति प्रकृत्य य एनं वेत्ति हन्तारं वेदाविनाशिनं नित्यमित्यादौ तत्र तत्रात्मविदः कर्माभाव उच्यते ननु च कर्मयोगोऽप्यात्मस्वरूपनिरूप
णप्रदेशेषु प्रतिपाद्यत एव यथा तस्माद्युध्यस्व भारत स्वधर्ममपि चावेक्ष्य कर्मण्येवाधिकारस्ते इत्यादौ तस्य कथमात्म
विदः कर्मयोगस्यासंभवः स्यादिति अत्रोच्यते सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् ज्ञानयोगेन सांख्यानामित्यनेन सांख्या
नामात्मतत्त्वविदामनात्मवित्कर्तृकर्मयोगनिष्ठातो निष्क्रियात्मस्वरूपावस्थानलक्षणाया ज्ञानयोगनिष्ठायाः पृथक्करणात्
कृतकृत्यत्वेनात्मविदः प्रयोजनान्तराभावात्तस्य कार्यं न विद्यत इति कर्तव्यान्तराभाववचनाच्च न कर्मणामनारंभान्नैष्कर्म्यं संन्या
सस्तु महाबाहो दुःखमाप्तुमयोगतः इत्यादिना चात्मज्ञानाङ्गत्वेन कर्मयोगस्य विधानात् योगारूढस्य तस्यैव शमः कारणमुच्य
त इत्यनेन चोत्पन्नसम्यग्दर्शनस्य कर्मयोगाभाववचनाच्छारीरं केवलं कर्म कुर्वन्निति च शारीरस्थितिमात्रप्रयुक्तेष्वपि दर्शन
श्रवणादिकर्मसु आत्मयाथात्म्यविदः करोमीति प्रत्ययस्य समाहितचेतस्तया सदा कर्तव्यतोपदेशादात्मतत्त्वविदः सम्यग्दर्शनवि
रुद्धमिथ्याज्ञानहेतुकः कर्मयोगः स्वप्नेऽपि न संभावयितुं शक्यते यस्मात्तस्मादनात्मवित्कर्तृकयोरेव संन्यासकर्मयोगयोर्निःश्रे

अर्जुन उवाच संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं १

यसकरत्ववचनं तदीयाच्च कर्मसंन्यासात्पूर्वोक्तात्मवित्कर्तृकसर्वकर्मसंन्यासविलक्षणात्सत्येव कर्तृत्वविज्ञाने कर्मैकदेशविषया
द्यमनियमादिसहितत्वेन दुरनुष्ठेयत्वात् कर्मयोगस्य विशिष्टत्वाभिधानमित्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि पूर्वो
क्तः प्रष्टुरभिप्रायो निश्चीयत इति स्थितं अथवा ज्यायसी चेत्कर्मणस्ते इत्यत्र ज्ञानकर्मणोः सहासंभवेन यच्छ्रेय एतयोस्तद्ब्रूहि
त्येवं पृष्टोऽर्जुनेन भगवान् ज्ञानयोगेन सांख्यानां संन्यासिनां निष्ठा कर्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयं चकार न च संन्यसनादे
व केवलात्सिद्धिं समधिगच्छतीति वचनात् ज्ञानसहितस्य सिद्धिसाधनत्वमिष्टं कर्मयोगस्य च विधानात् ज्ञानरहितः संन्या
सः श्रेयान् किं कर्मयोगः श्रेयानिति तयोर्विशेषबुभुत्सया अर्जुन उवाच संन्यासं परित्यागं कर्मणां शास्त्रीयाणामनुष्ठानवि
शेषाणां शंससि कथयसीत्येतत् पुनर्योगं च तेषामेवानुष्ठानमवश्यकर्तव्यत्वं शंससि अतो मे कतरत् श्रेय इति संशयः किं कर्मानुष्ठा

गीताभाष्य नं श्रेयः किंवातयोर्ध्यार्यमिति मन्यसे तरं वानुष्ठेयमतश्च यच्छ्रेयः प्रशस्यतरमेतयोः कर्मसन्यासकर्मानुष्ठानयोर्यदनुष्ठानात् श्रेयो
वाप्तिर्मम स्यादिति मन्यसे तदेकमन्यतरत्सहैकपुरुषानुष्ठेयत्वासंभवान्मह्यं ब्रूहि सुनिश्चितमभिप्रेतं तवेति १ स्वाभिप्रायमाचक्षा
२५. णो निर्णयाय श्रीभगवानुवाच सन्यासः कर्मणां परित्यागः कर्मयोगश्च तेषामनुष्ठानं तावुभावपि निःश्रेयसकरौ निःश्रेयसं मोक्षं कु
र्वाते ज्ञानोत्पत्तिहेतुत्वेन उभावपि यद्यपि निःश्रेयसकरौ तथापि तयोस्तु निःश्रेयसहेत्वोः कर्मसन्यासात् केवलात् कर्मयोगो विशिष्यत
इति कर्मयोगं स्तौति २ कस्मादित्याह ज्ञेयो ज्ञातव्यः स कर्मयोगी नित्यसन्यासीति यो न द्वेष्टि न किंचित् न कांक्षति दुःखसुखे तत्सा
धने च एवं विधो यः कर्मणि प्रवर्तमानोपि स नित्यसन्यासीति ज्ञातव्य इत्यर्थः निर्द्वन्द्वो द्वन्द्ववर्जितो हि यस्मान्महाबाहो सुखं बंधादना
यासेन प्रमुच्यते ३ सन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोः फलेपि विरोधो युक्तो न तूभयोर्निःश्रेयसकरत्वमेवेति
प्राप्त इदमुच्यते सांख्ययोगौ पृथग्विरुद्धभिन्नफलौ बालाः प्रवदन्ति न पंडिताः पंडितास्तु ज्ञानिनः एकं फलमविरुद्धमिच्छंति कं

श्रीभगवानुवाच सन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ तयोस्तु कर्मसन्यासात्कर्मयोगो विशिष्यते २ ज्ञेयः स नित्यस
न्यासी यो न द्वेष्टि न कांक्षति निर्द्वन्द्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ३ सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः
एकमप्यास्थितः सम्यगुभयोर्विंदते फलं ४ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सांख्यं च योगं च यः पश्यति स
पश्यति ५

थमेकमपि सांख्ययोगयोः सम्यगास्थितः सम्यगनुष्ठितवानित्यर्थः उभयोर्विंदते फलं उभयोस्तदेव हि निःश्रेयसं फलमतो न
फले विरोधोस्ति न तु सन्यासकर्मयोगशब्देन प्रकृतं सांख्ययोगयोः फलैकत्वं कथमिति प्रश्ने ब्रवीतीति न एष दोषः यद्यप्यर्जुनेन सन्यासं
कर्मयोगं च केवलमभिप्रेत्य प्रश्नः कृतो भगवांस्तु तदपरित्यागेनैव स्वाभिप्रेतं च विशेषं संयोज्य शब्दांतरवाच्यतया प्रतिवचनं ददौ सां
ख्ययोगाविति तावेव सन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगशब्दवाच्याविति भगवतो मतमतो न प्रक हरव्
तप्रक्रियेति ४ एकस्यापि सम्यगनुष्ठानात्कथमुभयोः फलं विंदत इत्युच्यते यत्सांख्यैर्ज्ञाननिष्ठैः सन्यासिभिः प्राप्यते स्थानं
मोक्षाख्यं तद्योगैरपि ज्ञानप्राप्त्युपायत्वेन ईश्वरे समर्प्य कर्माण्यात्मनः फलमनभिसंधायानुतिष्ठंति ये ते योगा योगिनस्तैरपि पर २५.
मार्थज्ञानसन्यासप्राप्तिद्वारेण गम्यत इत्यभिप्रायः तदेकं सांख्यं च योगं च यः पश्यति स पश्यति फलैकत्वात्सम्यक् पश्यतीत्यर्थः ५

SJ
1968

एवं तर्हि योगात् सन्यास एव विशिष्यते कथं तर्हि इदमुक्तं तयोस्तु कर्मसन्यासात्कर्मयोगो विशिष्यत इति शृणु तत्र कारणं त्वया पृष्टं
केवलं कर्मसन्यासं कर्मयोगं चाभिप्रेत्य तयोरन्यतरः कः श्रेयानिति तदनुरूपं प्रतिवचनं मयोक्तं कर्मसन्यासात् कर्मयोगो विशिष्य
त इति ज्ञानमनपेक्ष्य ज्ञानसव्यपेक्षस्तु सन्यासः सांख्यमिति मयाभिप्रेतः परमार्थयोगश्च स एव यस्तु कर्मयोगो वैदिकः स ताद
र्थ्यात् योगः सन्यास इति चोपचर्यते कथं तादर्थ्यमित्युच्यते सन्यासस्तु पारमार्थिको महाबाहो दुःखमाप्तुमयोगतः योगेन विना
योगयुक्तो वैदिकेन कर्मणा योगेनेश्वरसमर्पितरूपेण फलनिरपेक्षेण युक्तो मुनिर्मननादीश्वरस्वरूपस्य मुनिर्ब्रह्म परमात्मज्ञान
लक्षणत्वात् प्रकृतः सन्यासो ब्रह्मोच्यते सन्यासं न्यास इति ब्रह्म ब्रह्मा हि पर इति श्रुतेर्ब्रह्म परमार्थसन्यासं परमात्मज्ञाननिष्ठाल
क्षणं नचिरेण क्षिप्रमेवाधिगच्छति प्राप्नोति अतो मयोक्तं कर्मयोगो विशिष्यत इति ६ यदा पुनरयं सम्यग्दर्शनप्राप्त्युपायत्वेन
योगेन युक्तो योगयुक्तो विशुद्धात्मा विशुद्धसत्त्वो विजितात्मा विजितदेहो जितेंद्रियश्च सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादिस्तंबपर्यं

सन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ६ योगयुक्तो विशुद्धात्मा विजिता
त्मा जितेंद्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ७ नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् पश्यन् शृण्वन् स्पृ
शन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ८ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि इंद्रियाणींद्रियार्थेषु वर्तंत इति धार
यन् ९ ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवांभसा १० ॥ ॥

तानां भूतानामात्मभूत आत्मा प्रत्यक्चेतनो यस्य सः सर्वभूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः स तत्रैवं वर्तमानो लोकसंग्रहाय क
र्म कुर्वन्नपि न लिप्यते न कर्मभिर्बध्यत इत्यर्थः ७ न चासौ परमार्थतः करोतीत्यतः नैव किंचित्करोमीति युक्तः समाहितः सन् मन्येत चिं
तयेत् तत्त्ववित् आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित् परमार्थदर्शीत्यर्थः कदा कथं वा तत्त्वमवधारयन्मन्येत इत्युच्यते मन्येतेति पूर्वेण संबं
धः यस्यैवं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मस्वकर्मैव पश्यतः सम्यग्दर्शिनस्तस्य सर्वकर्मसन्यास एवाधिकारः कर्मणोभावदर्श
नात् नहि मृगतृष्णिकायामुदकबुद्ध्या पानाय प्रवर्तित उदकाभावज्ञानेपि तत्रैव पानप्रयोजनाय प्रवर्तते ९ यस्तु पुनरतत्त्ववित् प्रवृ
त्तश्च कर्मयोगे ब्रह्मणि ईश्वरे आधाय निक्षिप्य तदर्थं करोमीति भृत्य इव स्वाम्यर्थं सर्वाणि कर्माणि मोक्षेपि फले संगं त्यक्त्वा करोति यः
सर्वकर्माणि लिप्यते न स पापेन न संबध्यते पद्मपत्रमिवांभसा उदकेन १० ॥ ॥ ॥

गीताभा०

२६

फलं सत्त्वशुद्धिमात्रफलमेव तस्य तत्कर्मणः स्यात् कायेन देहेन मनसा बुद्ध्या च केवलैर्ममत्ववर्जितैरपीन्द्रियैः आगमे च कौन्तेय
मिन मम फलायेति ममत्वबुद्धिशून्यैः केवलैरिन्द्रियैरपि केवलशब्दः कायादिभिरपि प्रत्येकं संबध्यते सर्वव्यापारेषु ममतावर्जितैः
योगिनः कर्मिणः कर्म कुर्वन्ति संगं त्यक्त्वा फलविषयमात्मशुद्धये सत्त्वशुद्धये इत्यर्थः ११ तस्मात्तत्रैव तवाधिकार इति कुरु कर्मै
व यस्माच्च युक्त ईश्वराय कर्माणि न मम फलायेत्येवं सुसमाहितः सन् कर्मफलं त्यक्त्वा परित्यज्य शान्तिं मोक्षाख्यामाप्नोति नैष्ठि
कीं निष्ठायां भवां सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः यस्तु पुनरयुक्तः असमाहितः कामकारेण
करणं कारः कामस्य कारः कामकारस्तेन कामकारेण कामप्रेरिततयेत्यर्थः मम फलाय इदं करोमि कर्मेत्येवं फले सक्तो नि
बध्यते अतस्त्वं युक्तो भवेत्यर्थः १२ यस्तु परमार्थदर्शी सः सर्वाणि कर्माणि सर्वकर्माणि संन्यस्य परित्यज्य नित्यं नैमित्तिकं काम्यं
प्रतिषिद्धं च सर्वाणि कर्माणि तानि मनसा विवेकबुद्ध्या कर्मादावकर्मदर्शनेन संत्यज्येत्यर्थः आस्ते तिष्ठति सुखं त्यक्तवाङ्मनःकाय

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि योगिनः कर्म कुर्वन्ति संगं त्यक्त्वात्मशुद्धये ११ युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नो
ति नैष्ठिकीं अयुक्तः कामकारेण फले सक्तो निबध्यते १२ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही नैव कुर्वन्

चेष्टः निरायासः प्रसन्नचित्तः आत्मनोऽन्यत्र निवृत्तबाह्यसर्वप्रयोजन इति सुखमास्त इत्युच्यते वशी जितेन्द्रिय इत्यर्थः नैव कुर्वन्न कारयन् क
थमास्त इत्याह नवद्वारे पुरे सप्त शीर्षण्यान्यात्मन उपलब्धिद्वाराण्यर्वाक् द्वे मूत्रपुरीषविसर्गार्थे तैर्द्वारैर्नवद्वारं पुरमुच्यते शरीरं पुर
मिव पुरं एकस्वामिकं तदर्थप्रयोजनैश्चेन्द्रियमनोबुद्धिविषयैरनेकफलविज्ञानस्योत्पादकैः पौरैरिवाधिष्ठितं तस्मिन्नवद्वारे
पुरे देही सर्वकर्म संन्यस्यास्ते किं विशेषणेन सर्वो हि देही संन्यास्यसंन्यासी वा देह एवास्ते तत्रानर्थकं विशेषणमित्युच्यते
यस्त्वज्ञो देही देहेन्द्रियसंघातमात्रात्मदर्शी स सर्वो गेहे भूमावासने वास इति मन्यते न हि देहमात्रात्मदर्शिनो गेह इव देह आस इति
प्रत्ययः संभवति देहादिसंघातव्यतिरिक्तात्मदर्शिनस्तु देह आस इति प्रत्यय उपपद्यते परकर्मणां च परस्मिन्नात्मन्यविद्ययाध्या
रोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते उत्पन्नविवेकज्ञानस्य सर्वकर्मसंन्यासिनोऽपि गेह इव देह एव नवद्वारे पु
र आसनं प्रारब्धफलकर्मसंस्कारशेषानुवृत्त्या देह एव विशेषविज्ञानोत्पत्तेर्देह एवास्त इत्यस्त्येव विशेषणफलं विद्वदविद्व
त्प्रत्ययभेदापेक्षत्वात् यद्यपि कार्यकरणकर्माणि अविद्ययात्मन्यध्यारोपितानि संन्यस्यास्त इत्युक्तमात्मसमवायि तु कर्तृत्वं

53
1942

कारयितृत्वं च स्यादित्याशंक्याह नैव कुर्वन् स्वयं न च कार्यकरणानि कारयन् क्रियासु प्रवर्तयन् किं यत्तत्कर्तृत्वं च कारयितृत्वं
च देहिनः स्वात्मसमवायि सत्संन्यासान्न भवति यथा गच्छतो गतिः गमनव्यापारपरित्यागे न स्यात् किं वा स्वत एवात्मनो नास्ती
त्युच्यते नास्त्यात्मनः स्वतः कर्तृत्वं कारयितृत्वं चोक्तं ह्यविकार्योऽयमुच्यते शरीरस्थोऽपि कौन्तेय न करोति न लिप्यत इति ध्याय
तीव लेलायतीवेति श्रुतेः १३ किंच न कर्तृत्वं स्वतः कुर्विति नापि कर्माणि रथघटप्रासादादीनि ईप्सिततमानि लोकस्य सृजति उ
त्पादयति प्रभुरात्मा नापि रथादिकृतवतस्तत्फलेन संयोगं न कर्मफलसंयोगं यदि किंचिदपि स्वतो न करोति न कारयति च देही क
स्तर्हि कारयन् कुर्वंश्च प्रवर्तत इत्युच्यते स्वभावस्तु स्वो भावः स्वभावोऽविद्यालक्षणा प्रकृतिर्माया प्रवर्तते दैवी ह्येषा गुणमयीति १४ पर
मार्थतस्तु नादत्ते न च गृह्णाति भक्तस्यापि कस्यचित् पापं नैव चादत्ते सुकृतं विभुः सुकृतं भक्तैः प्रयुक्तं विभुः किमर्थं तर्हि भक्तैः पू
जादिलक्षणं यागदानहोमादि च सुकृतं प्रयुज्यत इत्याह अज्ञानेनावृतं विवेकज्ञानं तेन मुह्यन्तीति करोमि कारयामि भोक्ष्ये भो

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते १४ नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः १५ ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं
॥१६ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः १७

जयामीत्येवं मोहं गच्छन्ति अविवेकिनः संसारिणो जन्तवः १५ ज्ञानेन तु येनाज्ञानेनावृता मुह्यन्ति जन्तवः तदज्ञानं येषां जन्तूनां
विवेकज्ञानेनात्मविषयेण नाशितमात्मनो भवति तेषां जन्तूनामादित्यवद्यथादित्यः समस्तं रूपजातमवभासयति तद्वत् ज्ञानं ज्ञेयं
वस्तु सर्वं प्रकाशयति तत्परमात्मतत्त्वं परमार्थतत्त्वं १६ यत्परं परमार्थतत्त्वं ज्ञानं प्रकाशितं तस्मिन्गता बुद्धिर्येषां ते तद्बुद्ध
यस्तदात्मानस्तदेव परं ब्रह्मात्मा येषां ते तदात्मानः तन्निष्ठा निष्ठा अभिनिवेशस्तात्पर्यं सर्वाणि कर्माणि संन्यस्य ब्रह्मण्ये
वावस्थानं येषां ते तन्निष्ठास्तत्परायणाश्च तदेव परमयनं परा गतिर्येषां भवति ते तत्परायणाः केवलात्मरतय इत्यर्थः येषां
ज्ञानेन नाशितमात्मनोऽज्ञानं ते गच्छन्त्येवंविधा अपुनरावृत्तिं पुनर्देहसंबन्धं ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धू
तो नाशितः कल्मषः पापादिसंसारकारणं दोषो येषां ते ज्ञाननिर्धूतकल्मषाः यतय इत्यर्थः १७ ॥

यषां ज्ञानेन नाशितमात्मनोऽज्ञानं ते पंडिताः कथं तत्त्वं पश्यंतीत्युच्यते विद्याविनयसंपन्ने विद्या च विनयश्च विद्याविनयौ वि
द्या आत्मनो बोधो विनय उपशमः ताभ्यां विद्याविनयाभ्यां संपन्नो विद्वान् विनीतश्च यो ब्राह्मणस्तस्मिन्ब्राह्मणे गवि हस्तिनि
२० शुनि चैव श्वपाके च पंडिताः समदर्शिनो विद्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्त्विके मध्यमायां च राजस्यां गवि संस्का
रहीनायामत्यंतमेव केवलतामसे हस्त्यादौ च सत्त्वादिगुणैस्तजैश्च संस्कारैस्तथा राजसैस्तथा तामसैरत्यंतमेवास्पृष्टं समम
कमविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पंडिताः समदर्शिनः ननु भोज्यान्नास्ते दोषवंतः समासमाभ्यां विषमसमपूजातत इति स्मृते
र्न ते दोषवंतः १८ कथं इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः इहैव जीवद्भिरेव तैः समदर्शिभिः पंडितैर्जितो वशीकृतः सर्गो जन्म येषां साम्ये सर्वभूतेषु ब्रह्मणि सम
भावे स्थितं निश्चलीभूतं मनोंतःकरणं निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैस्तद्दोषैर्दोषवदिव विभाव्यते तथापि तद्दोषैरस्पृ
ष्टमिति निर्दोषं दोषवर्जितं हि यस्मान्नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्यस्य वक्ष्यति च भगवानिच्छादीनां क्षेत्रधर्मत्वमनादित्वान्नि
र्गुणत्वादिति च नाप्यंत्या विशेषा आत्मनो भेदकल्पकाः संति प्रतिशरीरं तेषां सत्त्वे प्रमाणानुपपत्तेरतः समं ब्रह्मैकं च तस्मात् ब्रह्मण्य
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः १८ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः १९ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः
एव ते स्थितास्तस्मान्न दोषगंधमात्रमपि तान् स्पृशति देहादिसंघातात्मदर्शनाभिमानाभावात्तेषां देहादिसंघातात्मदर्शनाभिमान
विषयं तु तत्सूत्रं समासमाभ्यां विषमसमपूजातः इति पूजाविषयत्वेन विज्ञेयत्वात् दृश्यते हि ब्रह्मवित्षडंगविच्चतुर्वेदविद
पयं च समासमाभ्यामित्यादौ दानसमत्वदर्शनं सर्वकर्मसंन्यासिविषयं प्रस्तुतं सर्वकर्माणि मनसा संन्यस्याध्यायपरिसमा
SS
1943
प्तेः यस्मान्निर्दोषं समं ब्रह्मात्मा तस्मात् न प्रहृष्येत्प्रहर्षं न कुर्यात्प्रियमिष्टं प्राप्य लब्ध्वा नोद्विजेत्प्राप्य चाप्रियं अनिष्टं हेरंब
लब्ध्वा देहमात्रात्मदर्शिनो हि प्रियाप्रियप्राप्ती हर्षविषादौ कुर्वते न केवलात्मदर्शिनः तस्य प्रियाप्रियप्राप्त्यसंभवात् किंच
सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिरा निर्विचिकित्सा बुद्धिर्यस्य स स्थिरबुद्धिरसंमूढः संमोहविवर्जितश्च स्या २०
द्यथोक्तब्रह्मवित् ब्रह्मणि स्थितः कर्मकृत् सर्वकर्मसंन्यासीत्यर्थः २० ॥
किंच ब्रह्मणि स्थितिः बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च बाह्यस्पर्शाः स्पृश्यंत इति स्पर्शाः शब्दादयो विषयास्तेषु बाह्यस्प
र्शेष्वसक्त आत्मांतःकरणं यस्य सोयमसक्तात्मा विषयेषु प्रीतिवर्जितः सन् विंदति लभते आत्मनि यत्सुखं तं विंदतीत्येत
त् स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिः ब्रह्मयोगस्तेन ब्रह्मयोगेन युक्तः समाहितस्तस्मिन्व्यापृत आत्मांतःकर
णं यस्य स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते व्याप्नोति तस्मादात्मनि अक्षयसुखार्थी बाह्यविषयप्रीतेः क्षणिकाया इंद्रियाणि निवर्तयेदात्मन्यक्ष
यसुखार्थीत्यर्थः २१ इतश्च निवर्तयेत् ये हि यस्मात् संस्पर्शजा विषयेंद्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयो दुःखयोनय
एव ते अविद्याकृतत्वात् दृश्यंते ह्याध्यात्मिकादीनि दुःखानि तन्निमित्तान्येव यथेहलोके तथा परलोकेपीति गम्यते एवशब्दा
त्नसंसारे सुखस्य गंधमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिकाया इंद्रियाणि निवर्तयेन्न केवलं दुःखयोनय आद्यंतवंत
श्च आदिर्विषयेंद्रियसंयोगो भोगानामंतश्च तद्वियोग एवातस्ते आद्यंतवंतोऽनित्या मध्यक्षणभावित्वादित्यर्थः कौंतेय न
बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते २१ ये हि संस्पर्शजा भो
गा दुःखयोनय एव ते आद्यंतवंतः कौंतेय न तेषु रमते बुधः २२ शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणा
त् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः २३ ॥ ॥
तेषु भोगेषु रमते बुधो विवेकी अवगतपरमार्थतत्त्वोऽत्यंतमूढानामेव हि विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनां २२ अयं
च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्दुर्निवारश्चेति तत्परिहारे यत्नाधिक्यं कर्तव्यमित्याह भगवान् श
क्नोतीति शक्नोति सहते इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक्पूर्वं शरीरविमोक्षणात् आमरणादित्यर्थः मरणसीमाकरणं जीवतो वश्यंभा
वी हि कामक्रोधोद्भवो वेगोऽनंतनिमित्तवान् हि स इति यावन्मरणं तावन्न विस्रंभणीय इत्यर्थः काम इंद्रियगोचरप्राप्ते इष्टे
विषये श्रूयमाणे स्मर्यमाणे वानुभूते सुखहेतौ या गर्धिस्तृष्णा स कामः क्रोधश्चात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमानेषु
श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः स क्रोधस्तौ कामक्रोधौ उद्भवो यस्य वेगस्य स कामक्रोधोद्भवो वेगः वेगवचनात् रो
मांचनहृष्टनेत्रवदनलिंगोंतःकरणप्रक्षोभरूपः कामोद्भवो वेगः गात्रप्रकंपप्रस्वेदसंदष्टौष्ठपुटरक्तनेत्रादिलिंगः क्रो
धोद्भवो वेगः तं कामक्रोधोद्भवं वेगं यः उत्सहते सोढुं प्रसहितुं स युक्तो योगी सुखी चेहलोके नरः २३ ॥

गीताभा० कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह भगवान् योंऽतःसुखः अंतरात्मनि सुखं यस्य सोंऽतःसुखः तथांतरेवात्मन्या
राम आक्रीडा यस्य सोंतरारामस्तथैवांतरेवात्मन्येव ज्योतिः प्रकाशो यस्य सोंतर्ज्योतिरेव य ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मणि नि
२८ र्वृतिं मोक्षमिह जीवन्नेव ब्रह्मभूतः सन्नधिगच्छति प्राप्नोति २४ किंच लभंते ब्रह्मनिर्वाणं मोक्षमृषयः सम्यग्दर्शिनः संन्या
सिनः क्षीणकल्मषाः क्षीणपापादिदोषाः छिन्नद्वैधाश्छिन्नसंशयाः यतात्मानः संयतेंद्रियाः सर्वभूतहिते रताः सर्वेषां भू
तानां हिते आनुकूल्ये रताः अहिंसका इत्यर्थः २५ किंच कामक्रोधवियुक्तानां कामश्च क्रोधश्च कामक्रोधौ ताभ्यां वियुक्तानां य
तीनां संन्यासिनां यतचेतसां संयतांतःकरणानां अभितः उभयतो जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते विदितात्मनां वि
दितो ज्ञात आत्मा येषां ते विदितात्मानस्तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः सम्यग्दर्शननिष्ठानां संन्यासिनां सद्यो मुक्ति
रुक्ता कर्मयोगश्च ईश्वरार्पितसर्वभावेन ईश्वरे ब्रह्मण्याधाय क्रियमाणः सत्वशुद्धिज्ञानप्राप्तिः सर्वकर्मसंन्यासक्रमेण मोक्षा
येति भगवान् पदे पदेऽब्रवीद्वक्ष्यति च २६ अथेदानीं ध्यानयोगं सम्यग्दर्शनस्यांतरंगं विस्तरेण वक्ष्यामीति तस्य सूत्रस्थानी
योंतःसुखोंतरारामस्तथांतर्ज्योतिरेव यः स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति २४ लभंते ब्रह्मनिर्वाणमृषयः क्षीणक
ल्मषाः छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः २५ कामक्रोधवियुक्तानां यतीनां यतचेतसां अभितो ब्रह्मनिर्वाणं वर्तते विदि
तात्मनां २६ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ २७ यतेंद्रियमनोबु
द्धिर्मुनिर्मोक्षपरायणः विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः २८ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां
ज्ञात्वा मां शांतिमृच्छति २९ । हरिः ओं तत्स० कर्मसंन्यासयोगो नाम पंचमोऽध्यायः ५ ६२
याञ्श्लोकानुपदिशति स्म देवः स्पर्शान् शब्दादीन्कृत्वा बहिर्बाह्यान् श्रोत्रादिद्वारेणांतर्बुद्धौ प्रवेशिताः शब्दादयो विषयाः तानचिंतय
तः शब्दादयो बाह्या बहिरेव कृता भवंति तानेवं बहिः कृत्वा चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनुषज्यते तथा प्राणापानौ नासाभ्यंतरचारिणौ समौ
कृत्वा २७ यतेंद्रियमनोबुद्धिः यतानि संयतानींद्रियाणि मनो बुद्धिश्च यस्य सः यतेंद्रियमनोबुद्धिः मननान्मुनिः संन्यासी मोक्षपराय हेरंब
णः एवं देहसंस्थानान्मोक्षपरायणो मोक्ष एव परमयनं परा गतिर्यस्य सोऽयं मोक्षपरायणो मुनिर्भवेत् विगतेच्छाभयक्रोधः इच्छा च भयं च क्रोध
श्च इच्छाभयक्रोधाः ते विगता यस्मात्स विगतेच्छाभयक्रोधो यः एवं वर्तते सदा संन्यासी मुक्त एव सः न तस्य मोक्षायान्यः कर्तव्योऽस्ति २८
२८ एवं समाहितचित्तेन किं विज्ञेयमित्युच्यते भोक्तारं यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च सर्वलोकमहेश्वरं सर्वेषां

५७/१४५३

लोकानां महांतमीश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारनिरपेक्षतयोपकारिणं सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्य
क्षं नारायणं मां ज्ञात्वा शांतिं सर्वसंसारोपरतिमृच्छति प्राप्नोतीति २९ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरभगवतः कृ
तौ गीताभाष्ये कर्मसंन्यासयोगो नाम पंचमोऽध्यायः ५ श्रीभगवानुवाच अतीतानंतराध्याये ध्यानयोगस्य सम्यग्दर्शनं
प्रत्यंतरंगस्य सूत्रभूताः श्लोकाः स्पर्शान्कृत्वा बहिरित्यादय उपदिष्टास्तेषां वृत्तिस्थानीयोऽयं षष्ठोऽध्याय आरभ्यते तत्र ध्यान
योगस्य बहिरंगं कर्मेति यावद्ध्यानयोगारोहणसमर्थस्तावद्गृहस्थेनाधिकृतेन कर्तव्यमेव कर्मेत्यतस्तत्स्तौति ननु किमर्थं ध्या
नयोगारोहणसीमाकरणं यावता अनुष्ठेयमेव विहितं कर्म यावज्जीवं नारुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यत इति विशेषणादारूढ
स्य च शम एव संबंधकारणादारुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं चेत्स्यादारुरुक्षोरारूढस्येति शमः कर्म
विषयभेदेन विशेषणं विभागकरणं चानर्थकं स्यात् तत्राश्रमिणां कश्चिद्योगमारुरुक्षुर्भवेत्स्यादारूढश्च कश्चिदन्ये नारुरुक्षवो
न चारूढास्तानपेक्ष्यारुरुक्षोरारूढस्य चेति विशेषणं विभागकरणं चोपपद्यत एवेति चेन्न तस्यैवेति वचनात्पुनर्योगग्रहणाच्च
योगारूढस्येति य आसीत्पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्तव्यः कारणं योगफलं प्रत्युच्यत इत्यतो न यावज्जीवं
कर्तव्यत्वप्राप्तिः कस्यचिदपि कर्मणः योगाद्विभ्रष्टवचनाच्च गृहस्थस्य चेत्कर्मिणो योगो विहितः षष्ठाध्याये स योगविभ्रष्टो
ऽपि कर्मगतिं कर्मफलं प्राप्नोतीति तस्य नाशाशंकानुपपन्ना स्यादवश्यं हि कृतं कर्म काम्यं नित्यं वा मोक्षस्य नित्यत्वादनारभ्यत्वे
ऽपि स्वफलमारभत एव नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात्फलेन भवितव्यमित्यवोचाम अन्यथा वेदस्यानर्थार्थत्वप्रसंगादि
ति न च कर्मणि सत्युभयविभ्रष्टवचनमर्थवत्कर्मणो विभ्रंशकारणानुपपत्तेः कर्म कृतमीश्वरे संन्यस्येत्यतः कर्तुः कर्मफलं नारभ
त इति चेन्नेश्वरे संन्यासस्याधिकतरफलहेतुत्वोपपत्तेः मोक्षायैवेति चेत् स्वकर्मणां कृतानामीश्वरे न्यासो मोक्षायैव न फलांतराय
योगसहितो योगाच्च विभ्रष्ट इत्यतस्तं प्रति नाशाशंका युक्तैवेति चेन्न एकाकी यतचित्तात्मा निराशीरपरिग्रहो ब्रह्मचारिव्रते स्थित इ
ति च कर्मसंन्यासविधानात् न चात्र ध्यानकाले स्त्रीसहायत्वाशंका येन कर्मिणो योगो विधीयेत न च गृहस्थस्य निराशीरपरिग्रहः इत्या
दिवचनमनुकूलमुभयविभ्रष्टप्रश्नानुपपत्तेश्च अनाश्रितः इति कर्मिण एव योगित्वं संन्यासित्वं चोक्तं प्रतिषिद्धं च निरग्नेर
क्रियस्य च संन्यासित्वं योगित्वं चेति चेन्न ध्यानयोगं प्रति बहिरंगस्य सतः कर्मणः फलाकांक्षासंन्यासस्तुतिपरत्वात् न केवलं निर
ग्निरक्रिय एव संन्यासी योगी च किं तर्हि कर्म्यपि कर्मफलासंगं संन्यस्य कर्मयोगमनुतिष्ठन् सत्वशुद्ध्यर्थं स संन्यासी च योगी च

गीताभाष्य भवतीतिस्तूयते नेवकेनवाक्येनकर्मफलासंगसन्यासस्तुतिश्चतुर्थाश्रमप्रतिषेधश्चोपपद्यते नचप्रसिध्यं निरग्नेरक्रियस्य
चपरमार्थसन्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रेषुविहितंसन्यासित्वंयोगित्वंचप्रतिषेधयतिचभगवान्स्ववचन
२९ विरोधाच्चसर्वकर्माणिमनसासन्यस्यनैवकुर्वन्नकारयन्मौनीसंतुष्टोयेनकेनचिदनिकेतःस्थिरमतिर्विहायकामान्यः
सर्वान्पुमांश्चरतिनिस्पृहःसर्वारंभपरित्यागीतितत्रतत्रभगवतास्ववचनानिदर्शितानितैर्विरुध्येतचतुर्थाश्रमप्रतिषेधस्त
स्मान्मुनेर्योगमारुरुक्षोःप्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादिफलनिरपेक्षमनुष्ठीयमानंध्यानयोगारोहणसाधनत्वंसत्वशुद्धि
द्वारेणप्रतिपद्यतइतिससन्यासीचयोगीचेतिस्तूयते अनाश्रितः नआश्रितोऽनाश्रितः किंकर्मफलंकर्मणांफलंकर्मफलंयद
त्तेनाश्रितः कर्मफलएवंभूतः सन्कार्यंकर्तव्यंनित्यंकाम्यविपरीतमग्निहोत्रादिकरोतिनिर्वर्तयतियःकश्चित् यईदृशःकर्मी
सकर्म्यंतरेभ्योविशिष्यतइत्येवमर्थमाह ससन्यासीचयोगीचेतिसन्यासःपरित्यागःसयस्यास्तिससन्यासीचयोगीचयोग
श्चित्तसमाधानंसयस्यास्तिसयोगीचेत्येवंगुणसंपन्नोयंमंतव्यः नकेवलंनिरग्निरक्रियएवसन्यासीयोगीचेतिमंतव्योनिर्ग

श्रीभगवानुवाच अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः ससंन्यासीचयोगीचननिरग्निर्नचाक्रियः १ ॥

ताअग्नयःकर्मांगभूतायस्मात्सनिरग्निरक्रियश्चअनग्निसाधनाअप्यविद्यमानाःक्रियास्तपोदानादिकायस्यासावक्रियः
ननुचनिरग्नेरक्रियस्यैवश्रुतिस्मृतियोगशास्त्रेषुसन्यासित्वंयोगित्वंचप्रसिद्धंकथमिहसाग्नेःसक्रियस्यचसन्यासित्वंयोगि
त्वंचाप्रसिद्धमुच्यतइतिनैषदोषःकयाचिद्गुणवृत्त्याउभयस्यसंपिपादयिषितत्वात् तत्कथंकर्मफलसंकल्पसंन्यासात्
सन्यासित्वंयोगांगत्वेनचकर्मानुष्ठानात्कर्मफलसंकल्पस्यचचित्तविक्षेपहेतोःपरित्यागात्योगित्वंचेति १ गौणा
मुभयंनपुनर्मुख्यंसन्यासित्वंयोगित्वंचाभिप्रेतमित्येतमर्थंदर्शयितुमाह यंसर्वकर्मतत्फलपरित्यागलक्षणंपरमार्थसन्यास हेरंब
मितिप्राहुःश्रुतिस्मृतिविदः योगंकर्मानुष्ठानलक्षणंतंपरमार्थसन्यासंविद्धिजानीहिहेपांडवकर्मयोगस्यप्रवृत्तिलक्ष
णस्यतद्विपरीतेननिवृत्तिलक्षणेनपरमार्थसन्यासेनकीदृशंसामान्यमंगीकृत्यतद्भावउच्यतइत्यपेक्षायामिदमुच्यते अ
स्तिपरमार्थसन्यासेनसादृश्यंकर्तृद्वारकंकर्मयोगस्ययोहिपरमार्थसन्यासीसत्यक्तसर्वकर्मसाधनतयासर्वकर्मतत्फलविष २९
यंसंकल्पंप्रवृत्तिहेतुकामकारणंसन्यस्यतियमपिकर्मयोगीकर्मकुर्वाणएवफलविषयंसंकल्पंसन्यस्यतीत्येतमर्थंदर्शयिष्य

59/1943

न्नाह नह्ययस्मादसन्यस्तसंकल्पोसन्यस्तोऽपरित्यक्तःफलविषयःसंकल्पोभिसंधिर्येनसोऽसन्यस्तसंकल्पःकश्चनकश्चिद
पिकर्मीयोगीसमाधानवान्भवतिनसंभवतीत्यर्थः फलसंकल्पस्यचित्तविक्षेपहेतुत्वात्तस्माद्यःकश्चनकर्मीसंन्यस्तफलसं
कल्पोभवेत्सयोगीसमाधानवान्भवतिअविक्षिप्तचित्तोभवेत्चित्तविक्षेपहेतोःफलसंकल्पस्यसन्यस्तत्वादित्यभिप्रायः एवंप
रमार्थसन्यासकर्मयोगयोःकर्तृद्वारकंसन्याससामान्यमपेक्ष्ययंसन्यासमितिप्राहुर्योगंतंविद्धिपांडवेतिकर्मयोगस्यस्तुत्यर्थंसं
न्यासत्वमुक्तं २ ध्यानयोगस्यफलनिरपेक्षःकर्मयोगोबहिरंगसाधनमितितंसन्यासत्वेनस्तुत्वाधुनाकर्मयोगस्यध्यानयोगसा
धनत्वंदर्शयति आरुरुक्षोःआरोढुमिच्छोःअनारूढस्यध्यानयोगेवस्थातुमसमर्थस्येत्यर्थः तस्यारुरुक्षोर्मुनेःकर्मफलसन्या
सिनइत्यर्थः कमारुरुक्षोर्योगंकर्मकारणंसाधनमुच्यतेयोगारूढस्यपुनस्तस्यैवशमउपशमःसर्वकर्मभ्योनिवृत्तिःकारणंयोगारू
ढत्वस्यसाधनमुच्यतइत्यर्थः यावद्यावत्कर्मभ्यउपरमतेतावत्तावन्निरायासस्यजितेंद्रियस्यचित्तंसमाधीयतेतथासतिसझटितिस
योगारूढोभवतितथाचोक्तंनैतादृशंब्राह्मणस्यास्तिवित्तंयथैकतासमतासत्यताचशीलंस्थितिर्दंडनिधानमार्जवंततस्ततश्चोपरमः

संसन्यासमितिप्राहुर्योगंतंविद्धिपांडव नह्यसन्यस्तसंकल्पोयोगीभवतिकश्चन २ आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते योगा
रूढस्यतस्यैवशमःकारणमुच्यते ३ यदाहिनेंद्रियार्थेषुनकर्मस्वनुषज्जते सर्वसंकल्पसन्यासीयोगारूढस्तदोच्यते ४

क्रियाश्चेति ३ अथेदानींकदायोगारूढोभवतीत्युच्यते यदासमाधीयमानचित्तोभवतियोगीहिइंद्रियार्थेषुइंद्रियाणामर्थाः
शब्दादयस्तेष्विंद्रियार्थेषुकर्मसुचनित्यनैमित्तिककाम्यप्रतिषिद्धेषुप्रयोजनाभावबुद्ध्यानानुषज्जतेऽनुषंगंकर्तव्यताबुद्धिंन
करोतीत्यर्थः सर्वसंकल्पसन्यासीसर्वान्संकल्पानिहामुत्रार्थकामहेतून्सन्यसितुंशीलमस्येतिससर्वसंकल्पसन्यासीयो
गारूढःप्राप्तयोगइत्येतत्तदातस्मिन्कालेयोगारूढउच्यतेसर्वसंकल्पसन्यासीतिवचनात्सर्वांश्चकामान्कामांल्काश्चिव
सर्वाणिचकर्माणिसन्यसेदित्यर्थः संकल्पमूलाहिसर्वकामाःसंकल्पमूलःकामोवैयज्ञाःसंकल्पसंभवाःकामजानामितेमूलं
संकल्पात्किलजायसेनत्वांसंकल्पयिष्यामिसमूलोनभविष्यसीत्यादिस्मृतेःसर्वकामपरित्यागेचसर्वकर्मसन्यासःसिद्धो
भवतिसयथाकामोभवतितत्क्रतुर्भवतियत्क्रतुर्भवतितत्कर्मकुरुतेयाद्दिक्रियायद्यद्धिकुरुतेजंतुस्तत्कामस्यचेष्टितमित्यादि
स्मृतिभ्यश्चन्यायाच्चनहिसर्वसंकल्पसन्यासेकश्चित्स्पंदितुमपिशक्तःतस्मात्सर्वसंकल्पसन्यासीतिवचनात्सर्वान्का
मान्सर्वाणिचकर्माणित्याजयतिभगवान् ४ ॥ ॥ ॥ ॥ ॥

यदैवंयोगारूढस्तदा तेन आत्मात्मनो धृतो भवति संसारादनर्थजातादयः उद्धरेत्संसारसागरे निमग्नमात्मानमात्मनात्मनः
तदुद्धरेत् उद्धरेद्योगारूढतामापादयेदित्यर्थः नात्मानमवसादयेत् नाधो गमयेदात्मैव हि यस्मादात्मनो बंधुः नैवान्यः कश्चित्
यः संसारमुक्तये भवति बंधुः पितावन्मोक्षं प्रतिकूलः वस्नेहादिबंधनायतनत्वात् तस्मात्युक्तमवधारणमात्मैव ह्यात्मनो बंधुः
रिति आत्मैव रिपुः शत्रुर्योऽन्योपकारी बाह्यः शत्रुः सोप्यात्मप्रयुक्त एवेति युक्तमेवावधारणमात्मैव रिपुरात्मन इति आत्मैव बं
धुरात्मैव रिपुरात्मन इत्युक्तं ५ तत्र किंलक्षण आत्मात्मनो बंधुः किंलक्षणो वा आत्मात्मनो रिपुरित्युच्यते बंधुरात्मात्मन
स्तस्यात्मनः स आत्मा बंधुर्येनात्मनात्मैव जितः आत्मा कार्यकरणसंघातो येन वशीकृतो जितेंद्रिय इत्यर्थः अनात्मनः अजि
तात्मनस्तु शत्रुत्वे शत्रुभावे वर्तेतात्मैव शत्रुवद्यथा नात्मा शत्रुरात्मनोपकारी तथात्मानोपकारे वर्तेत इत्यर्थः ६ जितात्म
नः कार्यकरणादिसंघात आत्मा जितो येन स जितात्मा तस्य जितात्मनः प्रशांतस्य उपशांतस्य परमात्मा समाहितः साक्षादात्मा

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ५ बंधुरात्मात्मनस्तस्य येनात्मैवात्मना
जितः अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६ जितात्मनः प्रशांतस्य परमात्मा समाहितः शीतोष्णसुखदुःखेषु तथा मानापमा
नयोः ७ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ८ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९ योगी युंजीत सततमात्मानं रहसि स्थितः

येन वर्तेत इत्यर्थः किंच शीतोष्णसुखदुःखेषु तथा मानापमानयोः पूजापरिभवयोः समः स्यादित्याध्याहारः
७ ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विज्ञानं तु शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणं ताभ्यां ज्ञानविज्ञा
नाभ्यां तृप्तः संजातालंप्रत्ययः आत्मा अंतःकरणं यस्य स ज्ञानविज्ञानतृप्तात्मा कूटस्थोऽप्रकंप्यो भवतीत्यर्थः विजितेंद्रियश्च य इ
त्थं युक्तः समाहित इति स उच्यते कथ्यते स योगी समलोष्टाश्मकांचनः लोष्टाश्मकांचनानि समानि यस्य स समलोष्टाश्मकांचनः ८
किंच सुहृदित्यादि श्लोकार्धमेकं पदं सुहृदिति प्रत्युपकारमनपेक्ष्योपकर्ता मित्रं स्नेहवान् अरिः शत्रुः उदासीनः न कस्यचित्पक्षं भ
जते मध्यस्थो यो विरुद्धयोरुभयोर्हितैषी द्वेष्य आत्मनोऽप्रियो बंधुः संबंधी इत्येतेषु साधुषु शास्त्रानुवर्तिष्वपि च पापेषु प्रति
षिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः विशिष्यते विमुच्यत इति वा पाठांतरं योगारूढानां सर्वेषामय
मुत्तम इत्यर्थः ९ अत एवमुत्तमफलप्राप्तये योगी ध्यायी युंजीत समादध्यात्सततं सर्वदा आत्मानमंतःकरणं रहसि एकांते गिरि

गुहादौ स्थितः सन् एकाकी असहायो रहसि स्थितः एकाकी चेति विशेषणात् संन्यासं कृत्वेत्यर्थः यतचित्तात्मा चित्तमंतःकरणमात्मा
देहश्च संयतो यस्य स यतचित्तात्मा निराशीः वीततृष्णः अपरिग्रहश्च परिग्रहरहितः संन्यासित्वेपि त्यक्तसर्वपरिग्रहः सन् युंजीतेत्यर्थः १०
अथेदानीं योगं युंजत आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः प्राप्तयोगलक्षणं तत्फलादिकं च वक्तव्यमारभ्यते तत्रा
सनमेव तावत्प्रथममुच्यते शुचौ शुद्धे विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचलमात्मन आसनं नात्युच्छ्रितं अ
तीवोच्छ्रितं नात्युच्छ्रितं नाप्यतिनीचं तच्च चैलाजिनकुशोत्तरं चैलमजिनं कुशाश्च उत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं पाठ
क्रमात् विपरीतो क्रमश्चैलादीनां ११ प्रतिष्ठाप्य किं तत्र तस्मिन्नासने उपविश्य योगं युंज्यात्कथं सर्वविषयेभ्य उपसंहृत्यैकाग्रं
मनः कृत्वा यतचित्तेंद्रियक्रियः चित्तं चेंद्रियाणि च चित्तेंद्रियाणि तेषां क्रियाः संयता यस्य स यतचित्तेंद्रियक्रियः स किमर्थं योगं यु
ज्यादित्याह आत्मविशुद्धये अंतःकरणस्य विशुद्ध्यर्थमित्येतत् १२ बाह्यसाधनमासनमुक्तमधुना शरीरधारणं कथमित्युच्यते समं का

एकाकी यतचित्तात्मा निराशीरपरिग्रहः १० शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं ११
तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः उपविश्यासने युंज्याद्योगमात्मविशुद्धये १२ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् १३ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तो युक्त आसीत मत्परः १४

यश्च शिरश्च ग्रीवा च समं कायशिरोग्रीवं तत्समं धारयन्नचलं चासमं धारयतश्चलनं संभवत्यतो विशिनष्ट्यचलमिति स्थिरः स्थि
रो भूत्वेत्यर्थः संप्रेक्ष्य सम्यक् प्रेक्षणं दर्शनं कृत्वेवेति इवशब्दो लुप्तो द्रष्टव्यः नहि स्वनासिकाग्रसंप्रेक्षणमिह विधित्सितं किं तर्हि चक्षु
षोर्दृष्टिसन्निपातः सः अंतःकरणसमाधानापेक्षो विवक्षितः स्वनासिकाग्रसंप्रेक्षणमेव चेद्विवक्षितं मनस्तत्रैव समाधीयेत नात्मनि आत्म
नि हि मनसः समाधानं वक्ष्यत्यात्मसंस्थं मनः कृत्वेति तस्मादिवशब्दलोपेनाक्ष्णोर्दृष्टिसन्निपात एव संप्रेक्ष्येत्युच्यते स्वं दिशश्चा
नवलोकयन् दिशां चावलोकनमकुर्वन्नित्येतत् १३ किंच प्रशांतात्मा प्रकर्षेण शांत आत्मांतःकरणं यस्य सोयं प्रशांतात्मा विगतभीः
विगतभयो ब्रह्मचारिव्रते स्थितो ब्रह्मचारिणो व्रतं ब्रह्मचारिव्रतं ब्रह्मचर्यगुरुशुश्रूषाभिक्षान्नभुक्त्यादि तस्मिन् स्थितस्तदनुष्ठाता भवेदित्यर्थः किंच
मनः संयम्य मनसो वृत्तीः उपसंहृत्येत्येतत् मच्चित्तो मयि परमेश्वरे चित्तं यस्य सोयं मच्चित्तो युक्तः समाहितः सन्नासीत उपविशेत् मत्प
रः अहं परो यस्य सोयं मत्परो भवति कश्चिद्रागी स्त्रीचित्तो न तु स्त्रियमेव परत्वेन गृह्णाति किं तर्हि राजानं महादेवं वा अयं तु मच्चित्तो मत्परश्च

 अथेदानीं योगफलमुच्यते युंजन्समाधानं कुर्वन्नेवं यथोक्तेन विधानेनात्मानं सदा योगी नियतमानसः नियतं संयतं मानसं मनो
यस्य सोऽयं नियतमानसः स शांतिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षस्तत्परमा निष्ठा यस्याः शांतेः सा निर्वाणपरमा तां मत्संस्थां म
३१ दधीनां तामधिगच्छति प्राप्नोति १५ योगिन आहारादिनियम उच्यते नात्यश्नत आत्मसम्मितमन्नपरिमाणमतीत्य अश्नतः अत्य
श्नतो न योगोऽस्ति न चैकांतमनश्नतो योगोऽस्ति यदु ह वा आत्मसम्मितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयोऽन्नं न तद
वतीति श्रुतेः तस्माद्योगी नात्मसम्मितादन्नादधिकं न्यूनं वाश्नीयादथवा योगिनो योगशास्त्रपरिपठितादन्नपरिमाणादतिमात्र
मश्नतो योगो नास्तीत्युक्तं हि अर्धमशनस्य सव्यंजनस्य तृतीयमुदकस्य तु वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादि एवमादि
तथा न चातिस्वप्नशीलस्य योगो भवति नैव चातिमात्रं जाग्रतो योगो भवति चार्जुन १६ कथं पुनर्योगो भवतीत्युच्यते युक्ताहारविहा
रस्य आह्रियत इत्याहारो अन्नं विहरणं विहारः पादक्रमस्तौ युक्तौ नियतपरिमाणौ यस्य स युक्ताहारविहारः युक्तचेष्टस्य यु

युंजन्नेवं सदात्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति १५ नात्यश्नतस्तु योगोऽस्ति न चैकांतमन
श्नतः न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन १६ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुः
खहा १७ यदा विनियतं चित्तमात्मन्येवावतिष्ठते निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा १८ यथा दीपो निवातस्थो नेंगते
सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योगमात्मनः १९

क्तचेष्टस्य तथा युक्ता नियता चेष्टा यस्य कर्मसु तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्च अवबोधश्च तौ नियतकालौ यस्य युक्ताहार
विहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनो योगो भवति दुःखहा दुःखानि सर्वाणि हंतीति दुःखहा सर्वसंसारदुःख
क्षयकृद्योगो भवतीत्यर्थः १७ अथाधुना कदा युक्तो भवतीत्युच्यते यदा विनियतं विशेषेण नियतं संयतमेकाग्रतामापन्नं चित्तं
हित्वा बाह्यार्थचिंतामात्मन्येव केवले अवतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः निस्पृहः सर्वकामेभ्यो निर्गता दृष्टादृष्टविषयेभ्यः
स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहित इत्युच्यते तदा तस्मिन्काले १८ तस्य योगिनः समाहितं यच्चित्तं यस्य तस्योपमा
च्यते यथा दीपः प्रदीपो निवातस्थो निर्वाते वातवर्जिते देशे स्थितो नेंगते न चलतीति सा उपमा उपमीयते अनेनेत्युपमा योगज्ञैः
चित्तप्रचारदर्शिभिः स्मृता चिंतिता योगिनो यतचित्तस्य संयतांतःकरणस्य युंजतो योगमनुतिष्ठत आत्मनः समाधिमनुतिष्ठत इत्यर्थः ३१
१०

63
1443

एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत् यत्र यस्मिन्काले उपरमते चित्तं उपरतिं गच्छति निरुद्धं सर्वतो निवारि
तं प्रचारं योगसेवया योगानुष्ठानेन यत्र चैव यस्मिंश्च काले आत्मना समाधिपरिशुद्धेनांतःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरू
पं पश्यन्नुपलभमानः स्व एवात्मनि तुष्यति तुष्टिं भजते २० किंच सुखमात्यंतिकं अत्यंतमेव भवतीत्यात्यंतिकं अनंतमित्यर्थः यत्त
द्बुद्धिग्राह्यं बुद्ध्यैवेंद्रियनिरपेक्षया गृह्यत इति बुद्धिग्राह्यमतींद्रियमिंद्रियगोचरातीतं अविषयजनितमित्यर्थः वेत्ति तदीदृशं सु
खमनुभवति यत्र यस्मिन्काले न चैवायं विद्वानात्मस्वरूपे स्थितस्तस्मान्नैव चलति तत्त्वतस्तत्स्वरूपान्न प्रच्यवत इत्यर्थः २१
किंच यं लब्ध्वा यमात्मलाभं लब्ध्वा प्राप्य चापरमन्यल्लाभांतरं ततोऽधिकमस्तीति न मन्यते न चिंतयति किंच यस्मिन्नात्मतत्त्वे स्थितो न
दुःखेन गुरुणा शस्त्रनिपातादिलक्षणेन गुरुणा महतापि न विचाल्यते २२ यत्रोपरमत इत्याद्यारभ्य यावद्भिर्विशेषणैर्विशिष्ट आत्मा
वस्थाविशेषो योग उक्तः तं विद्याद्विजानीयात् दुःखसंयोगवियोगं दुःखैः संयोगो दुःखसंयोगस्तेन वियोगो दुःखसंयोगवियो

यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति २० सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः २१ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते २२
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा २३ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेष
तः मनसैवेंद्रियग्रामं विनियम्य समंततः २४ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् २५

गवियोगं इत्येवं संज्ञितं विपरीतलक्षणेन विद्याद्विजानीयादित्यर्थः योगफलमुपसंहृत्य पुनरन्वारंभेण योगस्य कर्तव्यतोच्यते
निश्चयानिर्वेदयोः योगसाधनत्वविधानार्थं स यथोक्तफलो योगो निश्चयेनाध्यवसायेन योक्तव्यो अनिर्विण्णचेतसा न नि
र्विण्णं किं तर्हि चेतस्तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः २३ किंच संकल्पप्रभवान् संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः
कामास्तांस्त्यक्त्वा परित्यज्य सर्वानशेषतो निर्लेपेन किंच मनसैव विवेकयुक्तेनेंद्रियग्राममिंद्रियसमुदायं विनियम्य नियमनं कृ
त्वा समंततः समंतात् २४ किंच शनैः शनैर्न सहसा उपरमेत् उपरतिं कुर्यात् कया बुद्ध्या किं विशिष्टया धृतिगृहीतया धृत्या धै
र्येण गृहीतया धृतिगृहीतया धैर्ययुक्तयेत्यर्थः आत्मसंस्थमात्मनि संस्थितमात्मैव सर्वं न ततोऽन्यत् किंचिदस्तीति एवमा
त्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् एष योगस्य परमो विधिस्तत्रैवमात्मसंस्थं मनः कर्तुं प्रवृत्तो योगी २५

गीताभा० यतो यतो यस्मान्निमित्ताच्छब्दादेर्निश्चरति निर्गच्छति स्वभावदोषान्मनश्चंचलमत्यर्थं चलमत एवास्थिरं ततस्ततस्तस्मात्
तस्माच्छब्दादेर्निमित्तान्नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य वैराग्यभावनया चैतन्मन आत्मन्येव वशं न
३२ येत् आत्मवश्यतामापादयेत् २६ एवं योगाभ्यासबलाद्योगिन आत्मन्येव प्रशाम्यति मनः प्रशांतमनसं प्रकर्षेण शां
तं मनो यस्य स प्रशांतमनास्तं प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं निरतिशयमुपैति उपगच्छति शांतरजसं प्रक्षीणमो
हादिक्लेशरजसमित्यर्थः ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव सर्वमित्येवं निश्चयवंतं ब्रह्मभूतमकल्मषं धर्माधर्मादिवर्जितं २७
एवं युंजन्नेवं योगी यथोक्तेन क्रमेण योगी योगांतरायवर्जितः सदात्मानं विगतकल्मषः विगतपापः सुखेनानायासेन ब्रह्म
संस्पर्शं ब्रह्मणा परेण संस्पर्शो यस्य तद्ब्रह्मसंस्पर्शं सुखमत्यंतमंतमतीत्य वर्तत इत्यत्यंतमुत्कृष्टं निरतिशयं रूपं

यतो यतो निश्चरति मनश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् २६ प्रशांतमनसं ह्येनं योगिनं
सुखमुत्तमं उपैति शांतरजसं ब्रह्मभूतमकल्मषं २७ युंजन्नेवं सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसं
स्पर्शमत्यंतं सुखमश्नुते २८ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः
२९ यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ३० सर्वभूतस्थितं यो मां
भजत्येकत्वमास्थितः सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ३१ ॥ ॥

अश्नुते व्याप्नोति २८ इदानीं योगस्य यत्फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत्प्रदर्श्यते सर्वभूतस्थं सर्वेषु भूतेषु
स्थितं स्वमात्मानं सर्वभूतानि चात्मनि ब्रह्मादीनि स्तंबपर्यंतानि सर्वभूतान्यात्मन्येकतां गतानि ईक्षते पश्यति योगयुक्तात्मा
समाहितांतःकरणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरांतेषु विषमेषु सर्वभूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं य हेतुं
स्य स सर्वत्र समदर्शनः २९ एतस्यात्मैकत्वदर्शनस्य फलमुच्यते यो मां पश्यति वासुदेवं सर्वस्यात्मानं सर्वत्र सर्वेषु भूतेषु सर्वं च
ब्रह्मादिभूतजातं मयि सर्वात्मनि पश्यति तस्यैवमात्मैकत्वदर्शिनोऽहमीश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि स च मे न प्रणश्यति म ३२
च विद्वान्मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य च मम चैकात्मकत्वात् स्वात्मा हि नामात्मनः प्रिय एव भवति ३०
यस्माच्चाहमेव सर्वात्मैकत्वदर्शी इत्येतत्पूर्वश्लोकार्थं अनूद्य सम्यग्दर्शनं तत्फलं मोक्षोऽभिधीयते सर्वथा सर्वप्रकारैर्वर्तमानो
ऽपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्तते नित्यमुक्त एव सः न मोक्षं प्रति केनचित् प्रतिबध्यत इत्यर्थः ३१ ॥

65/1943

किं चान्यत् आत्मौपम्येन आत्मा स्वयमेवोपमा तस्य भाव औपम्यं तेनात्मौपम्येन सर्वत्र सर्वभूतेषु समं तुल्यं पश्यति योऽर्जुन स च किं समं
पश्यतीत्युच्यते यथा मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलं वाशब्दश्चार्थे यदि वा यच्च दुःखं मम प्रतिकूलमनिष्टं य
था सर्वप्राणिनां दुःखमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुखदुःखे अनुकूलप्रतिकूले तुल्यतया सर्वभूतेषु समं पश्यति न
कस्यचित् प्रतिकूलमाचरति अहिंसक इत्यर्थः य एवमहिंसकः सम्यग्दर्शननिष्ठः स योगी परम उत्कृष्टो मतोऽभिमतः ३२
सर्वयोगिनां मध्ये तस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःखसंपाद्यतामालक्ष्य शुश्रूषुर्ध्रुवं तत्प्राप्त्युपायमर्जुन उ०
योऽयं योगस्त्वया प्रोक्तः साम्येन समत्वेन मधुसूदन एतस्य योगस्याहं न पश्यामि नोपलभे चंचलत्वान्मनसः किं स्थिरामचलां स्थि
तिं प्रसिद्धमेतत् ३३ चंचलं हि मनः कृष्ण इति कृषतेर्विलेखनार्थस्य रूपं भक्तजनपापादिदोषाकर्षणात्कृष्णः न
केवलमत्यर्थं चंचलं प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरीरमिंद्रियाणि च विक्षिपति परवशीकरोति किंच बलवद्बलं न के

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन सुखं वा यदि वा दुःखं स योगी परमो मतः ३२ अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः
साम्येन मधुसूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ३३ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं नि
ग्रहं मन्ये वायोरिव सुदुष्करं ३४ श्रीभगवानु० असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु कौंतेय वै
राग्येण च गृह्यते ३५ असंयतात्मना योगो दुःप्राप इति मे मतिः वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ३६ ॥

न केनचिन्नियंतुं शक्यं किं च दृढं तंतुनागवदच्छेद्यं तस्यैवंभूतस्य मनसोऽहं निग्रहं निरोधं मन्ये वायोरिव यथा वायोर्दुष्करो नि
ग्रहस्ततोऽपि दुष्करं मन्ये इत्यभिप्रायः ३४ श्रीभगवानु० एवमेव यथा ब्रवीषि असंशयं नास्ति संशयः महाबाहो मनो
दुर्निग्रहं चलमित्येवं किंतु अभ्यासेन तु अभ्यासो नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिश्चित्तस्य वैराग्येण वैरा
ग्यं नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासाद्वैतृष्ण्यं तेन वैराग्येण गृह्यते विक्षेपरूपः प्रचारश्चित्तस्य तन्मनो गृह्यते निरु
ध्यत इत्यर्थः ३५ यः पुनरसंयतात्मा तेन असंयतात्मना अभ्यासवैराग्याभ्यामसंयत आत्मांतःकरणं यस्य सोऽयमसंयतात्मा
ना योगो दुःप्रापो दुःखसंप्राप्य इति मे मतिः यस्तु पुनर्वश्यात्मा अभ्यासवैराग्याभ्यां वश्यत्वमापादित आत्मा मनो यस्य सो
ऽयं वश्यात्मा तेन वश्यात्मना तु यतता भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योग उपायतो यथोक्तादुपायात् ३६

गीताभा० तत्र योगाभ्यासांगीकरणेनेहलोकपरलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि योगसिद्धिफलं मोक्षसाधनं सम्यग्दर्शनम
प्राप्तमिति योगी योगमार्गात् मरणकाले चलितचित्त इति तस्य नाशमाशंक्य अयतिः प्रयत्नो योगमार्गे श्रद्धया आस्तिक्यबुद्ध्या
३३ चोपेतो योगादंतकाले चलितमानसं भ्रनाशस्य स चलितमानसो भ्रष्टस्मृतिः सोऽप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनं
कां गतिं हे कृष्ण गच्छति ३७ कच्चिदिति किं नोभयविभ्रष्टः कर्ममार्गात् योगमार्गाच्च विभ्रष्टः सन् छिन्नाभ्रमिव नश्यति किं वा न
नश्यति अप्रतिष्ठो निराश्रयो हे महाबाहो विमूढः सन् ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ३८ एतन्मे संशयं कृष्ण छेत्तुमपनेतुम
र्हस्यशेषतः त्वदन्यस्त्वत्तोऽन्यः ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य न हि यस्मादुपपद्यते न संभवति अतः त्वमेव छे
त्तुमर्हस्यशेषत इत्यर्थः ३९ पार्थ नैवेह लोके नामुत्र परस्मिन्वा लोके विनाशस्तस्य विद्यते नास्ति नाशो नाम पूर्वस्मात् हीनज
न्मप्राप्तिः स तस्य योगभ्रष्टस्य नास्ति न हि यस्मात् कारणात् कल्याणकृत् कश्चित् दुर्गतिं कुत्सितां गतिं हे तात तनोत्यात्मानं

अर्जुन उवाच अयतिः श्रद्धयोपेतो योगाच्चलितमानसः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ३७ कच्चिन्नोभयवि
भ्रष्टः छिन्नाभ्रमिव नश्यति अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ३८ एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः त्व
दन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ श्रीभगवानु० पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते न हि कल्याणकृत् कश्चि
द्दुर्गतिं तात गच्छति ४० प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ४१ अथ
वा योगिनामेव कुले भवति धीमताम् एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ४२ तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च

पुत्ररूपेणेति पिता तात इत्युच्यते पितैव पुत्र इति पुत्रोऽपि तात उच्यते शिष्योऽपि पुत्र उच्यते यतः ततो भूयः संसिद्धौ कुरुनंदन ४३
गः संन्यासी सामर्थ्यात् प्राप्य गत्वा पुण्यकृताम् अश्वमेधादियाजिनां लोकान् तत्र च उषित्वा वासमनुभूय शाश्वतीः समाः नित्याः सं
माः संवत्सरान् भोगक्षये शुचीनां यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते ४१ अथवा श्रीमतां कु
लादन्यस्मिन् योगिनामेव दरिद्राणां कुले भवति जायते धीमतां बुद्धिमताम् एतद्धि जन्म दरिद्राणां योगिनां कुले दुर्लभतरं दुःख
लभ्यतरं पूर्वमपेक्ष्य लोके जन्म यदीदृशं यथोक्तविशेषणे कुले यस्मात् ४२ तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्या संयोगं
लभते पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्वदेहिकं यतते च प्रयत्नं करोति ततः तस्मात् पूर्वकृतात् संस्काराद्भूयः बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे
कुरुनंदन ४३

हरिः ३३

67/1963

कथं पूर्वदेहबुद्धिसंयोग इत्युच्यते यः पूर्वजन्मनि कृतोऽभ्यासः स पूर्वाभ्यासः तेनैव बलवता ह्रियते हि यस्मादवशोऽपि स योग
भ्रष्टो न कृतं चेद्योगाभ्यासजातसंस्कारवता ह्रियते हि यस्मादवशोऽपि स योगभ्रष्टो न कृतं चेद्योगाभ्यासजातसंस्काराद्बलव
त्तरमधर्मादिलक्षणं कर्म तदा योगाभ्यासजनितेन संस्कारेण ह्रियते अधर्मश्चेद्बलवत्तरः कृतस्तेन योगजोऽपि संस्कारोऽभिभूयत
एव तत्क्षये तु योगजः संस्कारः स्वयमेव कार्यमारभते न दीर्घकालस्थस्यापि विनाशस्तस्यास्तीत्यर्थः जिज्ञासुरपि योगस्य
स्वरूपं ज्ञातुमिच्छन् योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः सामर्थ्यात् सोऽपि शब्दब्रह्म वेदोक्तकर्मानुष्ठानफलमतिवर्तते अप
करिष्यति ४४ किमु तद्बुद्ध्वा योगं निष्ठोऽभ्यासं कुर्यात् कुतश्च योगित्वं श्रेय इति प्रयत्नाद्यतमानोऽधिकं यतमान इ

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ४४ प्रयत्नाद्यतमानस्तु योगी संशुद्ध
किल्बिषः अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ४५ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः कर्मिभ्यश्चा
धिको योगी तस्माद्योगी भवार्जुन ४६ योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावान्भजते यो मां स मे युक्त
तमो मतः ४७ हरिः ॐ तत्सदिति श्रीमद्भगवद्गीता० कृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम षष्ठोऽध्यायः ६

त्यर्थः तत्र योगी विद्वान् संशुद्धकिल्बिषो विशुद्धकिल्बिषः संशुद्धपापोऽनेकेषु जन्मसु किंचित्किंचित्संस्कारजातमुप
चिन्वन् तेनोपचितेनानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धस्ततो लब्धसम्यग्दर्शनः सन् संन्यासी याति परां
गतिं ४५ यस्मादेवं तस्मात् तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि ज्ञानमत्र शास्त्रपाण्डित्यं तद्वद्भ्योऽपि मतोऽधिक इति क
र्मिभ्यः अग्निहोत्रादिकर्म तद्वद्भ्योऽपि अधिको योगी यस्मात्तस्माद्योगी भवार्जुन ४६ योगिनामपि सर्वेषां रुद्रा
दित्यादिपरायणानां मद्गतेन मयि वासुदेवे समाहितेनान्तरात्मना अन्तःकरणेन श्रद्धावान् श्रद्दधानः सन् भजते सेवते यो मां
स मे मम युक्ततमो अतिशयेन युक्तो मतोऽभिप्रेत इति ४७ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशंकरभगवतः कृ
तौ गीताभाष्ये अभ्यासयोगो नाम षष्ठोऽध्यायः ६ ॥

गी० व्रां०भा० योगिनामपि सर्वेषां मद्गतेनांतरात्मना श्रद्धावान्भजते यो मां स मे युक्ततमो मतः इति प्रश्नबीजमुपन्यस्य स्वयमेवेदृशो मदी
यं तत्त्वमेवं मद्गतेनांतरात्मनास्मादित्येतत् विवक्षुर्भगवानुवाच मयि वर्तमाने वक्ष्यमाणविशेषणविशिष्टे परमेश्वर आसक्तं मनो य
३५ स्य स मय्यासक्तमनाः पार्थ योगं युंजन्मनः समाधानं कुर्वन् मदाश्रयोऽहमेव परमेश्वर आश्रयो यस्य स मदाश्रयः यो हि पुरुषा
र्थेन केनचिदर्थी भवति स तत्साधनं कर्माग्निहोत्रादि तपो दानं वा किंचिदाश्रयं प्रतिपद्यते अयं तु योगी मामेवाश्रयं प्रतिपद्य
ते हित्वान्यत्साधनांतरं मय्येवासक्तमना भवति यस्त्वेवंभूतः सन् असंशयं समग्रं समस्तं विभूति बल शक्त्यैश्वर्यादि गुण
संपन्नं मां यथा येन प्रकारेण ज्ञास्यसि संशयमंतरेण एवमेव भगवानिति तच्छृणूच्यमानं मया १ तच्चेदं विषयं ज्ञानं ते तुभ्य
महं सविज्ञानं विज्ञानसहितं स्वानुभवसंयुक्तमिदं वक्ष्यामि कथयिष्याम्यशेषतः तज्ज्ञानं विवक्षितं स्तौति श्रोतुरभिमुखी

श्रीभगवानुवाच मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु १ ज्ञानं तेऽहं स
विज्ञानमिदं वक्ष्याम्यशेषतः यज्ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यते २ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये य
ततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ३ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा

करणाय यद्विज्ञात्वा यज्ज्ञानं ज्ञात्वा नेह भूयः पुनर्ज्ञातव्यं पुरुषार्थसाधनमवशिष्यते नावशेषो भवतीति मत्तत्त्वज्ञो यः स सर्वज्ञो भ
वतीत्यर्थः २ अतो विशिष्टफलत्वात् दुर्लभतरं ज्ञानं कथमित्युच्यते मनुष्याणां मध्ये सहस्रेषु अनेकेषु कश्चिद्यतति प्रयत्नं करोति सि
द्ध्यर्थं सिध्यते तेषां यततामपि सिद्धानां सिद्धा एव हि ते ये मोक्षाय यतंते तेषां कश्चिदेव मां वेत्ति तत्त्वतो यथावत् ३ अतः श्रोता
रं प्ररोचनेनाभिमुखीकृत्याह भूमिरिति पृथ्वीतन्मात्रं उच्यते न स्थूला भिन्ना प्रकृतिरष्टधेति वचनात् तथा अबादयोऽपि तन्मात्रा हेरंब
ण्येवोच्यंते आपोऽनलो वायुः खं मन इति मनसः कारणमहंकारो गृह्यते बुद्धिरित्यहंकारकारणं महत्तत्त्वं अहंकार इत्यविद्या
युक्तमव्यक्तं यथा विषसंयुक्तमन्नं विषमित्युच्यते एवमहंकारवासनावदव्यक्तं मूलकारणमहंकार इत्युच्यते प्रवर्तकत्वा ३५
दहंकारस्याहंकार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके इतीयं यथोक्ता प्रकृतिर्मम ऐश्वरी माया शक्तिरष्टधा भिन्ना भेदमागता ४

69/1943

अपरा न परा निकृष्टा अशुद्धानर्थकरी संसारबंधात्मिकेयमितोऽस्यास्तु अन्यां विशुद्धां प्रकृतिं ममात्मभूतां विद्धि मे
परां प्रकृष्टां जीवभूतां क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां महाबाहो यया प्रकृत्या इदं धार्यते जगदंतः प्रविश्य या ५ एतद्योनीनि
एते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनिर्येषां भूतानां तान्येतद्योनीनि भूतानि सर्वाणीत्येवमुपधारय जानीहि यस्मान्मम प्र
कृती योनिः कारणं सर्वभूतानामतोऽहं कृत्स्नस्य समस्तस्य जगतः प्रभव उत्पत्तिः प्रलयो विनाशस्तथा प्रकृतिद्वयद्वारेणाहं सर्वज्ञ
ईश्वरो जगतः कारणमित्यर्थः ६ यस्मादेवं तस्मात् मत्तः परमेश्वरात् परं अन्यत्कारणांतरं किंचिन्नास्ति न विद्यते अहमेव ज
गत्कारणमित्यर्थः हे धनंजय यस्मादेवं तस्मान्मयि सर्वाणि भूतानि सर्वमिदं जगत्प्रोतमनुस्यूतमनुगतं अनुविद्धं प्रथितमि
त्यर्थः दीर्घपटतंतुवत्सूत्रे च मणिगणा इव ७ केन केन धर्मेण विशिष्टे त्वयि सर्वं प्रोतमित्युच्यते रसोऽहं अप्सु अपां यः सारः स रसस्त
स्मिन् रसभूते मयि आपः प्रोता इत्यर्थः एवं सर्वत्र यथा रसभूत एवं प्रभास्मि शशिसूर्ययोः प्रणव ओंकारः सर्ववेदेषु तस्मि

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतां महाबाहो ययेदं धार्यते जगत् ५ एतद्योनीनि भूतानि सर्वाणीत्युपधार
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ६ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव
रसोऽहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ८ पुण्यो गंधः पृथिव्यां च तेजश्चास्मि
विभावसौ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ९ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं बुद्धिर्बुद्धिमतामस्मि तेजस्तेज

प्रणवभूते मयि सर्वे वेदाः प्रोतास्तथा खे व्योम्नि शब्दः सारभूतस्तस्मिन्मयि खं प्रोतं तथा पौरुषं पुरुषस्य भावो यतः पुंबुद्धि
र्नृषु तस्मिन्मयि पुरुषाः प्रोताः ८ पुण्यः सुरभिर्गंधः पृथिव्यां चाहं तस्मिन्मयि गंधभूते पृथिवी प्रोता पुण्यत्वं गंधस्य स्वभाव
त एवं पृथिव्यां दर्शितं अबादिषु सौरदेः पुण्यत्वोपलक्षणार्थं अपुण्यत्वं तु गंधादीनां अविद्याधर्माद्यपेक्षं संसारिणां भूतवि
शेषसंसर्गनिमित्तं च भवतीति तेजो दीप्तिश्चास्मि विभावसावग्नौ तथा जीवनं सर्वभूतेषु येन जीवंति सर्वाणि भूतानि तज्जीवनं तप
श्चास्मि तपस्विषु तस्मिन् तपस्विनः प्रोताः ९ बीजं प्ररोहकारणं मां विद्धि सर्वभूतानां हे पार्थ सनातनं चिरंतनं किंच बु
द्धिर्विवेकशक्तिरंतःकरणस्य बुद्धिमतां विवेकशक्तिमतां अस्मि तेजः प्रागल्भ्यं तद्वतां तेजस्विनामहं १० ॥

 बलं सामर्थ्यमोजो बलवतामहं तच्च बलं कामरागविवर्जितं कामश्च रागश्च कामरागौ कामः तृष्णा असंनिकृष्टेषु विषयेषु रागो
रंजना प्राप्तेषु विषयेषु ताभ्यां कामरागाभ्यां विवर्जितं देहादिधारणमात्रार्थं बलमहमस्मि न तु यत्संसारिणामिव तृष्णारागका
३५ रणं किंच धर्माविरुद्धो धर्मेण शास्त्रार्थेनाविरुद्धो यः प्राणिषु भूतेषु कामो यथा देहधारणमात्राद्यर्थो अशनपानादिविषय
: कामोस्मि भरतर्षभ ११ किंच ये चैव सात्त्विकाः सत्त्वनिर्वृत्ता भावाः पदार्थाः राजसा रजो निर्वृत्ता स्तामसास्तमो निर्वृत्ता ये के
चित्प्राणिनां स्वकर्मवशाज्जायन्ते तान्मत्त एव जायमानानिति एवं विद्धि समस्तानेव यद्यपि ते मत्तो जायन्ते तथापि न त्वहं तेषु तदधी
नस्तद्वशो यथा संसारिणः ते पुनर्मयि मद्वशा मदधीनाः १२ एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूता
त्मानं निर्गुणं संसारदोषबीजप्रदाहकारणं मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भगवान् तच्च किंनिमित्तं जगतो ज्ञानमि
त्युच्यते त्रिभिर्गुणमयैः गुणविकारैः रागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्यथोक्तैः सर्वमिदं प्राणिजातं जगन्मोहि

बलं बलवतां चाहं कामरागविवर्जितं धर्माविरुद्धो भूतेषु कामोस्मि भरतर्षभ ११ ये चैव सात्त्विका भावा राजसा
स्तामसाश्च ये मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि १२ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् मोहितं नाभिजा
नाति मामेभ्यः परमव्ययं १३ दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरंति ते १४
न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः माययापहृतज्ञाना आसुरं भावमाश्रिताः १५ ॥

तमविवेकितामापादितं सन्नाभिजानाति मामामेभ्यो यथोक्तेभ्यो गुणेभ्यः परं व्यतिरिक्तं विलक्षणं चाव्ययं व्ययरहितं ज
न्मादिसर्वभावविकारवर्जितमित्यर्थः १३ कथं पुनर्दैवीमेतां त्रिगुणात्मिकां वैष्णवीं मायामतितरंतीत्युच्यते दैवी देवस्य
मेश्वरस्य विष्णोः स्वभूता हि यस्मादेषा यथोक्ता मम गुणमयी माया दुरत्यया दुःखेनात्ययोतिक्रमणं यस्याः सा दु हरेव
रत्यया अतः नैवं सति सर्वधर्मान्परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये प्रपद्यन्ते ते मायामेतां सर्वभूतमोहिनी
न्तरंत्यतिक्रामंति संसारबंधनान्मुच्यंत इत्यर्थः १४ यदि त्वां प्रपन्ना मायामेतां तरंति कस्मात्त्वामेव सर्वे न प्रपद्यन्त इत्युच्यते न मां परमेश्व ३६
रं दुष्कृतिनः पापकारिणो मूढाः प्रपद्यन्ते नराधमाः नराणां मध्ये अधमा निकृष्टास्ते च मायया अपहृतज्ञानाः संमुषितज्ञाना
आसुरं भावं हिंसानृतादिलक्षणमाश्रिताः १५ ॥ ॥ ॥ ॥

71/1943

ये पुनर्नरोत्तमाः पुण्यकर्माणः चतुर्विधाश्चतुःप्रकारा भजंते सेवंते मां जनाः सुकृतिनः कृतपुण्यकर्माणो हेर्जुन आर्तः आर्ति
परिगृहीतस्तस्करव्याघ्ररोगादिनाभिभूतः आपन्नो जिज्ञासुर्भगवत्तत्त्वं ज्ञातुमिच्छुर्योऽर्थार्थी धनकामो ज्ञानी विष्णोस्तत्त्ववि
च्च भरतर्षभ १६ तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित् तत्त्ववित्त्वान्नित्ययुक्तो भवत्येकभक्तिश्चान्यस्य भजनीयस्यादर्शनात्
तः स एकभक्तिर्विशिष्यते विशेषमाधिक्यमापद्यते अतिरिच्यत इत्यर्थः प्रियो हि यस्मादहमात्मा ज्ञानिनो तस्मात्तस्याहमत्यर्थं प्रि
यः प्रसिद्धं हि लोके आत्मा प्रियो भवतीति तस्मात् ज्ञानिन आत्मत्वाद्वासुदेवः प्रियो भवतीत्यर्थः स च ज्ञानी मम वासुदेवस्या
त्मैवेति अतो ममात्यर्थं प्रियः न तर्ह्यार्तादयस्त्रयो वासुदेवस्य प्रिया न १७ किं तर्हि उदाराः उत्कृष्टाः सर्व एवैते त्रयोपि मम प्रि
या एवेत्यर्थः न हि कश्चिन्मद्भक्तो मम वासुदेवस्याप्रियो भवतीति ज्ञानी त्वत्यर्थं प्रियो भवतीति विशेषः तत्कस्मादित्याह ज्ञा
नी त्वात्मैव नान्यो मत्त इति मम मतं निश्चयः आस्थित आरोढुं प्रवृत्तः स ज्ञानी हि यस्मादहमेव भगवान्वासुदेवो नान्योस्मी

चतुर्विधा भजंते मां जनाः सुकृतिनोर्जुन आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ १६ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशि
ष्यते प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः १७ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं आस्थितः स हि युक्तात्मा मामेवानुत्तमां ग
तिं १८ बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति स महात्मा सुदुर्लभः १९ कामैस्तैस्तैर्हृतज्ञानाः प्रप
द्यंतेन्यदेवताः तं तं नियममास्थाय प्रकृत्या नियताः स्वया २० यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ॥

त्येवं युक्तात्मा समाहितचित्तः सन्मामेव परं ब्रह्म गन्तव्यमनुत्तमां गतिं गन्तुं प्रवृत्त इत्यर्थः १८ ज्ञानी पुनरपि स्तूयते बहूनां जन्म
नां ज्ञानार्थसंस्कारार्जनाश्रयाणामन्ते समाप्तौ ज्ञानवान् प्राप्तपरिपाकज्ञानो मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रतिपद्यते कथं
वासुदेवः सर्वमिति य एवं सर्वात्मानं मां प्रतिपद्यते स महात्मा न तत्समोन्योस्त्यधिको वा अतः सुदुर्लभः मनुष्याणां सहस्रेष्विति हि
॥१९ आत्मैव सर्वं वासुदेव इत्येवमप्रतिपत्तौ कारणमुच्यते कामैस्तैस्तैः पुत्रपशुस्वर्गादिविषयैर्हृतज्ञाना अपहृतविवेकज्ञानाः
प्रपद्यन्ते अन्यदेवताः प्राप्नुवंति वासुदेवादात्मनोन्या देवतास्तं तं नियमं देवताराधने प्रसिद्धो यो यो नियमस्तं तं नियममास्थाय
आश्रित्य प्रकृत्या स्वभावेन जन्मांतरार्जितसंस्कारविशेषेण नियता नियमिताः स्वया आत्मीयया २० तेषां च कामिनां यो यः
कामी यां यां देवतातनुं श्रद्धया संयुक्तो भक्तश्च सन्नर्चितुं पूजयितुमिच्छति तस्य तस्य कामिनः अचलां स्थिरां श्रद्धां तामे

गी॰शां॰भा॰ वविदधामि स्थिरां करोमि येयं पूर्वं प्रवृत्तः स्वभावतो यो यां देवतातनुमर्चितुमिच्छति २१ स तया मद्विहितया श्रद्धया युक्तः स
स्तस्या देवताया स्तन्वा आराधनमीहते चेष्टते लभते च ततस्तस्याः आराधिताया देवतातन्वाः कामानीप्सितान्मयैव परमेश्वरेण
३६ सर्वज्ञेन कर्मफलविभागज्ञतया विहितान्निर्मितान् स्तान् हि यस्मात्ते भगवता विहिताः कामास्तस्मात्तानवश्यं लभत इत्यर्थः
२२ हितान्निति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यं न हि कामा हिताः कस्यचित् २२ यस्मादन्तवत्साधनव्यापारा अविवे
किनः कामिनश्च ते ततः अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसां अल्पप्रज्ञानां देवान् देवयजो यान्ति देवान्यजन्तीति
देवयजस्ते देवान् यान्ति मद्भक्ता यान्ति मामपि २३ एवं समानेप्यायासे मामेव न प्रतिपद्यन्ते अनन्तफलाय अहो खलु कष्टं व
र्तत इत्यनुक्रोशं दर्शयति भगवान् किं निमित्तं मामेव न प्रतिपद्यन्त इत्युच्यते अव्यक्तमप्रकाशं पूर्वं सन्तमिदानीं व्यक्तिमापन्नं

तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं २१ स तया श्रद्धया युक्तस्तस्याराधनमीहते लभते च ततः कामान्मयैव
विहितान्हि तान् २२ अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसां देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि २३ अव्यक्तं व्यक्ति
मापन्नं मन्यन्ते मामबुद्धयः परं भावमजानन्तो ममाव्ययमनुत्तमं २४ नाहं प्रकाशः सर्वस्य योगमायासमावृतः मूढो
यं नाभिजानाति लोको मामजमव्ययं २५ वेदाहं समतीतानि वर्तमानानि चार्जुन भविष्याणि च भूतानि मां तु वेद न कश्चन २६

प्रकाशं गतं मन्यन्ते मां नित्यप्रसिद्धमीश्वरमपि सन्तं अबुद्धयः अविवेकिनः परं भावं परमात्मस्वरूपमजानन्तो अविवेकिनो ममाव
यं व्ययरहितं अनुत्तमं निरतिशयं मदीयं भावमजानन्तो मन्यन्त इत्यर्थः २४ तदज्ञानं किं निमित्तमित्युच्यते नाहं प्रकाशः सर्वस्य
लोकस्य केषांचिदेव मद्भक्तानां प्रकाशोहमित्यभिप्रायः योगमायासमावृतः योगो गुणानां युक्तिर्घटनं सैव माया यद्वा चित्तस हरिः
माधिर्वा योगो भगवतस्तत्कृता माया योगमाया तया योगमायया समावृतः संछन्न इत्यर्थः अत एव मूढो लोकोयं नाभिजा
नाति मामजमव्ययं २५ यया योगमायया समावृतं मां लोको नाभिजानाति नासौ योगमाया मदीया सती मम ईश्वरस्य मायावि ३६
नो ज्ञानं प्रतिबध्नाति यथान्यस्यापि मायाविनो ज्ञानं तद्वत् यत एवं अतः अहं तु वेद जाने समतीतानि समतिक्रान्तानि भूतानि व
र्तमानानि चार्जुन भविष्याणि च भूतानि मां तु वेद न कश्चन मद्भक्तं मच्छरणमेकं मुक्त्वा मत्तत्ववेदनाभावादेव न मां भजन्ते २६

73/1943

केन पुनर्मत्तत्त्ववेदनप्रतिबंधेन प्रतिबध्धानि सन्ति जायमानानि सर्वभूतानि मां न विदन्तीत्यपेक्षायामिदमाह इच्छा च द्वेषश्च
इच्छाद्वेषाभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थस्तेन इच्छाद्वेषसमुत्थेनेति विशेषणापेक्षायामिदमाह द्वन्द्वमोहेनेति द्वन्द्वनिमि
त्तो मोहो द्वन्द्वमोहस्तौ च इच्छाद्वेषौ शीतोष्णवत्परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वन्द्व
शब्देनाभिधीयेते तत्र यदेच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या लब्धात्मकौ भवतस्तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादन
द्वारेण परमार्थात्मविषयज्ञानोत्पत्तिप्रतिबंधकारणं मोहं जनयतः न हीच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविषय
ज्ञानमुत्पद्यते बहिरपि किमु वक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबंधे ज्ञानं नोत्पद्यत इत्यतस्तेने
च्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत भरतान्वयज सर्वभूतानि संमोहितानि सन्ति संमोहं संमूढतां सर्गे जन्मन्युत्पत्तिका
ल इत्येतद्यान्ति गच्छन्ति हे परंतप मोहवशान्येव सर्वभूतानि जायमानानि जायन्त इत्यभिप्रायः २७ यत एवमतस्तेन द्वन्द्व

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत सर्वभूतानि संमोहं सर्गे यान्ति परंतप २७ येषां त्वन्तगतं पापं जनानां पुण्यकर्मणां ते द्वं
द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः २८ जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं २९
साधिभूताधिदैवं मां साधियज्ञं च ये विदुः प्रयाणकालेपि च मां ते विदुर्युक्तचेतसः ३० हरिः ॐ तत्स॰ ज्ञानिके विभागो ना॰ ७

मोहेन प्रतिबद्धप्रज्ञानानि सर्वभूतानि मामात्मभूतं न जानन्ति अत एवात्मभावेन मां न भजन्ते के पुनरनेन द्वन्द्वमोहेन वि
र्मुक्ताः सन्तस्त्वां विदित्वा यथाशास्त्रमात्मभावेन भजन्त इत्यपेक्षितमर्थं दर्शयितुमुच्यते येषां तु पुनरन्तगतं समाप्तप्रायं क्षी
णं पापं जनानां पुण्यकर्मणां पुण्यं कर्म येषां सत्त्वशुद्धिकारणं विद्यते ते पुण्यकर्माणस्तेषां पुण्यकर्मणां ते द्वन्द्वमोहनि
र्मुक्ता यथोक्तेन द्वन्द्वमोहेन निर्मुक्ता भजन्ते मां परमात्मानं दृढव्रताः एवमेव परमार्थतत्त्वं नान्यथेत्येवं सर्वपरित्यागव्रतेन नि
श्चितविज्ञाना दृढव्रता उच्यन्ते २८ ते किमर्थं भजन्त इत्युच्यते जरामरणमोक्षाय जरामरणमोक्षार्थं मां परमेश्वरमाश्रित्य
मत्समाहितचित्ताः सन्तो यतन्ति प्रयतन्ते ये ते यद्ब्रह्म परं तद्विदुः कृत्स्नं समस्तमध्यात्मं प्रत्यगात्मविषयं वस्तु तद्विदुः कर्म चाखि
लं समस्तं विदुः २९ इति साधिभूताधिदैवमधिभूतं चाधिदैवं चाधिभूताधिदैवं सह अधिभूताधिदैवेन सह अधिभूताधिदैवेन
साधिभूताधिदैवं च मां ये विदुः साधियज्ञं च सहाधियज्ञेन साधियज्ञं ये विदुः प्रयाणकाले मरणकालेपि च मां ते विदुः यु

गी० शां० भा० कचेतसः समाहितचित्ता इति ३० इति श्रीमत्परमहंसपरिव्राज० शंकरभगवता० परापरप्रकृति योगो नाम सप्तमोऽध्यायः
तेब्रह्म तद्विदुः कृत्स्नमित्यादिना भगवता अर्जुनस्य प्रश्नबीजान्युपदिष्टानि यतः अतस्तत्प्रश्नार्थमर्जुन उवाच कथं केन प्रका
३० रेण ब्रह्मतत्त्वं चिंतनीयः किं तादात्म्येन किं वात्यंताभेदेनेत्याह कथमिति सर्वथापि सः किं अस्मिन्देहे वर्तते ततो बहिर्वा इह
त्सकोऽत्र बुध्यादिस्तत्पतिरिति कोवेति जिज्ञासायां ब्रूते कोवेति एषां प्रश्नानां कथाक्रमं निर्णयाय भगवानुवाच १ २ अक्षरं न
क्षरतीति परमात्मा एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति श्रुतेः ॐकारस्य चोमित्येकाक्षरं ब्रह्मे
ति परेण विशेषणात्तदग्रहणं परममिति च निरतिशये ब्रह्मण्यक्षरे उपपन्नतरं विशेषणं तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्र
त्यगात्मभावः स्वो भावः स्वभावोऽध्यात्ममुच्यते आत्मानं देहमधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्व
भावोऽध्यात्ममुच्यतेऽध्यात्मशब्देनाभिधीयते भूतभावोद्भवकरः भूतानां भावो भूतभावस्तस्योद्भवो भूतभावोद्भवस्तं करो

अर्जुन उ० किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते १ अधियज्ञः कथं कोऽत्र
देहेऽस्मिन्मधुसूदन प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः २ श्रीभगवानु० अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्य
ते भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ३ अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं अधियज्ञोऽहमेवात्र देहे देहभृ
तां वर ४ अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरं यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ५ ॥

तीति भूतभावोद्भवकरो भूतवस्तूत्पत्तिकर इत्यर्थः विसर्गो विसर्जनं देवतोद्देशेन चरुपुरोडाशादेः स्वद्रव्यस्य परित्यागः स एव
विसर्गलक्षणो यज्ञः कर्मसंज्ञितः कर्मशब्दितइत्येतस्माद्धि बीजभूताद्वृष्ट्यादिक्रमेण स्थावरजंगमानि भूतान्युद्भवंति ३ अधि
भूतं प्राणिजातमधिभवतीति कोसौ क्षरः क्षरतीति क्षरो विनाशी भावो यत्किंचिज्जनिमद्वस्त्वित्यर्थः पुरुषः पूर्णमनेन सर्वमिति हेरंबु
पुरि शयनाद्वा पुरुषः आदित्यांतर्गतो हिरण्यगर्भः सर्वप्राणिकरणानामनुग्राहकः सोधिदैवतं अधियज्ञः सर्वयज्ञाभि
मानिनी देवता विष्णवाख्या यज्ञो वै विष्णुरिति श्रुतेः स हि विष्णुरहमेवात्रास्मिन्देहे यो यज्ञस्तस्याहमधियज्ञो यज्ञो हि देह ३०
निर्वर्त्यत्वेन देहसमवायीति देहाधिकरणो भवति देहभृतां वर ४ अंतकाले च मरणकाले मामेव परमेश्वरं विष्णुं स्मरन्
मुक्त्वा परित्यज्य कलेवरं शरीरं यः प्रयाति गच्छति स मद्भावं वैष्णवं तत्त्वं याति नास्ति न विद्यते अत्रास्मिन्नर्थे संशयो याति वा न वेति ५

75/1993

नम हि विषय एवायं नियमः इति किं तर्हि यं यं वापि यं यं भावं देवताविशेषं स्मरंश्चिंतयन्त्यजति परित्यजति अंते अंतकाले प्राण
वियोगकाले कलेवरं तं तमेव स्मृतं भावमेवैति नान्यं कौंतेय सदा सर्वदा तद्भावभावितस्तस्मिन्भावः स तद्भावः स भावितः स्म
र्यमाणतया अभ्यस्तो येन स तद्भावभावितः सन् ६ यस्मादेवमंत्याभावना देहांतरप्राप्तौ कारणं अतः तस्मात्सर्वेषु कालेषु मामनु
स्मर यथाशास्त्रं युध्य च युध्यस्व धर्मं कुरु मय्यर्पिते मनोबुद्धी यस्य तव स त्वं मय्यर्पितमनोबुद्धिः सन्मामेव यथास्मृतमेष्यसि
प्राप्स्यसि असंशयो न संशयोऽत्र विद्यते ७ किंच अभ्यासयोगयुक्तेन मयि चित्तसमर्पणविषयभूत एकस्मिंस्तुल्यप्रत्ययावृ
त्तिलक्षणो विलक्षणप्रत्ययानंतरितोऽभ्यासः स चाभ्यासो योगस्तेन युक्तं तत्रैव व्यापृतं योगिनश्चेतस्तेन चेतसा नान्यगामिना ना
न्यत्र विषयांतरे गंतुं शीलमस्येति नान्यगामि तेन नान्यगामिना परमं निरतिशयं पुरुषं दिव्यं दिवि सूर्यमंडले भवं दिव्यं याति गच्छति
हे पार्थ अनुचिंतयन् शास्त्राचार्योपदेशमनुध्यायन् इत्येतत् ८ किंविशिष्टं च पुरुषं यातीत्युच्यते कविं क्रांतदर्शिनं सर्वज्ञं पुराणं

यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरं तं तमेवैति कौंतेय सदा तद्भावभावितः ६ तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च म
य्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ७ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ८
कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ९ प्रयाण
काले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं १० ॥

चिरंतनं अनुशासितारं सर्वस्य जगतः प्रशासितारमणोः सूक्ष्मादप्यणीयांसं सूक्ष्मतरमनुस्मरेदनुचिंतयेद्यः कश्चित् सर्वस्य सर्व
कर्मफलजातस्य धातारं विचित्रतया प्राणिभ्यो विभक्तारं विभज्य दातारं आचिंत्यरूपं नास्य रूपं नियतं विद्यमानमपि केनचिच्चिंतयि
तुं शक्यत इत्यचिंत्यरूपमादित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य स्मात् आदित्यवर्णं तमसः परस्तादज्ञानलक्षणान्मोहांधकारा
त्परं तमनुचिंतयन्यातीति पूर्वेणैव संबंधः ९ किंच प्रयाणकाले मरणकाले मनसाऽचलेन चलनवर्जितेन भक्त्या युक्तो भजनं भक्ति
स्तया युक्तो योगबलेन चैव योगस्य बलं योगबलं तेन समाधिजसंस्कारप्रचयजनितं स्वचित्तस्थैर्यलक्षणं योगबलं तेन च युक्त
इत्यर्थः पूर्वं हृदयपुंडरीके वशीकृत्य चित्तं तत ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणमावेश्य स्थापयित्वा सम्य
गप्रमत्तः स तं एवंविद्वान्योगी कविं पुराणमित्यादिलक्षणं तं परं पुरुषमुपैति प्रतिपद्यते दिव्यं द्योतनात्मकं १० ॥

पुनरपि वक्ष्यमाणेनोपायेन प्रतिपित्सितस्य ब्रह्मणो वेदविदित्यादिना विशेषणविशेष्यस्याभिधानं करोति भगवान् यदक्षरं न
क्षरतीति अक्षरं अविनाशि वेदविदो वेदार्थज्ञा वदंति तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदंतीति श्रुतेः सर्वविशेषनिवर्तकत्वेना
३८ भिवदंति अस्थूलमनण्वित्यादि किंच विशंति यद्विशंति सम्यग्दर्शनप्राप्तौ यतयो यतनशीलाः संन्यासिनो वीतरागाः यच्चाक्ष
रमिच्छंतो ज्ञातुमिति वाक्यशेषः ब्रह्मचर्यं गुरौ चरंति तत्ते पदं तदक्षराख्यं पदं पदनीयं ते तव संग्रहेण संग्रहः संक्षेपस्तेन संक्षेपे
ण प्रवक्ष्ये कथयिष्यामि स यो ह वै तद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीत कतमं वा व तेन लोकं जयति तस्मै स होवाच
एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः इत्युपक्रम्य यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत इत्यादि
नान्यत्र धर्मादन्यत्राधर्मादिति चोपक्रम्य सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति यदिच्छंतो ब्रह्मचर्यं चरं
ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतदित्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण प्रतिमावत्प्रतीकरूपेण च परब्रह्म

यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ११ सर्वद्वाराणि संयम्य मनो हृदि नि
रुध्य च मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां १२ ॐमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन् देहं स याति परमां गतिं १३

प्रतिपत्तिसाधनत्वेन मंदमध्यमबुद्धीनां विवक्षितस्योंकारस्योपासनं कालांतरे मुक्तिफलमुक्तं यत्तदेवेहापि वक्तव्यं कविं पुरा
णमनुशासितारं यदक्षरं वेदविदो वदंतीति चोपन्यस्तस्य परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्योंकारस्य कालांतर
मुक्तिफलमुपासनं योगधारणासहितं वक्तव्यं प्रसक्तानुप्रसक्तं च यत्किंचिदित्येवमर्थमुत्तरो ग्रंथ आरभ्यते ११ सर्वद्वाराणि सर्वा
णि च तानि द्वाराणि च उपलब्धौ तानि सर्वाणि संयम्य संयमनं कृत्वा मनो हृदि हृदयपुंडरीके निरुध्य निरोधं कृत्वा निःप्रचारमापा हेरंब
द्य तत्र वशीकृतेन मनसा हृदयादूर्ध्वगामिन्या नाड्योर्ध्वमारुह्य मूर्ध्न्याधायात्मनः प्राणमास्थितः प्रवृत्तो योगधारणां धारयि
तुं तथैव च धारयन् १२ ॐमित्येकाक्षरं ब्रह्मणोऽभिधानभूतमोंकारं व्याहरन्नुच्चरन् तदर्थभूतं मामीश्वरमनुस्मरन्ननुचिंत ३८
यन् यः प्रयाति म्रियते स त्यजन् परित्यजन् देहं शरीरं त्यजन्निति प्रयाणविशेषणार्थं देहत्यागेन प्रयाणमात्मनो न स्वरूपना
शेनेत्यर्थः स एवं त्यजन् याति गच्छति परमां प्रकृष्टां गतिं १३ ॥ ॥

77
1443

किंच अनन्यचेताः नान्यविषये चेतो यस्य सोऽयमनन्यचेता योगी सततं सर्वदा यो मां परमेश्वरं स्मरति नित्यशः सततमिति नैरंतर्य
मुच्यते नित्यश इति दीर्घकालत्वमुच्यते न षण्मासं संवत्सरं वा किं तर्हि यावज्जीवं नैरंतर्येण यो मां स्मरतीत्यर्थः तस्य योगिनो
हं सुलभः सुखेन लभ्यः पार्थ नित्ययुक्तस्य सदा समाहितस्य योगिनः १४ यत एवमतोऽनन्यचेताः सन् मयि सदा समाहि
तो भवेत् तव सौलभ्येन किं स्यादिति उच्यते शृणु तन्मम सौलभ्येन यद्भवति मामुपेत्य मामीश्वरमुपेत्य मद्भावमापद्य पुनर्जन्म पुनरु
न त्पत्तिं नाप्नुवंति किंविशिष्टं पुनर्जन्म न प्राप्नुवंतीति तद्विशेषणमाह दुःखालयं दुःखानामाध्यात्मिकादीनामालयमाश्रयमालीयंते
स्मिन् दुःखानीति तं दुःखालयं जन्म न केवलं दुःखालयमशाश्वतं अनवस्थितस्वरूपं च नाप्नुवंतीदृशं पुनर्जन्म महात्मानो यतयः सं
सिद्धिं मोक्षाख्यां परमां प्रकृष्टां गताः प्राप्ताः १५ ये पुनर्मां न प्राप्नुवंति ते पुनरावर्तंते इत्युच्यते आब्रह्मभुवनाद्भवंत्यस्मिन् भूतानी
ति भुवनं ब्रह्मणो भुवनं ब्रह्मभुवनं ब्रह्मलोक इत्यर्थः आब्रह्मभुवनात्सह ब्रह्मभुवनेन लोकाः सर्वे पुनरावर्तिनः पुनरावृत्तिस्वभा

अनन्यचेताः सततं यो मां स्मरति नित्यशः तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः १४ मामुपेत्य पुनर्जन्म दुःखालयमशा
श्वतं नाप्नुवंति महात्मानः संसिद्धिं परमां गताः १५ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मामुपेत्य तु कौंतेय पुनर्जन्म न
विद्यते १६ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः १७ अव्यक्ताद्व्यक्तयः सर्वाः
प्रभवंत्यहरागमे रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके १८ ॥ ॥

वा हे अर्जुन मामेकमुपेत्य तु कौंतेय पुनर्जन्म पुनरुत्पत्तिर्न विद्यते १६ ब्रह्मलोकसहिता लोकाः कस्मात्पुनरावर्तिनः कालपरि
च्छिन्नत्वात् कथं सहस्रयुगपर्यंतं सहस्राणि युगानि पर्यंतः पर्यवसानं यस्याह्नः तदहः सहस्रयुगपर्यंतं ब्रह्मणः प्रजापतेर्विरा
जो विदुः रात्रिमपि युगसहस्रांतामहःपरिमाणामेव के विदुरित्याह तेऽहोरात्रविदः कालसंख्याविदो जना इत्यर्थः १७ य
त एवं कालपरिच्छिन्नास्तेऽतः पुनरावर्तिनो लोकाः प्रजापतेरहनि यद्भवति रात्रौ च तदुच्यते अव्यक्ताद्व्यक्तं प्रजापतेः स्वाप
तः स्वापावस्था तस्मादव्यक्ताद्व्यक्तयो व्यज्यंत इति व्यक्तयः स्थावरजंगमलक्षणात्मिकाः सर्वाः प्रजाः प्रभवंति अभिव्यज्यं
ते अहरागमो हरागमस्तस्मिन्नहरागमे काले ब्रह्मणः प्रबोधे तथा रात्र्यागमे ब्रह्मणः स्वापकाले प्रलीयंते सर्वा व्यक्तयस्तत्रैव पू
र्वोक्तेऽव्यक्तसंज्ञके १८ ॥ ॥ ॥ ॥

गी० शां० भा० अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थं बंधमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थं अविद्यादिक्लेशमूलकर्माशयवशात्

अवशो भूतग्रामो भूत्वा भूत्वा प्रलीयत इत्यतः संसारे वैराग्यप्रदर्शनार्थं चेदमुच्यते तदाह, भूतग्रामो भूतसमुदायः स्था

३९ वरजंगमलक्षणो यः पूर्वस्मिन् कल्पे आसीत् स एवायं नान्यो भूत्वा भूत्वा अहरागमे प्रलीयते पुनः पुनः रात्र्यागमेऽहःक्षये

अवशोऽस्वतंत्र एव पार्थ प्रभवति जायते स एव अवश एव अहरागमे १९ यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्टः ओमि

त्येकाक्षरं ब्रह्मेत्यादिना अथेदानीमक्षरस्यैव स्वरूपनिर्दिदिक्षयेदमुच्यते अनेन योगमार्गेणेदं गंतव्यमिति परो व्यतिरिक्तो

भिन्नः कुतस्तस्मात्पूर्वोक्तात् तुशब्दोऽक्षरस्य विवक्षितस्याव्यक्ताद्वैलक्षण्यविशेषणार्थः भावोऽक्षराख्यं परं ब्रह्म व्यतिरि

क्तत्वे सत्यपि सालक्षण्यप्रसंगोऽस्तीति तन्निवृत्त्यर्थमाहान्य इति अन्यो विलक्षणः स चाव्यक्तोऽनिंद्रियगोचरः परस्तस्मादित्युक्तं

कस्मात्पुनः परः पूर्वोक्तात् भूतग्रामबीजभूतादविद्यालक्षणादव्यक्तादन्यो विलक्षणो भाव इत्यभिप्रायः सनातनश्चिरंतनः

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे १९ परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्ता

त्सनातनः यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति २० अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं यं प्राप्य न निवर्तं

ते तद्धाम परमं मम २१ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया यस्यांतःस्थानि भूतानि येन सर्वमिदं ततं २२

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ २३

यो यः स भावः सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति २० यो सौ भावोऽव्यक्तोऽक्षर इत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तं भावमा

हुः परमां प्रकृष्टां गतिं यं भावं प्राप्य गत्वा न निवर्तंते संसाराय तद्धाम स्थानं परमं प्रकृष्टं मम विष्णोः परमं पदमित्यर्थः २१ त

ल्लब्धेरुपाय उच्यते पुरुषः पुरि शयनात् पूर्णत्वाद्वा स परः पार्थ परो निरतिशयो यस्मान्न पुरुषात्परं किंचित् स भक्त्या लभ्यस्त्व

नन्यया ज्ञानलक्षणया आत्मविषयया यस्य पुरुषस्यांतःस्थानि मध्यस्थानि कार्यभूतानि भूतानि कार्यं हि कारणस्यांत

र्वर्ति भवति येन पुरुषेण सर्वमिदं जगत्ततं व्याप्तमाकाशेनेव घटादि प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालां

तरमुक्तिभाजां ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति यत्र काल इत्यादि विवक्षितार्थसमर्पणार्थमुच्यते २२ आवृत्तिमार्गो

पन्यास इतरमार्गस्तुत्यर्थः यत्र काले प्रयाता इति व्यवहितेन संबंधः यत्र यस्मिन्काले त्वनावृत्तिमपुनर्जन्म आवृत्तिं त

द्विपरीतां चैव योगिन इति योगिनः कर्मिणश्चोच्यंते कर्मिणस्तु गुणतः कर्मयोगेन योगिनामित्यविशिष्टत्वात् तत्र

ते योगिनः यत्र काले प्रयाता मृता योगिनोऽनावृत्तिं यांति यत्र च काले प्रयाता आवृत्तिं तं कालं प्रवक्ष्यामि भरतर्षभ २३ तं काल

माह अग्निः कालाभिमानिनी देवता तथा ज्योतिर्देवतैव कालाभिमानिनी अथवा अग्निज्योतिषी यथाश्रुते एव देवते भूयसा

तु निर्देशो यत्र काले तं कालमिति आम्रवणवत् तथाहर्देवताहः कालाभिमानिनी शुक्लः शुक्लपक्षदेवता षण्मासा उत्तराय

णं तत्रापि देवतैव मार्गभूतेति स्थितोऽन्यत्र न्यायस्तत्र तस्मिन्मार्गे प्रयाता मृता गच्छंति ब्रह्म ब्रह्मविदो ब्रह्मोपासनपरा जनाः क्र

मेणेति वाक्यशेषः न हि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिरागतिर्वा क्वचिदस्ति न तस्य प्राणा उत्क्रामंतीति श्रु

ते ब्रह्म संलीनप्राणा एव ते ब्रह्ममया ब्रह्मभूता एव ते क्रमेणानुगच्छंति ब्रह्म ब्रह्मविदो जनाः २४ धूमो रात्रिर्धूमाभिमानिनी रा

त्र्यभिमानिनी च देवता तथा कृष्णः कृष्णपक्षदेवता षण्मासा दक्षिणायनमिति पूर्ववद्देवतैव तत्र चांद्रमसं ज्योतिश्चंद्रमसं ज्यो

तिः फलमिष्टादिकारी योगी कर्मी प्राप्य भुक्त्वा तत्क्षयादिह पुनर्निवर्तते २५ शुक्लकृष्णे शुक्ला च कृष्णा च शुक्लकृष्णे ज्ञान

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदो जनाः २४ धूमो रात्रिस्तथा कृष्णः षण्मासा

दक्षिणायनं तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते २५ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिम

न्ययावर्तते पुनः २६ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन २७ वेदेषु यज्ञेषु

तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं २८ हरिः ॐ तत्स० ब्रह्माक्षरनिर्दे

प्रकाशकत्वाच्छुक्ला तदभावात्कृष्णा एते शुक्लकृष्णे हि गती जगतोऽधिकृतानां ज्ञानकर्मणोर्न जगतः सर्वस्यैवेति गती संभवतः

शाश्वते नित्ये संसारस्य नित्यत्वान्मते अभिप्रेते तत्रैकया शुक्लया यात्यनावृत्तिमन्यया इतरयावर्तते पुनर्भूयः २६ नैते यथोक्ते

सृती मार्गौ पार्थ जानन्संसाराय एका अन्या मोक्षायेति योगी न मुह्यति कश्चन कश्चिदपि तस्मात्सर्वेषु कालेषु योगयुक्तः समा

हितो भवार्जुनेति २७ शृणु योगस्य माहात्म्यं वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्येनानुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्य

ग्दत्तेषु यदेतेषु पुण्यफलं पुण्यस्य फलं पुण्यफलं प्रदिष्टं शास्त्रेणात्येति अतीत्य गच्छति तत्सर्वं फलजातमिदं विदित्वा सप्तप्रश्नप्रति

वचनद्वारेणोक्तमर्थं सम्यगवधार्यानुष्ठाय योगी परं प्रकृष्टमैश्वरं स्थानमुपैति च प्रतिपद्यते आद्यमादौ भवं कारणं ब्रह्मे

त्यर्थः २८ इति श्रीमत्परमहंसपरिव्राजकाचार्य० गीता० भा० ब्रह्माक्षरनिर्देशो नाम अष्टमोऽध्यायः ८

गीता॰भा॰ अहं मनादीद्वारणधारणायोगः सगुण उक्तस्तस्य च फलमस्याचिरादिक्रमेणकालान्तरे पुब्रह्मप्राप्तिलक्षणमेवानावृत्तिरूप नि
र्दिष्टं तत्रानेनैव प्रकारेण मोक्षप्राप्तिः कालमधिगम्यते नान्यथेति तदाशंकाव्यावर्तयिषया श्रीभगवानु॰ इदं ब्रह्मज्ञानं वक्ष्यमाण
५० मुक्तं च पूर्वेष्वध्यायेषु तत्त्वबुध्यासंनिधीकृत्य इदमित्याह तुशब्दो विशेषनिर्धारणार्थः इदमेव तु सम्यक् ज्ञानं साक्षान्मोक्षप्राप्ति
साधनं वासुदेवः सर्वमिति आत्मैवेदं सर्वमेकमेवाद्वितीयमित्यादिश्रुतिस्मृतिभ्यो नान्यत् अथ येऽन्यथातो विदुरन्यराजानस्ते
क्षय्यलोका भवन्तीत्यादिश्रुतिभ्यश्च ते तुभ्यं गुह्यतमं गोप्यतमं प्रवक्ष्यामि कथयिष्यामि अनसूयवे असूयारहिताय किं तत्
ज्ञानं किं विशिष्टं विज्ञानसहितं अनुभवयुक्तं यज्ज्ञानं ज्ञात्वा मोक्ष्यसे अशुभात् संसारबन्धनात् १ तच्च स्तूयते राजविद्या वि
द्यानां राजा दीप्त्यतिशयवत्त्वात् दीप्यते हि यमतिशयेन ब्रह्मविद्या सर्वविद्यानां राजगुह्यं तथा गुह्यानां राजा पवित्रं पावनमिदमु
त्तमं सर्वपापानां नाशशुद्धिकारणमिदं ब्रह्मविज्ञानमुक्तं शतमनेकजन्मसहस्रसंचितमपि धर्माधर्मादि समूलं कर्मक्ष

श्रीभगवानु॰ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् १ राजविद्या राजगुह्यं पवि
त्रमिदमुत्तमं प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं २ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः प्रयाता यांति तं कालं वक्ष्यामि भरतर्षभ ३

णमात्राद्भस्मीकरोतीत्यतो भवतः किं तस्य पावनत्वं वक्तव्यं किं च प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिवावगमो यस्य तत्त्वप्रत्यक्षावग
ममनेकगुणवतोऽपि धर्मविरुद्धत्वं दृष्टं न तथात्मज्ञानं धर्मविरोधि किं तु धर्म्यं धर्मादनपेतमेवमपि स्याद्दुःखसंपाद्यमित्यतः
आह सुसुखं कर्तुं यथा रत्नविवेकविज्ञानं तत्राल्पायासानां कर्मणां सुखसंपाद्यानामल्पफलत्वं दुष्कराणां च महाफलत्वं
दृष्टमिति इदं तु सुखसंपाद्यत्वात् फलक्षयात् व्येतीति प्राप्तमत आह अव्ययं नास्य फलतः कर्मवत् व्ययोऽस्तीति अव्ययं २
(आवृत्ति मार्गोपन्यासइतरमार्गस्तुत्यर्थः यत्र काले प्रयाता इति व्यवहितेन संबंधः यत्र यस्मिन्काले त्वनावृत्तिमपुनर्ज
न्मआवृत्तिं तद्विपरीतां चैव योगिन इति योगिनः कर्मिणश्चोच्यन्ते कर्मिणस्तु गुणतः कर्मयोगेन योगिनामिति विशे
षणात् तत्र विभज्यन्ते योगिनः यत्र काले प्रयाता मृता योगिनो नावृत्तिं यांति यत्र च काले प्रयाता आवृत्तिं तं कालं प्रव
क्ष्यामि भरतर्षभ ३ ॥ अतः श्रद्धया आत्मज्ञाने ये पुनः अश्रद्दधानाः श्रद्धाविरहिताः आत्मज्ञानस्य धर्मस्या

हेरंब
५०

81
1943

स्य स्वरूपे तत्फले च नास्तिकाः पापकारिणो असुराणामुपनिषद्दे हमात्रात्मदर्शनमेव प्रतिपन्नाः असुतृपः पापाः पुरुषाः परं
तप अप्राप्य मां परमेश्वरं मत्प्राप्तौ नैवाशंकेति मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमप्यप्राप्येत्यर्थः निवर्तन्ते निश्चयेनावर्त
न्ते क्व मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारो मृत्युसंसारस्तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गस्तस्मिन्नेव वर्तन्त इत्यर्थः ३
इति ज्ञानं स्तुत्वार्जुनमभिमुखीकृत्याह मया मम यः परोभावस्तेन ततं व्याप्तं सर्वमिदं जगत् अव्यक्तमूर्तिना अव्यक्ता मूर्तिः
स्वरूपं यस्य मम सोऽहमव्यक्तमूर्तिस्तेनाव्यक्तमूर्तिना करणागोचरस्वरूपेणेत्यर्थः तस्मिन्मयि अव्यक्तमूर्तौ स्थितानि सर्वभू
तानि ब्रह्मादीनि स्तंबपर्यन्तानि नहि निरात्मकं किंचिद्भूतं व्यवहारायावकल्पते अतो मत्स्थानि मया आत्मनात्मवत्तेन स्थितान्यतो
मयि स्थितानीत्युच्यन्ते तेषां भूतानामहमात्मेति अतस्तेषु स्थित इति मूढबुद्धीनामवभासते अतो ब्रवीमि न चाहं तेषु भूते
ष्ववस्थितोऽमूर्तत्वात्संश्लेषाभावेनाकाशस्याप्यन्तरतरो ह्यहं ४ नह्यसंसर्गिवस्तु क्वचिदाधेयभावेनावस्थितं भवत्यत एवासं

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ४ न च मत्स्थानि भूतानि पश्य मे योग
मैश्वरं भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ५ यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् तथा सर्वाणि भूतानि मत्
स्थानीत्युपधारय ६

संसर्गित्वान्मम न च मत्स्थानि भूतानि ब्रह्मादीनि पश्य मे योगं युक्तिं घटनं मे मम ऐश्वरं ईश्वरस्येदमैश्वरं योगमात्मनो याथा
त्म्यमित्यर्थः तथा च श्रुतिरसंसर्गित्वादसंगतां दर्शयत्यसंगो नहि सज्जत इति इदं चाश्चर्यमन्यत्पश्य भूतभृदसंगोऽपि सन्
भूतानि बिभर्ति न च भूतस्थो यथोक्तेन न्यायेन दर्शितत्वात् भूतस्थत्वानुपपत्तेः कथं पुनरुच्यते सो मम आत्मेति विभज्य देहा
दिसंघातं तस्मिन्नहंकारमध्यारोप्य लोकबुद्धिमनुसरन् व्यपदिशति ममात्मेति न पुनरात्मन आत्मान्य इति लोकवदवि
जानन् तथा भूतभावनो भूतानि भावयत्युत्पादयति वर्धयतीति वा भूतभावनः ५ यथोक्तेन श्लोकद्वयेनोक्तमर्थं दृष्टां
तेनोपपादयन्नाह यथा लोके आकाशस्थित आकाशे स्थितो नित्यं सदा वायुः सर्वत्र गच्छतीति सर्वत्रगो महान् परिमाण
तस्तथाकाशवत्सर्वगते मयि असंश्लेषेणैव स्थितानीत्येवमुपधारय जानीहि ६ ॥

गी० टी० भा० एवं वायुराकाशादुत्पन्नमपरिच्छिन्नानि सर्वभूतानि स्थितिकाले तानि सर्वभूतानि कौंतेय प्रकृतिं त्रिगुणात्मिकां अपरां यांति
मामिकां मदीयां कल्पक्षये प्रलयकाले पुनर्भूयस्तानि भूतान्युत्पत्तिकाले कल्पादौ विसृजाम्युत्पादयाम्यहं पूर्ववत् ७ एव
४१ मविद्यालक्षणां प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः प्रकृतिमोहितं भूतग्रामं भूतसमुदायमिमं वर्तमानकल्पे समस्त
मवशमस्वतंत्रमविद्यादिदोषैः परवशीकृतं प्रकृतेर्वशात्स्वभाववशात् ८ तर्हि तत्र तस्येश्वरस्य भूतग्रामं विषमं
विदधतः तन्निमित्ताभ्यां धर्माधर्माभ्यां संबंधः स्यादित्यं तदिदमाह भगवान् न च मामीशं तानि भूतग्रामस्य विषमविसर्गनिमि
त्तानि कर्माणि निबध्नंति धनंजय कर्माणि न निबध्नंतीत्यर्थः तत्र कर्मणामसंबंधत्वे कारणमाह उदासीनवद्यथोदासीनउप
क्षकः कश्चित्तद्वदासीनं मामविक्रियमसंसक्तं फलसंगरहितमभिमानवर्जितं अहं करोमीति फलासंगरहितं तेषु कर्मसु
तोऽन्यस्यापि कर्तृत्वाभिमानाभावः फलासंगाभावश्च अबंधकारणमन्यथा कर्मभिर्बध्यते मूढः कोशकारवदित्यभिप्रायः
तत्र भूतग्राममिमं विसृजाम्युदासीनमिति च विरुद्धमुच्यते इति तत्परिहारार्थमाह मयाध्यक्षेणेति मया सर्वतो दृशिमात्रस्वरूपेणाविक्रि

सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकां कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं ७ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ८ न च मां तानि कर्माणि निबध्नंति धनंजय उदासीनवदासीनमसक्तं तेषु कर्मसु ९
मयाध्यक्षेण प्रकृतिः सूयते सचराचरं हेतुनानेन कौंतेय जगद्विपरिवर्तते १० ॥ ॥

यात्मनाऽध्यक्षेण मम मायात्रिगुणात्मिका विद्यालक्षणा प्रकृतिः सूयते उत्पादयति सचराचरं जगत् तथा च मंत्रवर्णः
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति हेतुना
निमित्तेनानेनाध्यक्षत्वेन कौंतेय जगत्सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्तते सर्वावस्थासु हि जगत्प्रवृत्तिः कर्मफलोपभोग निमित्ता हि हेदं
जगतः सर्वाप्रवृत्तिरहमिदं भोक्ष्ये पश्यामि श्रृणोमीदं सुखमनुभवामि तदर्थमिदं करिष्यामि तदर्थमिदं करिष्ये इदं ज्ञा
स्यामित्याद्यवगत्यवसानैव योऽस्याध्यक्षः परमे व्योमन्नित्यादयश्च मंत्रा एतमर्थं दर्शयंति ततश्चैकस्य देवस्य सर्वाध्य ४१
क्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगानभिसंबंधिनोऽन्यस्य चेतनांतरस्याभावे भोक्त्रन्तरस्याभावात् किंनिमित्तेयं
सृष्टिरित्यत्र प्रश्नप्रतिवचनेऽनुपपन्ने को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिरित्यादिमंत्रवर्णादिभ्यो
दर्शितं भगवता मम ज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतव इति १० ॥ ॥ ॥

83/1563

एवं मां नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वजंतूनामात्मानमपि संतं अवजानंति अवज्ञां परिभवं कुर्वंति मां मूढा अविवे
किनो मानुषीं मनुष्यसंबंधिनीं तनुं देहमाश्रितं मनुष्यदेहेन व्यवहरंतमित्येतत् परं प्रकृष्टं भावं परमात्मतत्त्वमाकाशकल्प
माकाशादप्यंतरतममजानंतः मम भूतमहेश्वरं सर्वभूतानां महांतमीश्वरं स्वमात्मानं ततश्च तस्य ममावज्ञानभावनेनाहता
वराकास्ते ११ कथं मोघाशा वृथा आशा आशिषो येषां ते मोघाशास्तथा मोघकर्माणो यानि चाग्निहोत्रादीनि तैरनुष्ठीयमाना
नि तानि कर्माणि च तेषां भगवत्परिभवात्स्वात्मभूतस्यावज्ञानान्मोघान्येव निष्फलानि कर्माणि भवंतीति मोघकर्माण
स्तथा मोघज्ञाना निष्फलविज्ञानाः ज्ञानमपि तेषां निष्फलमेव स्यात् विचेतसो विगतविवेकाश्च ते भवंतीत्यभिप्रायः किंच
ते भवंति राक्षसीं रक्षसां प्रकृतिं स्वभावमसुराणां च प्रकृतिं मोहिनीं मोहकरीं देहात्मवादिनीं श्रिता आश्रिताः छिंधि भिंधि
पिब खाद परस्वमपहरेत्येवंशीलाः क्रूरकर्माणो भवंतीत्यर्थः असुर्या नाम ते लोका इति श्रुतेः १२ ये पुनः श्रद्दधानाः

अवजानंति मां मूढा मानुषीं तनुमाश्रितं परं भावमजानंतो मम भूतमहेश्वरं ११ मोघाशा मोघकर्माणो मोघज्ञाना वि
चेतसः राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः १२ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्यनन्यमन
सो ज्ञात्वा भूतादिमव्ययं १३ सततं कीर्तयंतो मां यतंतश्च दृढव्रताः नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते १४ ज्ञा
नयज्ञेन चाप्यन्ये यजंतो मामुपासते एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखं १५ ॥

भगवद्भक्तिलक्षणमोक्षमार्गे प्रवृत्ताः महात्मानस्त्वक्षुद्रचित्ताः मामीश्वरं पार्थ दैवीं देवानां प्रकृतिं शमदमदयाश्रद्धादि
लक्षणामाश्रिताः संतो भजंति सेवंते अनन्यमनसोऽनन्यचित्ताः ज्ञात्वा भूतादिं भूतानामादिकारणमव्ययं १३ कथं सततं सर्वदा
भगवंतं ब्रह्मस्वरूपं मां कीर्तयंतो यतंतश्चेंद्रियोपसंहारशमदमदयाहिंसादिधर्मैः प्रयतंतश्च दृढव्रताः दृढं स्थिरमचाल्यं
व्रतं येषां ते दृढव्रताः नमस्यंतश्च मां हृदयेशयमात्मानं भक्त्या नित्ययुक्ताः संत उपासते सेवंते १४ ते केन केन प्रकारेणोपासत
इत्युच्यते ज्ञानयज्ञेन ज्ञानमेव भगवत्तत्त्वविषयं यज्ञस्तेन ज्ञानयज्ञेन भजंतः पूजयंतो मामीश्वरं चाप्यन्ये अन्यामुपासनां परित्य
ज्य उपासते तच्च ज्ञानमेकत्वेन एकमेव परं ब्रह्मेति परमार्थदर्शनेन यजंत उपासते केचिच्च पृथक्त्वेन आदित्यचंद्रादिभेदेन
स एव भगवान्विष्णुरवस्थित इत्युपासते केचिद्बहुधावस्थितः स एव भगवान्सर्वतोमुखो विश्वरूप इति तं विश्वरूपं सर्वतो
मुखं बहुधा बहुप्रकारेणोपासते १५

गी॰ शं॰ भा॰ यदि बहुभिः प्रकारैरुपासते कथं त्वामेवोपासत इत्यत आह अहं क्रतुः श्रौतकर्मभेदोऽहमेव अहं यज्ञः स्मार्तः किंच स्वधा
अन्नमहं पितृभ्यो यद्दीयते तदहमौषधं सर्वप्राणिभिर्यदद्यते तदौषधशब्दशब्दितं व्रीहियवादिसाधारणमथवा सर्पेति साधा
४२ रणमन्नमौषधमिति व्याख्यातं मन्त्रोऽहं येन पितृभ्यो देवताभ्यश्च हविर्दीयते अहमेवाज्यं हविः अहमग्निर्यस्मिन्हूय
ते सोऽग्निरहमेवाहं हुतं हवनकर्म च १६ किंच पिताहमस्य जगतो माता जनयित्री धाता कर्मफलस्य प्राणि
प्राणिभ्यो विधाता पितामहः पितुः पिता वेद्यं वेदितव्यं पवित्रं पावनमोंकार ऋक्साम यजुरेव च १७ किंच गतिः कर्मफलं भर्ता
पोष्टा प्रभुः स्वामी साक्षी प्राणिनां कृताकृतस्य निवासो यस्मिन्प्राणिनो निवसन्ति शरणमार्तानां प्रपन्नानामार्तिहरः सुहृत्
प्रत्युपकारानपेक्षः सन्नुपकारी प्रभव उत्पत्तिर्जगतः प्रलयः प्रलीयते यस्मिन्निति स्थानं तिष्ठत्यस्मिन्निति निधानं निक्षे
कालान्तरोपभोग्यं प्राणिनां बीजं प्ररोहकारणं प्ररोहधर्मिणामव्ययं यावत्संसारभावित्वाद् व्ययं न ह्यबीजं किंचित्प्ररोहतीति
संच प्ररोहदर्शनाद्बीजसंततिर्न व्येतीति गम्यते १८ किंच तपाम्यहमादित्यो भूत्वा रश्मिभिः कैश्चिद्रश्मिभिः

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतं १६ पिताहमस्य जगतो माता धाता पितामहः वेद्यं
पवित्रमोंकार ऋक्साम यजुरेव च १७ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजमव्ययं १८
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन १९ त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं

वर्षं उत्सृजामि पुनर्निगृह्णामि कैश्चिद्रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि अमृतं चैव देवानां मृत्युश्च मर्त्यानां सत्‌ य
त्संबन्धितया विद्यमानं तद्विपरीतमसच्चाहमर्जुन न पुनरत्यन्तमेवासद्भगवान् कार्यकारणे वा सदसती ये पूर्वोक्तैर्निमि
त्तप्रकारैरेकत्वपृथक्त्वादिविज्ञानैर्यज्ञैर्मां पूजयन्त उपासते ज्ञानविदस्ते यथाविज्ञानं मामेव प्राप्नुवन्ति १९ ये पुनरज्ञाः कामका
माः त्रैविद्या ऋग्यजुःसामविदः ऋग्यजुःसामलक्षणास्तिस्रो विद्या येषां ते त्रिविद्या त एव त्रैविद्याः स्वार्थे तद्धितः तिस्रो
विद्या अधीयते जानन्तीति त्रैविद्याः वेदत्रयोक्तकर्मपरा इत्यर्थः वदन्त्यविहितैर्यज्ञैर्मामिष्ट्वा मम वसुरूपं देवतान्तरमित्यजा
नन्तो वसुकृतं इन्द्रवस्वादिदेवस्वरूपिणं मां सोमपाः सोमं पिबन्तीति सोमपास्तेनैव सोमपानेन पूतपापाः शुद्धकिल्बि
षाः यज्ञैरग्निष्टोमादिभिरिष्ट्वा पूजयित्वा स्वर्गतिं स्वर्गगमनं स्वरेव गतिस्तां प्रार्थयन्ते ते च पुण्यं पुण्यफलमासाद्य संप्राप्य

टं॰
४२

85/1943

सुरेन्द्रलोकं शतक्रतोः स्थानमश्नन्ति भुञ्जते दिव्यान्दिवि भवानप्राकृतान्देवभोगान्देवानां भोगा देवभोगास्तान् २०
ते तं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकमिमं विशन्त्याविशन्तीति हि एवं हि यथोक्तेन प्रकारेण त्रयीधर्मं केवलं वै
दिकं कर्म तदनुप्रपन्ना गतागतं गतं चागतं च गतागतं गमनागमनं कामकामाः कामान् कामयन्त इति कामकामाः लभन्ते गता
गतमेव न तु स्वातन्त्र्यं क्वचिल्लभन्त इत्यर्थः २१ ये पुनर्निष्कामाः सम्यग्दर्शिनः अनन्याः अपृथग्भूताः परं देवं नारायणमा
त्मत्वेन गताः सन्तश्चिन्तयन्तो मां ये जनाः संन्यासिनः पर्युपासते तेषां परमार्थदर्शिनां नित्याभियुक्तानां सतताभियोगि
नां योगक्षेमं योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि प्रापयाम्यहं ज्ञानी त्वात्मैव मे मतमिति मम स्वात्मभूता यस्मात्तस्मात्ते
ममात्मभूताः प्रियाश्चेति ननु तेषामपि भक्तानां योगक्षेमं वहत्येव भगवान् सत्यमेवं वहत्येव किं त्वयं विशेषः अन्ये ये भक्तास्ते स्वा
त्मार्थं स्वयमपि योगक्षेममीहन्ते अनन्यदर्शिनस्तु नात्मार्थं योगक्षेममीहन्ते न हि ते जीविते मरणे वात्मनो बुद्धिं कुर्वन्ति केवलमेव भ

ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् २० ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते २१ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योग
क्षेमं वहाम्यहं २२ येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकं २३ अहं हि सर्वयज्ञा
नां भोक्ता च प्रभुरेव च न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते २४ यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ॥

गवच्छरणास्ते अतो भगवानेव तेषां योगक्षेमं वहतीति २२ नन्वन्या अपि देवतास्त्वमेव चेत्तद्भक्ताश्च त्वामेव यजन्ते सत्यमेवं येऽप्यन्यदेवता
भक्ता अन्यासु देवतासु भक्ता अन्यदेवताभक्ताः सन्तो यजन्ते पूजयन्ति श्रद्धया आस्तिक्यबुद्ध्यान्विता अनुगतास्तेऽपि मामेव कौ
न्तेय यजन्त्यविधिपूर्वकं अविधिरज्ञानं तत्पूर्वकमज्ञानपूर्वकं यजन्त इत्यर्थः २३ कस्मात्तेऽविधिपूर्वकं यजन्त इत्युच्यते य
स्मात् अहं हि सर्वयज्ञानां श्रौतानां स्मार्तानां च सर्वेषां यज्ञानां देवतात्वेन भोक्ता च प्रभुरेव च मत्स्वामिको हि यज्ञः अधियज्ञोऽ
हमेवात्र देहे तथा न तु मामभिजानन्ति तत्त्वेन यथावदतश्चाविधिपूर्वकमिष्ट्वा यागफलात्‌ च्यवन्ति प्रच्यवन्ते ते २४ येऽप्यन्यदेव
ताभक्तिमत्त्वेनाविधिपूर्वकं यजन्ते तेषामपि यागफलमवश्यंभावि कथं यान्ति गच्छन्ति देवव्रता देवेषु व्रतं नियमो भक्तिश्च येषां ते दे
वव्रता यान्ति देवान्पितॄनग्निष्वात्तादीन्यान्ति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः भूतानि विनायकमातृगणचतुर्भ

गी॰ टी॰ भा॰ यदि बहुभिः प्रकारैरुपासते कथं त्वामेवोपासत इत्यत आह अहं क्रतुः श्रौतकर्मभेदः अहमेव अहं यज्ञः स्मार्तः किं च स्वधा
अन्नमहं पितृभ्यो यद्दीयते तदहम् औषधं सर्वप्राणिभिर्यदद्यते तदौषधशब्दशब्दितं व्रीह्यादि सामान्यम् अथवा सर्वेति साधा
४२ रणमन्नमौषधमिति व्याधिशमनार्थं भेषजं मन्त्रोऽहं येन पितृभ्यो देवताभ्यश्च हविर्दीयते अहमेवाज्यं हविः अहमग्निर्यस्मिन् हूय
ते सोऽग्निरहमेव अहं हुतं हवनकर्म च १६ किं च पिता जनयिता जनयिता अहमस्य जगतो माता जनयित्री धाता कर्मफलस्य प्राणि
प्राणिभ्यो विधाता पितामहः पितुः पिता वेद्यं वेदितव्यं पवित्रं पावनम् ओंकार ऋक् साम यजुरेव च १७ किं च गतिः कर्मफलं भर्ता
पोष्टा प्रभुः स्वामी साक्षी प्राणिनां कृताकृतस्य निवासो यस्मिन् प्राणिनो निवसन्ति शरणमार्तानां प्रपन्नानाम् आर्तिहरः सुहृत्
प्रत्युपकारानपेक्षः सन्नुपकारी प्रभव उत्पत्तिर्जगतः प्रलयः प्रलीयते यस्मिन्निति यथास्थानं तिष्ठत्यस्मिन्निति निधानं निक्षेप
कालान्तरोपभोग्यं प्राणिनां बीजं प्ररोहकारणं प्ररोहधर्मिणाम् अव्ययं यावत्संसारभावित्वादव्ययं न ह्यबीजं किंचित्प्ररोहतीति
त्वं च प्ररोहदर्शनाद्बीजसन्ततिर्न व्येतीति गम्यते १८ किं च तपाम्यहमादित्यो भूत्वा रश्मिभिः कांश्चिद्रश्मिभिरु
अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् १६ पिताहमस्य जगतो माता धाता पितामहः वेद्यं
पवित्रमोंकार ऋक्साम यजुरेव च १७ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् १८
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन १९ त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं
प्रार्थयन्ते ... उत्सृजामि पुनर्निगृह्णामि कांश्चिद्रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि अमृतं चैव देवानां मृत्युश्च मर्त्यानां सत् य
त्सम्बन्धितया विद्यमानं तद्विपरीतम् असच्च एवाहमर्जुन न पुनरत्यन्तमेवासदेव भगवान् कार्यकारणे वा सदसती पूर्वोक्तैर्निमि
त्तप्रकारैरेकत्वपृथक्त्वादिविज्ञानैर्मां पूजयन्तो यथा सन्ति ज्ञानविदस्तथा विज्ञानं मामेव प्राप्नुवन्ति १९ ये पुनरज्ञाः कामका
माः त्रैविद्या इत्यादि साम ऋग्यजुर्लक्षणास्तिस्रो विद्या यस्य ते त्रिविद्या एव त्रैविद्याः स्वार्थे तद्धितः तिस्रो हरं॰
विद्या अधीयते जानन्तीति त्रैविद्याः वेदत्रयोक्तकर्मपरा इत्यर्थः वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वा वस्वादिदेवतारूपिणमित्यर्थ जा
नन्तो वस्वादिदेवस्वरूपिणं मां सोमपाः सोमं पिबन्तीति सोमपाः तेनैव सोमपानेन पूतपापाः शुद्धकिल्बि ४२
षाः यज्ञैरग्निष्टोमादिभिरिष्ट्वा पूजयित्वा स्वर्गतिं स्वर्गगमनं स्वर्गतिं प्रार्थयन्ते ते च पुण्यं पुण्यफलमासाद्य संप्राप्य

85/1943

सुरेन्द्रलोकं शतक्रतोः स्थानम् अश्नन्ति भुञ्जते दिव्यान् दिवि भवान् अप्राकृतान् देवभोगान् देवानां भोगा देवभोगास्तान् २०
ते तं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकमिमं विशन्त्याविशन्तीति एवं हि यथोक्तेन प्रकारेण त्रैधर्म्यं केवलं वै
दिकं कर्म तदनुप्रपन्ना गतागतं गतं च आगतं च गतागतं गमनागमनं कामकामाः कामान् कामयन्त इति कामकामा लभन्ते गता
गतमेव न तु स्वातन्त्र्यं क्वचिल्लभन्त इत्यर्थः २१ ये पुनर्निःकामाः सम्यग्दर्शिनः अनन्याः अपृथग्भूताः परं देवं नारायणमा
त्मत्वेन गताः सन्तश्चिन्तयन्तो मां ये जनाः संन्यासिनः पर्युपासते तेषां परमार्थदर्शिनां नित्याभियुक्तानां सतताभियोगि
नां योगक्षेमं योगोऽप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि प्रापयाम्यहं ज्ञानी त्वात्मैव मे मतम् स च मम प्रियो यस्मात्तस्मात्ते
ममात्मभूताः प्रियाश्चेति नन्वेषामपि भक्तानां योगक्षेमं वहत्येव भगवान् सत्यमेवं वहत्येव किं त्वयं विशेषः अन्ये ये भक्तास्ते स्वा
त्मार्थं स्वयमपि योगक्षेममीहन्ते अनन्यदर्शिनस्तु नात्मार्थं योगक्षेममीहन्ते न हि ते जीविते मरणे वात्मनो बुद्धिं कुर्वन्ति केवलमेव भ
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान् २० ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते २१ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योग
क्षेमं वहाम्यहम् २२ येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् २३ अहं हि सर्वयज्ञा
नां भोक्ता च प्रभुरेव च न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते २४ यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः ॥
गवच्छरण्यास्ततो भगवानेव तेषां योगक्षेमं वहतीति २२ नन्वन्या अपि देवतास्त्वमेव तद्भक्ताश्च त्वामेव यजन्ते सत्यमेवं येऽप्यन्यदेवता
भक्ता अन्यासु देवतासु भक्ता अन्यदेवताभक्ताः सन्तो यजन्ते पूजयन्ति श्रद्धयास्तिक्यबुद्ध्यान्विता अनुगतास्तेऽपि मामेव कौ
न्तेय यजन्त्यविधिपूर्वकम् अविधिरज्ञानं तत्पूर्वकम् अज्ञानपूर्वकं यजन्त इत्यर्थः २३ कस्मात्तेऽविधिपूर्वकं यजन्त इत्युच्यते य
स्मात् अहं हि सर्वयज्ञानां श्रौतानां स्मार्तानां च सर्वेषां यज्ञानां देवतात्वेन भोक्ता च प्रभुरेव च मत्स्वामिको हि यज्ञः अधियज्ञोऽ
हमेवात्र देहे इत्युक्तं तथा न तु मामभिजानन्ति तत्त्वेन यथावत् अतश्चाविधिपूर्वकमिष्ट्वा यागफलात् च्यवन्ति प्रच्यवन्ते ते २४ येऽप्यन्यदेव
ताभक्तिमत्त्वेनाविधिपूर्वकं यजन्ते तेषामपि यागफलमवश्यंभावि कथं यान्ति गच्छन्ति देवव्रता देवेषु व्रतं नियमो भक्तिश्च येषां ते दे
वव्रता यान्ति देवान् पितृन् श्राद्धादीन् यान्ति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः भूतानि विनायकमातृगणचतुर्भ

गी॰ शं॰ भा॰ नित्यादीनियांतिभूतेज्या भूतानांपूजकाः यांतिमद्याजिनोमद्यजनशीला वैष्णवामामेवयमानन्यायासेमामेवनपभजतेज्ञानातेन
तेअल्पफलभाजोभवंतीत्यर्थः २५ नकेवलंमद्भक्तानांभनावृत्तिलक्षणमनंतंफलंसुखाराधनश्चाहंकथं पत्रंपुष्पंफलंतोयमुदकं
४३ योमेमह्यंभक्त्याप्रयच्छति तदहंपत्रादिभक्त्याउपहृतंभक्तिपूर्वकंप्रापितंभक्त्युपहृतंतस्याश्नामिगृह्णामिप्रयतात्मनःशुद्धबुद्धेः
यएवमतः २६ यत्करोषिस्वतःप्राप्तंयदश्नासियज्जुहोषिहवनंनिर्वर्तयसिश्रौतंस्मार्तंवा यद्ददासिप्रयच्छसिब्राह्मणादिभ्यो
हिरण्यान्नघृतादि यत्तपस्यसितपश्चरसि कौंतेयतत्कुरुष्वमदर्पणंमयिसमर्पणं एवंकुर्वतस्तवयद्भवतितच्छृणु शुभाशुभफ
लैः शुभाशुभेइष्टानिष्टेफलेयेषांतानिशुभाशुभफलानिकर्माणितैःशुभाशुभफलैः कर्मबंधनैःकर्माण्येवबंधनानितैःकर्मबं
धनैरेवंमत्समर्पणंकुर्वन्मोक्ष्यसेयोयंसंन्यासयोगोनामसंन्यासश्चासौमत्समर्पणतयाकर्मत्वाद्योगश्चासावितितेनसंन्यासयो
गेनयुक्तआत्मांतःकरणंयस्यसत्वंसंन्यासयोगयुक्तात्मासन्विमुक्तोबंधनैःजीवन्नेवपतितेशरीरेमामुपैष्यसिआगमिष्यसि

भूतानियांतिभूतेज्यायांतिमद्याजिनोपिमां २५ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः
२६ यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणं २७ शुभाशुभफलैरेवंमोक्ष्यसेकर्मबंधनैः
संन्यासयोगयुक्तात्मा विमुक्तोमामुपैष्यसि २८ समोहंसर्वभूतेषुनमेद्वेष्योस्तिनप्रियः येभजंतितुमांभक्त्यामयितेतेषुचाप्यहं॰
अपिचेत्सुदुराचारोभजतेमामनन्यभाक् साधुरेवसमंतव्यः सम्यग्व्यवसितोहिसः ३० क्षिप्रंभवतिधर्मात्माशश्वच्छांतिंनिगच्छ
सि २८ रागद्वेषवांस्तर्हिभगवान्यतोभक्तानेवानुगृह्णातिनेतरानिति तन्न समस्तुल्योहंसर्वभूतेषुनमेद्वेष्योस्तिनप्रियः अग्निव
दहं दूरस्थानांयथाग्निःशीतंनापनयतिसमीपमुपसर्पतामपनयति तथाहंभक्ताननुगृह्णामिनेतरान् येभजंतितुमांभक्त्या
मयितेस्वभावतएवनममरागनिमित्तंवर्तंतेतेषुचाप्यहंस्वभावतएववर्तेनेतरेषु नैतावतातेषुद्वेषोमम २९ शृणुमद्भक्तेर्माहात्म्यं
त॰ अपिचेद्यद्यपिसुदुराचारोतीवकुत्सिताचारोपिभजतेमामनन्यभाक् अनन्यभक्तिःसन् साधुरेवसम्यग्वृत्तएवसमंतव्यो
तव्यः सम्यग्यथावद्व्यवसितोहियस्मात्साधुनिश्चयःसः ३० उत्सृज्यचबाह्यांदुराचारतांअंतःसम्यग्व्यवसायसाम
र्थ्यात् क्षिप्रंशीघ्रंभवतिधर्मात्मा धर्मचित्तएवशश्वन्नित्यंशांतिंचोपशमंनिगच्छतिप्राप्नोति शृणुपरमार्थंकौंतेयप्रतिजानी
हि निश्चितांप्रतिज्ञांकुरु नमेममभक्तोमय्यसमर्पितांतरात्मामद्भक्तोनप्रणश्यतीति ३१
॥ ॥ शांतिः कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति ३१ ८ ॥ ॥ ॥

87
1943

किंच मांहियस्मात्पार्थव्यपाश्रित्यमामाश्रयत्वेनगृहीत्वायेपिस्युर्भवेयुःपापयोनयःपापायोनिर्येषांतेपापयोनयःपापजन्मा
नःकेइत्याहस्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिंगच्छंतिपरांप्रकृष्टांगतिं ३२ किंपुनर्ब्राह्मणाःपुण्याःपुण्ययोनयः
भक्ताराजर्षयस्तथाराजानश्चतेऋषयश्चराजर्षयः यतएवमतोनित्यंक्षणभंगुरंअसुखंचसुखवर्जितमिमंमनुष्यलोकं
लोकंप्राप्यपुरुषार्थसाधनंदुर्लभंचमनुष्यत्वंलब्ध्वाभजस्वसेवस्वमां ३३ कथंमन्मनाभवमयिमनोयस्यसत्वंमन्मनाभवतथा
मद्भक्तोभवमद्याजीमद्यजनशीलोभव मामेवचनमस्कुरु मामेवेश्वरमेष्यस्यागमिष्यसियुक्त्वाएवंसमाधायचित्तमेवमा
त्मानं मांअहंहिसर्वेषांभूतानामात्मापरागतिःपरमयनंतंमामेवंभूतमेष्यसीत्यतीतेनानेनपदेनसंबंधःमत्परायणःसन्नि
त्यर्थः इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरभगवत्पादकृतगीताभाष्येराजविद्याराजगुह्ययोगोनामनवमोध्यायः ९
सप्तमेध्यायेभगवतस्तत्वंविभूतयश्चप्रकाशितानवमेचायदानींयेषुयेषुचभावेषुचिंत्योभगवांस्तेभावावक्तव्यास्तत्वंचभगव

मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयः स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिं ३२ किंपुनर्ब्राह्मणाःपुण्याभ
क्ताराजर्षयस्तथा अनित्यमसुखंलोकमिमंप्राप्यभजस्वमां ३३ मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु मामेवैष्यसि
युक्त्वैवमात्मानंमत्परायणः ३४ इतिश्री॰राजविद्याराजगुह्ययोगोनाम॰ध्यायः श्रीभगवानु॰ भूयएवमहाबाहोशृणु
मेपरमंवचः यत्तेहंप्रीयमाणायवक्ष्यामिहितकाम्यया १ नमेविदुःसुरगणाः प्रभवंनमहर्षयः अहमादिर्हिदेवानां
महर्षीणांचसर्वशः २ योमामजमनादिंचवेत्तिलोकमहेश्वरं असंमूढःसमर्त्येषुसर्वपापैःप्रमुच्यते ३ ॥
तोवक्तव्यंउक्तमपिदुर्विज्ञेयत्वादित्यतःश्रीभगवानु॰ भूयएवमहाबाहोशृणुमेमदीयंपरमंप्रकृष्टंनिरतिशयवस्तुनःप्रकाश
कंवचोवाक्यंयत्तेतुभ्यंप्रीयमाणायमद्वचनात्प्रीयसेत्वमतीवामृतमिवपिबंस्ततोवक्ष्यामिहितकाम्ययाहितेच्छया १
किमर्थमहंवक्ष्यामीत्यतआह नमेविदुःनविजानंतिसुरगणाःब्रह्मादयःकिंतेनविदुःममप्रभवंप्रभावंप्रभुशक्त्यतिशयंउ
त्पत्तिंवानापिमहर्षयोभृग्वादयोविदुःकस्मात्तेनविदुरित्युच्यते अहमादिःकारणंहियस्माद्देवानांमहर्षीणांचसर्वशःसर्व
प्रकारैः २ किंचयोमामजमनादिंचयस्मादहमादिर्देवानांमहर्षीणांचनमत्तोन्यआदिर्विद्यतेअतोहमजोनादिश्चअनादि
त्वमजत्वेहेतुस्तंमामजमनादिंचयोवेत्तिविजानातिलोकमहेश्वरंलोकानांमहांतमीश्वरंतुरीयमज्ञानतत्कार्यवर्जितं
असंमूढःसंमोहवर्जितःसमर्त्येषुमनुष्येषुसर्वपापैर्मतिपूर्वामतिपूर्वकृतैःप्रमुच्यतेप्रमोक्ष्यतइत्यर्थः ३ ॥

गी० शां० भा० अत आह मत्त ईश्वराल्लोकानां बुद्धिरन्तःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यं तद्वन्तं बुद्धिमानिति हि वदन्ति ज्ञानमात्मादिप
दार्थानामवबोधः असंमोहः प्रत्युत्पन्नेषु बोद्धव्येषु विवेकपूर्विका प्रवृत्तिः क्षमा आक्रुष्टस्य ताडितस्य वाविकृतचित्तता स
४४ त्यं यथादृष्टस्य यथाश्रुतस्य चात्मानुभवस्य परबुद्धिसंक्रान्तये तथैवोच्चार्यमाणा वाक् सत्यमुच्यते दमो बाह्येन्द्रियोपशमः श
मोन्तःकरणस्य सुखमाह्लादो दुःखं संतापः भव उद्भवोभावस्तद्विपर्ययः भयं च त्रासोभयमेव च तद्विपरीतं ४ अहिंसा अपीडा
प्राणिनां समता समचित्तता तुष्टिः संतोषः पर्याप्तबुद्धिर्लाभेषु तप इन्द्रियसंयमपूर्वकं शरीरपीडनं दानं यथाशक्ति संविभा
गः यशो धर्मनिमित्ता कीर्तिरयशस्तु अधर्मनिमित्ता अकीर्तिः भवन्ति भावा यथोक्ता बुद्ध्यादयो भूतानां प्राणिनां मत्त एवेश्वरात्
पृथग्विधा नानाविधाः ५ स्वकर्मानुरूपेण किं च महर्षयः सप्त भृग्वादयः पूर्वेऽतीतकालसंबन्धिनश्चत्वारो मनवस्तथा साव
र्णा इति प्रसिद्धास्ते च मद्भावा मद्गतभावना वैष्णवसामर्थ्येनोपेता मानसा मनसैवोत्पादिता मया जाता उत्पन्ना येषां मनूनां महर्षीणां

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः सुखं दुःखं भवोभावो भयं चाभयमेव च ४ अहिंसा समता तुष्टिस्तपो दानं य
शोयशः भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ५ महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा मद्भावा मानसा जाता ये
षां लोक इमाः प्रजाः ६ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः सोविकम्पेन योगेन युज्यते नात्र संशयः ७ अ
हं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति मत्वा भजन्ते मां बुधा भावसमन्विताः ८ मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परं

णां च सृष्टिर्लोके इमाः स्थावरजंगमाः प्रजाः ६ एतां यथोक्तां विभूतिं विस्तारं योगं च युक्तिं चात्मनो घटनं अथ वा योगै
श्वर्यसामर्थ्यं सर्वज्ञत्वं च योगजं योग उच्यते मम मदीयं यो वेत्ति तत्त्वतस्तत्त्वेन यथावदित्येतत् सोविकम्पेनाप्रचलितेन योगेन
सम्यग्दर्शनस्थैर्यलक्षणेन युज्यते संबध्यते नात्रास्मिन्नर्थे संशयोस्ति ७ कीदृशेनाविकम्पेन योगेन युज्यत इत्युच्यते अ
हं परं ब्रह्म वासुदेवाख्यं सर्वस्य जगतः प्रभव उत्पत्तिर्मत्त एव स्थितिनाशक्रियाफलोपभोगलक्षणं विक्रियारूपं सर्वं जगत् देवं
प्रवर्तत इत्येवं मत्वा भजन्ते सेवन्ते मां बुधा अवगतपरमार्थतत्त्वा भावसमन्विता भावो भावना परमार्थतत्त्वाभिनिवेशस्तेन
समन्विताः संयुक्ता इत्यर्थः किं च मच्चित्ताः मयि चित्तं येषां ते मच्चित्ता मद्गतप्राणा मामुपगताः प्राणाश्चक्षुरादयो येषां ते ४४
यां ते मद्गतप्राणा मय्युपसंहृतकरणा इत्यर्थः अथ वा मद्गतप्राणा मद्गतजीवना इत्येतद्बोधयन्तोवगमयन्तः परस्परमन्यो

89
1763

न्यं कथयन्तश्च ज्ञानबलवीर्यादिधर्मैर्विशिष्टं मां तुष्यन्ति च परितोषमुपयान्ति रमन्ति च रतिं च प्राप्नुवन्ति प्रियसंगत्येव ९ ये
यथोक्तेन प्रकारेण भजन्ते मां भक्ताः सन्तः प्रीतिपूर्वकं तेषां सततयुक्तानां नित्याभियुक्तानां निवृत्तसर्वबाह्यैषणानां भजतां सेव
मानानां किमर्थित्वादिना कारणेनेत्याह प्रीतिपूर्वकं प्रीतिः स्नेहस्तत्पूर्वकं मां भजतामित्यर्थः ददामि प्रयच्छामि बुद्धियोगं बु
द्धिः सम्यग्दर्शनं मत्तत्त्वविषयं तेन योगो बुद्धियोगस्तं बुद्धियोगं येन बुद्धियोगेन सम्यग्दर्शनलक्षणेन मां परमेश्वर
मात्मभूतमात्मत्वेनोपयान्ति प्रतिपद्यन्ते १० केन यं मच्चित्तत्वादिप्रकारैर्मां भजन्ते तेन किमर्थं कस्य वा त्वत्प्राप्तिप्रतिबन्धहेतोर्ना
शकं बुद्धियोगं त्वद्भक्तानां ददासीत्यपेक्षायामाह तेषामेवेति तेषामेव कथं नु नाम श्रेयः स्यादित्यनुकम्पार्थं दयाहेतोरहमज्ञानजमवि
वेकतो जातं मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमो नाशयाम्यात्मभावस्थ आत्मनो भावोन्तःकरणाशयस्तस्मिन्नेव स्थितः स
न् ज्ञानदीपेन विवेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभिषिक्तेन मद्भावनाभिनिवेशवातेरितेन ब्रह्मचर्यादिसाधनसंस्कारवता

कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ९ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं येन मामुपयान्ति
ते १० तेषामेवानुकम्पार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ११ अर्जुन उ० परं ब्रह्म परं धाम प
वित्रं परमं भवान् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं १२ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा असितो देवलो व्या
सः स्वयं चैव ब्रवीषि मे १३ सर्वमेतदृतं मन्ये यन्मां वदसि केशव न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः १४ स्वयमेवा
त्मनात्मानं वेत्थ त्वं पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते १५ ॥

प्रज्ञावर्तिनाविरक्तान्तःकरणाधारेण विषयव्यावृत्तरागद्वेषाकलुषितचित्तनिवातापवरकस्थेन प्रदीपेन नित्यप्रवृत्तैकाग्र्यध्या
नजनितसम्यग्दर्शनेन भास्वता ज्ञानदीपेनेत्यर्थः यथोक्तां भगवतो विभूतिं योगं च श्रुत्वार्जुन उ० परं ब्रह्म परमात्मा निरञ्जनमिति
परमात्मा परं धाम परं तेजः पवित्रं पावनं परमं प्रकृष्टं भवान् पुरुषं शाश्वतं नित्यं दिव्यं दिवि भवं आदिदेवं सर्वदेवानामादौ भवं देव
मजं विभुं विभवनशीलं १२ ईदृशमाहुः कथयन्ति त्वामृषयो वसिष्ठादयः सर्वे देवर्षिर्नारदस्तथा असितो देवलोपि एवमेवाह व्या
सश्च स्वयं चैव त्वं च ब्रवीषि मे १३ सर्वमेतद्यथोक्तमृषिभिस्त्वया चैतदृतं सत्यमेव मन्ये यन्मां प्रति वदसि भाषसे हे केशव न
हि ते तव भगवन्व्यक्तिं प्रभवं विदुर्न देवा न दानवाः १४ यतस्त्वं देवादीनामादिरतः स्वयमेवात्मनात्मानं वेत्थ त्वं निरतिशयज्ञा
नैश्वर्यबलादिशक्तिमन्तमीश्वरं पुरुषोत्तम भूतानि भावयतीति भूतभावन हे भूतभावन भूतानामीश हे भूतेश हे देवदेव जगत्पते
१५

गीताशां०भा० वक्तुं कथयितुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः आत्मनो विभूतयो याः ताः वक्तुमर्हसि याभिर्विभूतिभिरात्मनो माहात्म्यवि
स्तरैरिमान् लोकानुत्वं व्याप्य तिष्ठसि १६ कथं विद्यां विजानीयामहं योगिनुत्वां सदा परिचिंतयन् केषु केषु च भावेषु चिंत्यो
५५, सिध्येयासि भगवन्मया १७ विस्तरेणात्मनो योगं योगैश्वर्यं च किंचिन्नापि विभूतिं न विस्तरं ध्येयपदार्थानां हे जनार्दन आर्द्रेर्ने
र्गतिकर्मणो रूपं असुराणां देवप्रतिपक्षभूतानां जनानां नरकादिगमयितृत्वाज्जनार्दनः अभ्युदयनिःश्रेयसपुरुषार्थप्रयाज्ञ्य
नं सर्वैर्जनैर्याच्यत इति वा भूयः पूर्वमुक्तमपि कथय तृप्तिर्हि यस्मान्नास्ति मे शृण्वतस्त्वन्मुखनिःसृतं वाक्यामृतं
१८ हंत इदानीं ते दिव्या हि दिव्या आत्मनो मम विभूतयो यास्ताः कथयिष्यामि इत्येतत्प्राधान्यतो यत्र यत्र प्रधाना या या वि
भूतिस्तां तां प्रधानां प्राधान्यतः कथयिष्याम्यहं हे कुरुश्रेष्ठ अशेषतस्तु वर्षशतेनापि न शक्या वक्तुं यतो नास्त्यंतो विस्तरस्य मम

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि १६ कथं विद्यामहं योगिंस्त्वां सदा प
रिचिंतयन् केषु केषु च भावेषु चिंत्योऽसि भगवन्मया १७ विस्तरेणात्मनो योगं विभूतिं च जनार्दन भूयः कथय तृप्तिर्हि शृण्व
तो नास्ति मेऽमृतं १८ श्रीभगवानुवाच हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य मे १९
अहमात्मा गुडाकेश सर्वभूताशयस्थितः अहमादिश्च मध्यं च भूतानामंत एव च २० आदित्यानामहं विष्णुर्ज्योतिषां रविरंशु
मान् मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी २१ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः इंद्रियाणां मनश्चास्मि भूतानामस्मि चेत

म विभूतीनामित्यर्थः १९ तत्र प्रथममेव तावत् शृणु अहमात्मा प्रत्यगात्मा गुडाकेश गुडाका निद्रा तस्या ईशो गुडाकेशो जितनिद्र इ
त्यर्थः घनकेशो वा इति वा सर्वभूताशये अंतर्हृदि स्थितो नित्यं ध्येयस्तदशक्तेन तेषु भावेषु चिंत्योऽहं चिंतयितुं शक्यो यस्मा
दहमेवादिर्भूतानां कारणं तथा मध्यं च स्थितिरंतः प्रलयश्च एव च २० ध्येयोऽहं आदित्यानां द्वादशानां विष्णुर्नामादित्योऽहं ज्योति
षां रविः प्रकाशयितॄणामंशुमान् रश्मिमान् मरीचिर्नाम मरुतां मरुद्देवतानामस्मि नक्षत्राणामहं शशी चंद्रमाः २१
वेदानां मध्ये सामवेदोऽस्मि देवानां रुद्रादित्यादीनां वासवोऽहं इंद्रोऽस्मि इंद्रियाणामेकादशानां मनश्चास्मि चक्षुरादीनां संक
ल्पविकल्पात्मकं मनः भूतानामस्मि चेतना कार्यकारणसंघाते नित्याभिव्यक्ता बुद्धिवृत्तिश्चेतना २२ ५५,

91/1943

रुद्राणामेकादशानां शंकरश्चास्मि वित्तेशः कुबेरो यक्षरक्षसां यक्षाणां रक्षसां च वसूनामष्टानां पावकश्चास्मि अग्निः मेरुः
शिखरिणामहं शिखरवतां २३ पुरोधसां च राजपुरोहितानां मुख्यं प्रधानं मां विद्धि पार्थ बृहस्पतिं स हींद्रस्येति मुख्यः स्यात् पु
रोधाः सेनानीनां सेनापतीनां अहं स्कंदो देवसेनापतिः सरसां यानि देवखातानि सरांसि तेषां मध्ये सागरोऽस्मि भवामि २४ म
हर्षीणां भृगुरहं गिरां वाचां पदलक्षणानां एकमक्षरमोंकारोऽस्मि यज्ञानां जपयज्ञोऽस्मि स्थावराणां स्थितिमतां हिमालयः २५
अश्वत्थः पिप्पलः सर्ववृक्षाणां देवर्षीणां च नारदः देवा एव संतः ऋषित्वं प्राप्ताः मंत्रदर्शित्वात्ते देवर्षयः तेषामहं नारदोऽस्मि गं
धर्वाणां चित्ररथो नाम गंधर्वोऽस्मि सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानां कपिलो मुनिः २६ उच्चैःश्रवस
मश्वानां उच्चैःश्रवा नामाश्वराजः तं मां विद्धि जानीहि अमृतोद्भवं ऐरावतं इरावत्या अपत्यं गजेंद्राणां हस्तीश्वराणां नराणां च मां वि

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां वसूनां पावकश्चास्मि मेरुः शिखरिणामहं २३ पुरोधसां च मुख्यं मां विद्धि पा
र्थ बृहस्पतिं सेनानीनामहं स्कंदः सरसामस्मि सागरः २४ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं यज्ञानां जपयज्ञो
ऽस्मि स्थावराणां हिमालयः २५ अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः २६
उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ऐरावतं गजेंद्राणां नराणां च नराधिपं २७ आयुधानामहं वज्रं धेनूनाम
स्मि कामधुक् प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः अनंतश्चास्मि नागानां वरुणो यादसामहं पितॄणामर्यमा
चास्मि यमः संयमतामहं २९ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं मृगाणां च मृगेंद्रोऽहं वैनतेयश्च पक्षिणां ३०

धीत्यनुवर्तते नराणां च मनुष्याणां नराधिपं राजानं विद्धि २७ आयुधानामहं वज्रं दधीचिरस्थिसंभवं धेनूनां दोग्ध्रीणाम
स्मि कामधुक् वसिष्ठस्य सर्वकामानां दोग्ध्री सामान्या कामधुक् प्रजनश्चास्मि कंदर्पः कामः सर्पाणां सर्पभेदानामस्मि वा
सुकिः २८ अनंतश्चास्मि नागानां नागभेदानां नागराजश्च वरुणो यादसामहं अब्देवतानां राजाहं पितॄणामर्यमा नाम पितृ
राजश्चास्मि यमः संयमतां संयमनं कुर्वतामहं २९ प्रह्लादो नाम चास्मि दैत्यानां दितिवंश्यानां कालः कलयतां कलनं गण
नं कुर्वतां अहं मृगाणां च मृगेंद्रः सिंहो व्याघ्रो वाहं वैनतेयश्च गरुत्मान् विनतासुतः पक्षिणां पतत्रिणां ३० ५५

गी० टी० भा० पवनो वायुः पवतां पावयितॄणामस्मि रामः शस्त्रभृतामहं शस्त्राणां धारयितॄणां दाशरथी रामोऽहं झषाणां मत्स्यादीनां

[illegible] मकरः [illegible] स्रोतसामस्मि [illegible] विनापरमाधि तत्त्वाभि निवेशाज्जाह्न

४६, तिलया अहमर्जुन भूतानां जीवा विष्णुनामेवादि रंतश्चास्या एक रूपक्रमेऽहं तु सर्वस्य च मगमात्रस्य ति विज्ञायः अध्या

त्मविद्या विद्यानां मोक्षार्थत्वात् प्रधानास्मि वादार्थ निर्णयहेतुत्वात् प्रवदतां प्रधानमतः सोऽहमस्मि प्रवक्तॄणां स्थावरेन

मद्वानां मे वहवादजल्पवितंडानां यद्गुणे प्रवदतामिति ३२ अक्षराणां वर्णानामकारो वर्णोस्मि द्वंद्वः समासोस्मि सामा

सिकस्य समास समूहस्य किंच अहमेवाक्षयोऽक्षीणः कालः प्रसिद्धः क्षणाख्यः परो नश्चरः कालस्यापि कालोस्मि धा

ताऽहं कर्मफलस्य विधाता सर्वस्य जगतो विश्वतोमुखः ३३ मृत्युर्विविधो धनहरः प्राणहरः प्राणाहरश्च सर्वहरत्युत्क

पवनः पवतामस्मि रामः शस्त्रभृतामहं झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ३१ सर्गाणामादिरंतश्च मध्यं चै

वाहमर्जुन अध्यात्मविद्या विद्यानां वादः प्रवदतामहं ३२ अक्षराणामकारोस्मि द्वंद्वः सामासिकस्य च अहमेवाक्षयः

कालो धाताहं विश्वतोमुखः ३३ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्ष

मा ३४ बृहत्साम तथा साम्नां गायत्री छंदसामहं मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ३५ द्यूतं छलयतामस्मि

तेजस्तेजस्विनामहं जयोस्मि व्यवसायोस्मि सत्वं सत्ववतामहं ३६ वृष्णीनां वासुदेवोस्मि पांडवानां धनंजयः

मुनीनामप्यहं व्यासः कवीनामुशना कविः ३७

त्येन सोऽहमथवा पर ईश्वरः प्रलये सर्वहरत्वात् सर्वहरः सोऽहमुद्भवश्च उत्कर्षो ऽभ्युदयस्तत्साधनहेतुश्चाहं केषां भविष्यतां

भाविकल्याणानामुत्कर्ष प्राप्तियोग्यानामित्यर्थः कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमेत्येता उत्तमाः स्त्रीणाम्

हमस्मि यासामाभासमात्रसंबंधेनापि लोकः कृतार्थमात्मानं मन्यते ३४ बृहत्साम तथा साम्नां प्रधानमस्मि गायत्री छं

दसामहं गायत्र्यादि छंदोविशिष्टानामृचां गायत्री ऋगस्म्यहमित्यर्थः मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरो वसंतः

३५ द्यूतमक्षदेवनादि लक्षणं छलयतां छलस्य कर्तॄणामस्मि तेजस्तेजस्विनामहं जयोस्मि जेतॄणां व्यवसायोस्मि व्यवसायिनां

सत्वं सत्ववतां सात्विकानामहं ३६ वृष्णीनां वासुदेवोस्मि अयमेवाहं वसुदेवपुत्रः पांडवानां धनंजयस्त्वमेव मुनीनां मनन

शीलानां सर्वपदार्थज्ञानामप्यहं व्यासः कवीनां क्रांतदर्शिनामुशना कविरस्मि ३७ ॥

देरं वृ

४६

93/1943

दंडो दमयतां दमयितॄणामस्मि अदांतानां दमकारणं नीतिरस्मि जिगीषतां जेतुमिच्छतां मौनं चैवास्मि गुह्यानां गोप्या

नां ज्ञानं ज्ञानवतामहं ३८ यच्चापि सर्वभूतानां बीजं प्ररोहकारणं तदहमर्जुन प्रकरणोपसंहारार्थं विभूति संक्षेपमाह

न तदस्ति भूतं चराचरं चरमचरं वा मया विना यत्स्यात् भवेत् अपकृष्टं मया निरात्मकं शून्यं हि तत्स्यात् अतो मदात्मकं सर्वमित्यर्थः

३९ नांतोस्ति मम दिव्यानां विभूतीनां विस्तराणां परंतप न हीश्वरस्य सर्वात्मनो दिव्यानां विभूतीनामियत्ता शक्या वक्तुं ज्ञातुं वा

केनचित् एष तूद्देशतः एकदेशेन प्रोक्तो विभूतेर्विस्तरो मया ४० यद्यत्तल्लोके विभूतिमत् विभूतियुक्तं सत्वं वस्तु श्रीम

दूर्जितमेव वा श्रीर्लक्ष्मीस्तया सहितं श्रीमदूर्जितमेव वा उत्साहोपेतं वा तत्तदेवावगच्छ त्वं जानीहि मम ईश्वरस्य तेजोंशसंभवं ते

जसोंऽशः एकदेशः संभवो यस्य तत्तेजोंशसंभवमित्यवगच्छ ४१ अथवा बहुनैतेन एवमादिना किं ज्ञातेन तवार्जुन स्यात्

दंडो दमयतामस्मि नीतिरस्मि जिगीषतां मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं ३८ यच्चापि सर्वभूतानां बीजं त

दहमर्जुन न तदस्ति विना यत्स्यान्मया भूतं चराचरं ३९ नांतोस्ति मम दिव्यानां विभूतीनां परंतप एष तूद्देशतः

प्रोक्तो विभूतेर्विस्तरो मया ४० यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंशसंभवं ४१

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ४२ हरिः तत्स० विभूतियोगो

नाम १० ध्यायः अर्जुन उवाच मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं यत्त्वयोक्तं वचस्तेन मोहोयं विगतो मम १

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं २ ॥ ॥

सावशेषेणाशेषेण स्तुतिमिमं मुच्यमानमेवं शृणु विष्टभ्य विशेषतः स्तंभनं दृढं कृत्वा इदं कृत्स्नं जगदेकांशेनैकावयवेन

एकपादेन सर्वभूतस्वरूपेणेत्येतत् तथा च मंत्रवर्णः पादोस्य विश्वा भूतानि स्थित इति ४२ इति श्री० श्रीशांक० विभूतियो

गो नाम दशमोध्यायः १० भगवता विभूतयउक्तास्तत्र च विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवताभिहितं श्रु

त्वाय जगदात्मकं स्वरूपमाद्यमैश्वरं तत्साक्षात्कर्तुमिच्छन् मदनुग्रहायेत्यमानुग्रहार्थं परमं निरतिशयं गुह्यं गोप्यं त्रीणि

यत्कर्तव्यं तन्नोस्ति संपन्नं सर्वस्वरूपविषयं गुह्यं गोप्यं अध्यात्मसंज्ञितमात्मानात्मविवेकविषयं यत्त्वयोक्तं वचो विवेकवाक्यं ते

न वचसा मोहोयं विगतो मम अविवेकबुद्धिरपगता ममेत्यर्थः १ किंच भवाप्ययौ त्पत्तिप्रलयौ भूतानां नोभवाप्ययौ श्रुतौ

विस्तरशो न संक्षेपतो मया त्वत्तः त्वत्सकाशात् कमलपत्राक्ष कमलस्य पत्रं कमलपत्रं तद्वदक्षिणी यस्य तव स त्वं कमलप

त्राक्षः हे कमलपत्राक्ष माहात्म्यं महात्मनो भावो माहात्म्यमपि चाव्ययमक्षयं श्रुतमिति शेषेणानुवर्तते २ ॥

एवमेतन्नान्यथा येन प्रकारेणात्थ कथयसि त्वमात्मानं परमेश्वर तथापि द्रष्टुमिच्छामि ते तव ज्ञानैश्वर्यशक्तिबलवीर्यतेजो
भिः संपन्नमैश्वरं वैष्णवं रूपं पुरुषोत्तम ३ मन्यसे यदि चिंतयसि यदि मे यार्जुनेन शक्यं द्रष्टुमिति प्रभो स्वामिन्योगेश्वर यो
गिनो योगास्तेषामीश्वरो योगेश्वर यस्मादहमतीवार्थी द्रष्टुं ततस्तस्मान्मदर्थं दर्शय त्वमात्मानमव्ययं ४ एवं चो
दितोऽर्जुनेन श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशोऽनेकश इत्यर्थः तानि च नानाविधानि अनेकप्रकार
णि दिवि भवानि दिव्यानि अप्राकृतानि नानावर्णाकृतीनि च नानाप्रकारवर्णा नीलपीतादिविलक्षणास्तथा आकृतय
श्चावयवसंस्थानविशेषा येषां रूपाणां तानि नानावर्णाकृतीनि च ५ पश्य आदित्यान्द्वादश वसूनष्टौ रुद्रानेकाद
श अश्विनौ द्वौ मरुतः सप्तसप्तगणान् एतान् तथा बहूनन्यानपि अदृष्टपूर्वाणि मनुष्यलोके त्वया त्वत्तोऽन्येन वा केन चित्

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ३ मन्यसे यदि तच्छक्यं मया द्रष्टुमि
ति प्रभो योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ४ श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ना
नाविधानि दिव्यानि नानावर्णाकृतीनि च ५ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा बहून्यदृष्टपूर्वाणि पश्या
श्चर्याणि भारत ६ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ७ न तु मां शक्यसे
द्रष्टुमनेनैव स्वचक्षुषा दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं ८ संजय उवाच एवमुक्त्वा ततो राजन्महायोगेश्वरो
हरिः दर्शयामास पार्थाय परमं रूपमैश्वरं ९ ॥

पश्याश्चर्याणि अद्भुतानि भारत ६ न केवलमेतावदेव इहैकस्थमेकस्मिन्नेव स्थितं जगत्कृत्स्नं समस्तं पश्याद्येदानीं सच
राचरं सह चरेणाचरेण मम देहे गुडाकेश यच्चान्यज्जयपराजयादि यच्छंकसे यद्वा जयेम यदि वा नो जयेयुरिति यदवोच
स्तदपि द्रष्टुं यदीच्छसि ७ किंतु विश्वरूपधरं न तु मां शक्यसे द्रष्टुमनेनैव प्राकृतेन स्वेन चक्षुषा स्वकीयेन येन सच ॥
नुशक्यसे द्रष्टुं दिव्येन तद्दिव्यं ददामि ते तुभ्यं चक्षुः तेन मे मम पश्य योगमैश्वरं ईश्वरस्य मम ऐश्वरं योगं योगशक्तिातिशयमित्य
र्थः ८ एवं यथोक्तेन प्रकारेणोक्त्वा ततोऽनंतरं हे राजन् हे धृतराष्ट्र महायोगेश्वरो महांश्चासौ योगेश्वरश्च हरिर्नारायणो
दर्शयामास दर्शितवान् पार्थाय पृथासुताय परमं रूपमैश्वरं ९ ॥ ॥

अनेकवक्त्रनयनमनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे तदनेकवक्त्रनयनमनेकाद्भुतदर्शनमनेकानि अद्भुतानि विस्मा
पकानि दर्शनानि यस्मिन् तदनेकाद्भुतदर्शनं रूपं तथा अनेकदिव्याभरणं अनेकानि दिव्यान्याभरणानि यस्मिंस्तदनेकदिव्याभ
रणं तथा दिव्यानेकोद्यतायुधं दिव्यान्यनेकानि अस्त्रादीन्युद्यतान्यायुधानि यस्मिन् तद्दिव्यानेकोद्यतायुधं दर्शयामासेति पूर्
वेण संबंधः १० किंच दिव्यमाल्यांबरधरं दिव्यानि माल्यानि पुष्पाणि अंबराणि च वस्त्राणि ध्रियंते येनेश्वरेण तं दिव्यमाल्यां
बरधरं दिव्यगंधानुलेपनं यस्य तं दिव्यगंधानुलेपनं सर्वाश्चर्यमयं सर्वाश्चर्यप्रायं देवमनंतं नास्यांतोऽस्तीत्यनंतः तं विश्वतो
मुखं सर्वतोमुखं सर्वभूतात्मभूतत्वात्तं दर्शयामासार्जुनाय दर्शितवानिति वाध्याह्रियते ११ या पुनर्भगवतो विश्वरूपस्य भासस्तस्या
उपमोच्यते दिवि अंतरिक्षे तृतीयस्यां वा दिवि सूर्याणां सहस्रं तस्य युगपदुत्थितस्य या युगपदुत्थिता भाः सा यदि सदृशी स्यात्

अनेकवक्त्रनयनमनेकाद्भुतदर्शनं अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं १० दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं
सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं ११ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता यदि भाः सदृशी सा स्याद्भासस्तस्य म
हात्मनः १२ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा अपश्यद्देवदेवस्य शरीरे पांडवस्तदा १३ ततः स विस्मयाविष्टो
हृष्टरोमा धनंजयः प्रणम्य शिरसा देवं कृतांजलिरभाषत १४ अर्जुन उवाच पश्यामि देवांस्तव देव देहे सर्वांस्तथा
भूतविशेषसंघान् ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् १५

स्य महात्मनो विश्वरूपस्य भासा यदि वा न स्यात्ततो विश्वरूपस्यैव भा अतिरिच्यत इत्यभिप्रायः १२ तत्र तस्मिन्विश्वरूपे एक
स्मिन् स्थितमेकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा देवपितृमनुष्यादिभेदैरपश्यद्दृष्टवान् देवदेवस्य हरेः शरीरे पांडवोऽर्जुनस्त
दा १३ ततस्तं दृष्ट्वा स विस्मयेनाविष्टो विस्मयाविष्टो हृष्टानि रोमाणि यस्य सोऽयं हृष्टरोमा चाभवद्धनंजयः प्रणम्य
प्रकर्षेण नमनं कृत्वा भक्तिभूतः सन् शिरसा देवं विश्वरूपधरं कृतांजलिर्नमस्कारार्थं संपुटीकृतहस्तः सन्नभाषत उक्तवान् १४
कथं यत्त्वया दर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमाविष्कुर्वन् पश्यामि उपलभे हे देव तव देहे देवान् सर्वान् तथा भूतविशे
षसंघान् भूतानां विशेषाणां स्थावरजंगमानां नानासंस्थानविशेषाणां संघाः भूतविशेषसंघास्तान् किंच ब्रह्माणं चतुर्मुखमीशमी
शितारं प्रजानां कमलासनस्थं पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थमित्यर्थः ऋषींश्च वसिष्ठादींश्च सर्वानुरगांश्च वासुकिप्रभृतीनुरगान्
दिव्यान् १५

95
1943

अनेकवाहूदरवक्त्रनेत्रं अनेकबाहवउदराणि वक्त्राणि नेत्राणि च यस्य तव स त्वमनेकबाहूदरवक्त्रनेत्रस्तमनेकबाहूदर
वक्त्रनेत्रं पश्यामि त्वा सर्वतः सर्वत्र अनंतरूपं अनंतानि रूपाण्यस्येत्यनंतरूपस्तमनंतरूपं नांतं न मध्यं न पुनस्तवादिं मध्यं नाम
४८ मध्यः कोटयोरंतरं न पुनस्तवादिं नांतं वदस्यांतं पश्यामि न मध्यं पश्यामि न पुनरादिं पश्यामि हे विश्वेश्वर हे विश्वरूप १६
किंच किरीटिनं किरीटं नाम शिरोभूषणविशेषस्तद्यस्यास्तीति स किरीटी तं तथा गदिनं गदा विद्यते यस्येति गदी तं गदिनं त
था चक्रिणं चक्रमस्यास्तीति चक्री तं चक्रिणं तेजोराशिं तेजःपुंजं सर्वतो दीप्तिमंतं सर्वतो दीप्तिर्यस्यास्ति स सर्वतोदीप्तिमा
न् तं सर्वतो दीप्तिमान् तं सर्वतोदीप्तिमंतं पश्यामि त्वा दुर्निरीक्ष्यं दुःखेन निरीक्ष्यो दुर्निरीक्ष्यस्तं समंतात् समंततः सर्वत्र दीप्तान
लार्कद्युतिम् अनलश्चार्कश्चानलार्कौ दीप्तानलार्कयोर्द्युतिरिव द्युतिस्तेजो यस्य तव स त्वं दीप्तानलार्कद्युतिस्तं त्वां दीप्तान
लार्कद्युतिं अप्रमेयं न प्रमेयमशक्यपरिच्छेदमित्यर्थः १७ इत एव तव योगशक्तिदर्शनादनुमिनोमि त्वमक्षरं परमं वेदित

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपं नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप १६ किरीटिनं गदिनं
चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतं पश्यामि त्वां दुर्निरीक्ष्यं समंताद्दीप्तानलार्कद्युतिमप्रमेयं १७ त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानं त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे १८ अनादिमध्यांतमनंतवीर्यमनं
तबाहुं शशिसूर्यनेत्रं पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं १९ ॥

रमं ब्रह्म वेदितव्यं ज्ञातव्यं मुमुक्षुभिः त्वमस्य विश्वस्य समस्तस्य जगतः परं प्रकृष्टं निधानं निधीयते अस्मिन्निति निधानं पर
आश्रय इत्यर्थः किंच त्वमव्ययो न तव व्ययो विद्यत इत्यव्ययः शाश्वतधर्मगोप्ता शाश्वतः सदा भवो नित्यो धर्मस्तस्य धर्म
स्य गोप्ता सनातनश्चिरंतनस्त्वं पुरुषः परमो मतोऽभिप्रेतो मम १८ किंच अनादिमध्यांतम् आदिश्च मध्यं चांतश्च न विद्यते य
स्य सोऽयमनादिमध्यांतस्तं त्वा अनादिमध्यांतमनंतवीर्यं न तव वीर्यस्यांतो नास्तीति अनंतवीर्यस्तं त्वामनंतवीर्यं तथा अ
नंतबाहुं अनंता बाहवो यस्य तव स त्वमनंतबाहुस्तं त्वामनंतबाहुं शशिसूर्यनेत्रं शशिसूर्यौ नेत्रे यस्य तव तं शशि
नयनं पश्यामि त्वां दीप्तहुताशवक्त्रं दीप्तश्चासौ हुताशश्च स वक्त्रं यस्य तव स त्वं दीप्तहुताशवक्त्रस्तं त्वां दीप्तहुताश
वक्त्रं स्वतेजसा विश्वमिदं समस्तं तपंतं संतापयंतं १९ ॥ ॥ ४८

97/196

द्यावापृथिव्योरिदमंतरं हि अंतरिक्षं हि व्याप्तं त्वयैकेन विश्वरूपधरेण दिशश्च सर्वा व्याप्ताः दृष्ट्वा उपलभ्याद्भुतं विस्मयकरं रूपमिदं
तवोग्रं क्रूरं लोकत्रयं लोकानां त्रयं प्रव्यथितं भीतं चलितं वा हे महात्मन् अक्षुद्रस्वभाव २० अथाधुना पुरा यद्वा जयेम यदि वा नो
जयेयुरित्यर्जुनस्य संशय आसीत् तन्निर्णयाय पांडवजयमैकांतिकं दर्शयामीति प्रवृत्तो भगवांस्तं पश्यन्नाह किंच अमी हि यु
ध्यमाना योधास्त्वां सुरसंघा ये त्वत्र भूभारावतारार्थमवतीर्णा वस्वादिदेवसंघा मनुष्यसंस्थाना स्त्वां विशंति प्रविशंतो दृश्यंते तेषु
केचिद्भीताः प्रांजलयः संतो गृणंति स्तुवंति त्वामन्ये पलायने प्रत्याख्याताः संतो युद्धे प्रत्युपस्थिते उत्पातादिनिमित्तान्युपलक्ष्य स्व
स्त्यस्तु जगत इत्युक्त्वा महर्षिसिद्धसंघा महर्षीणां सिद्धानां च संघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः संपूर्णाभिः २१ किंचान्य
त् रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ विश्वेदेवाः अश्विनौ देवौ मरुतश्चोष्मपाश्च पितरः गंधर्वयक्षासुरसिद्धसंघा

द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् २० अमी हि
त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः २१
रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च गंधर्वयक्षासुरसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः
२२ रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहं २३ न
भःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो २४

गंधर्वा हाहाहूहूप्रभृतयो यक्षाः कुबेरप्रभृतयोऽसुरा विरोचनप्रभृतयः सिद्धाः कपिलादयस्तेषां संघाः गंधर्वयक्षासुरसिद्धसं
घाः ते वीक्षंते पश्यंति त्वां विस्मिता विस्मयमापन्नाः संतस्त एव सर्वे २२ यस्मात् महदतिप्रमाणं ते तव बहुवक्त्रनेत्रं बहूनि वक्त्रा
णि मुखानि नेत्राणि चक्षूंषि च यस्मिन् रूपं बहुवक्त्रनेत्रं हे महाबाहो बहुबाहूरुपादं बहवो बाहव ऊरवः पादाश्च यस्मिन् तद्बहुबाहू
रुपादं किंच बहूदरं बहून्युदराणि अस्मिन्निति बहूदरं बहुदंष्ट्राकरालं बह्वीभिः दंष्ट्राभिः करालं विकृतं तद्बहुदंष्ट्राकरालं दृ
ष्ट्वा रूपमीदृशं लोकाः प्राणिनः प्रव्यथिताः प्रचलिता भयेन तथाहमपि २३ तत्रेदं कारणं नभःस्पृशं द्युस्पृशमित्यर्थः दीप्तमन
लितं अनेकवर्णं अनेके वर्णा भयंकरा नानासंस्थाना यस्मिन् स्थितं त्वामनेकवर्णं व्यात्ताननं व्यात्तानि विवृतान्याननानि मुखा
नि यस्मिन् स्थितं त्वामनेकवर्णं व्यात्ताननं व्यात्तानि विवृतान्याननानि मुखानि यस्मिन् स्थितं त्वां व्यात्ताननं दीप्तविशालने

 त्रंदीप्तानि प्रज्वलितानि विशालानि विस्तीर्णानि नेत्राणि यस्मिंस्त्वयि तं त्वां दीप्तविशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा प्रव्य
थितः प्रभीतः अंतरात्मा मनो यस्य सोहं प्रव्यथितांतरात्मा सन् धृतिं न विंदामि धैर्यं न लभे शमं चोपशमं मनस्तुष्टिं हे विष्णो २४ क
 स्मात् दंष्ट्राकरालानि दंष्ट्राभिः करालानि विकृतानि ते तव मुखानि दृष्ट्वैवोपलभ्य कालानलसंनिभानि प्रलयकाले लोकानां दा
हकोग्निः कालानलस्तत्संनिभानि कालानलसदृशानि मुखानि दृष्ट्वेत्येतत् दिशः पूर्वापरविवेकेन न जाने दिङ्मूढो जातोस्म्यतो
न लभे चनोपलभे शर्म सुखमतः प्रसीद प्रसन्नो भव हे देवेश हे जगन्निवास २५ येभ्यो मम पराजयाशंका या सीत्सा चापगताय
तः अमी च त्वां धृतराष्ट्रस्य पुत्राः दुर्योधनप्रभृतयः त्वरमाणा विशंति इति व्यवहितेन संबंधः सर्वे सहैव सहिता अवनिपाल
संघैः अवनीं पृथ्वीं पालयंतीत्यवनिपालास्तेषां संघैः किंच भीष्मो द्रोणः सूतपुत्रः कर्णस्तथासौ सहास्मदीयैरपि धृष्टद्युम्न

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास २५ अमी
च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः २६ वक्त्रा
णि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः २७ यथा
नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति तथा तवामी नरलोकवीरा विशंति वक्त्राण्यभिविज्वलंति २८ यथा
प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः तथैव नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः २९

प्रभृतिभिः योधमुख्यैर्योधानां मुख्यैः प्रधानैः सह २६ किंच वक्त्राणि मुखानि ते तव त्वरमाणास्त्वरायुक्ताः संतो विशंति किं
विशिष्टानि मुखानि दंष्ट्राकरालानि भयानकानि भयंकराणि किंच केचिन्मुखानि प्रविष्टानां मध्ये विलग्ना दशनानां दंतानाम
मंतरेषु मांसमिव भक्षितं संदृश्यंते उपलभ्यंते चूर्णितैरुत्तमांगैश्चूर्णीकृतैः शिरोभिः २७ कथं प्रविशंति मुखानीत्याह यथा
नदीनां स्रवंतीनां बहवोनेके अंबुनो वेगाः अंबुवेगास्त्वरा विशेषाः समुद्रमेवाभिमुखाः प्रतिमुखा द्रवंति विशंति तथा तद्वत्तवामी भी
ष्मादयो नरलोकवीराः मनुष्यलोकवीराः शूराः विशंति वक्त्राण्यभिमुखं विज्वलंति प्रकाशमानानि २८ ते किमर्थं विशंति कथं
चेत्याह यथा प्रदीप्तं ज्वलनमग्निं पतंगाः पक्षिणो विशंति नाशाय समृद्धवेगाः तथैव नाशाय विशंति लोकाः प्राणिनस्तवापि
वक्त्राणि समृद्धवेगाः समृद्धः उद्भूतो वेगो गतिर्येषां ते समृद्धवेगास्तथैव नाशाय विशंति लोकाः प्राणिनस्तवापि वक्त्राणि समृ
द्धवेगाः २९ ॥

हेरंब
५९

99
1943

त्वं पुनः लेलिह्यसे आस्वादयसि ग्रसमानोंतः प्रवेशयन् समंतात् समंततो लोकान् समग्रान् समस्तान् वदनैर्वक्त्रैः ज्वलद्भिर्दी
प्यमानैः तेजोभिरापूर्य संव्याप्य जगत्समग्रं सहाग्रेण समस्तमित्येतत् किंच भासो दीप्तयस्तवोग्राः क्रूराः प्रतपंति संतापं कुर्वंति हे वि
ष्णो व्यापनशील ३० यत एवमुग्रस्वभावोतः आख्याहि कथय मे मह्यं को भवानेवमुग्ररूपः क्रूराकारो नमोस्तु ते तुभ्यं हे देववर दे
वानां प्रधान प्रसीद प्रसादं कुरु विज्ञातुं विशेषेण ज्ञातुमिच्छामि भवंतमाद्यमादौ भवं तमाद्यं न हि यस्मात् प्रजानामि तव त्वदीयां प्रवृ
त्तिं चेष्टां ३१ कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकानां क्षयं करोतीति लोकक्षयकृत्प्रवृद्धो वृद्धिं गतो यदर्थं प्रवृद्धस्तच्छृणु लोकान् स
माहर्तुं संहर्तुमिहास्मिन्काले प्रवृत्तः ऋतेपि विनापि त्वां न भविष्यंति भीष्मद्रोणकर्णप्रभृतयः सर्वे येभ्यस्तवाशंका येवस्थिताः प्रत्यनीके
षु अनीकमनीकं प्रतिप्रत्यनीकेषु योधा योद्धारः ३२ यस्मादेवं तस्मात्त्वमुत्तिष्ठ यशो लभस्व भीष्मप्रभृतयोतिरथा अजेया

लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ३०
आख्याहि मे को भवानुग्ररूपो नमोस्तु ते देववर प्रसीद विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं ३१ श्रीभग॰
कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः ऋतेपि त्वां न भविष्यंति सर्वे येवस्थिताः प्रत्यनीकेषु योधाः ३२
तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धं मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ३३
द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ३४

देवैरप्यजेया अर्जुनेन जिता इति यशो लभस्व केवलं पुण्यैर्हि तल्लभ्यते जित्वा शत्रून् दुर्योधनप्रभृतीन् भुंक्ष्व राज्यमसपत्नमकंटकं समृद्धं
मयैवैते निहताः निश्चयेन हताः प्राणैर्वियोजिताः पूर्वमेव निमित्तमात्रं भव त्वं हे सव्यसाचिन् सव्येन वामेन हस्तेन शरणां क्षेप्ता
सव्यसाचीत्युच्यतेर्जुन ३३ द्रोणं च येषु योधेषु अर्जुनस्याशंका तान् व्यपदिशति भगवान् मया हतानिति द्रोणभीष्म
योस्तावत् प्रसिद्धमाशंका कारणं द्रोणस्तु धनुर्वेदाचार्यो दिव्यास्त्रसंपन्न आत्मनश्च विशेषतो गुरुर्गरिष्ठो भीष्मः स्वच्छंदमृत्युर्दि
व्यास्त्रसंपन्नश्च परशुरामेण द्वंद्वयुद्धमगमत् न च पराजितस्तथा जयद्रथाय यस्य पिता तपश्चरति मम पुत्रस्य शिरो भूमौ पातयि
ष्यति यस्तस्यापि शिरः पतिष्यतीति कर्णोपि वासवदत्तया शक्त्या अमोघया संपन्नः सूर्यपुत्रः कानीनो यतोतस्तन्नाम्नैव नि
र्देशः मया हतांस्त्वं जहि निमित्तमात्रेण मा व्यथिष्ठास्तेभ्यो भयं माकार्षीः युध्यस्व जेतासि दुर्योधनप्रभृतीन् रणे युद्धे सपत्नान् श
त्रून् ३४

गी॰ टी॰ भा॰ तच्छ्रुत्वा वचनं केशवस्य पूर्वोक्तं कृतांजलिः संवेपमानः कंपमानः किरीटी नमस्कृत्वा भूयः पुनरेवाह उक्तवान् कृष्णं सगद्गदं सहगद्
गदया वाचा मंदशब्देन भयाविष्टस्य दुःखाभिघातात् स्नेहाविष्टस्य च हर्षोद्भवात् अश्रुपूर्णनेत्रत्वे सति श्लेष्मणा कंठावरोधस्ततश्च वा
५० चापाटवं मंदशब्दत्वं यत् स गद्गदस्तेन सह वर्तत इति सगद्गदं वचनमाहेति वचनक्रियाविशेषणमेतद्भीतभीतः पुनः पुनर्भयावि
ष्टचेताः सन् प्रणम्य प्रह्वो भूत्वा आहेत्यवहितेन संबंधः अत्रावसरे संजयवचनं साभिप्रायं कथं द्रोणादिचतुष्केन निहतेषु अजये
षु चतुर्षु निराश्रयो दुर्योधनो निहत एवेति मत्वा धृतराष्ट्रो जयं प्रति निराशः सन् आत्मनाशं संधिं करिष्यतीति ततः शांतिरुभयेषां भवि
ष्यतीति तदपि नाश्रौषीत् धृतराष्ट्रो भवितव्यवशात् ३५ स्थाने युक्तं किं तत् तव प्रकीर्त्या त्वन्माहात्म्यकीर्तनेन श्रुतेन हृषीकेश य
ज्जगत् प्रहृष्यति प्रकर्षेण हर्षमुपैतीति तत् स्थाने युक्तमित्यर्थः अथवा विषयविशेषणं स्थाने इति युक्तो हर्षादिविषयो भगवान् यत ईश्वरः स
र्वात्मा सर्वभूतसुहृच्चेति तथा अनुरज्यते च अनुरागं चोपैतीति तद्विषय इत्यार्थ्येयं किंच रक्षांसि भीतानि भयाविष्टानि दिशो

संजय उवाच एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य
३५ अर्जुन उ॰ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसं
घाः ३६ कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोप्यादिकर्त्रे अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ३७
त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानं वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ३८

द्रवंति गच्छंतीति तच्च स्थाने विषये सर्वे नमस्यंति च नमस्कुर्वंति च सिद्धसंघाः सिद्धानां समुदायाः कपिलादीनां तच्च स्था ३६ भगवतो
हर्षादिविषयत्वे हेतुं दर्शयति कस्माच्च हेतोस्ते तुभ्यं न नमेरन् न नमस्कुर्युर्हे महात्मन् गरीयसे गुरुतराय यतो ब्रह्मणो हिरण्यगर्भ
स्याप्यादिकर्ता कारणम् तस्मै आदिकर्त्रे कथमेते न नमस्कुर्युरतो हर्षादीनां नमस्कारस्य च स्थानं त्वं अर्हो विषय इत्यर्थः हे अनं देख
त देवेश जगन्निवास त्वमक्षरं यच्छ्रुतौ श्रूयते किं तत् सदसत् यद्विद्यमानमस्ति अयं च नास्तीति बुद्धिस्तदुपधानभूते सदसती
यस्याक्षरस्य यद्द्वारेण सदसदित्युपचर्यते परमार्थतस्तु सदसतः परं तत् यदक्षरं वेदविदो वदंति तत्त्वमेव नान्यदित्यभिप्रायः ३७ ५०
पुनरपि स्तौति त्वमादिदेवो जगतः स्रष्टृत्वात् पुरुषः पुरि शयनात् पुराणश्चिरंतनस्त्वमेवास्य विश्वस्य परं प्रकृष्टं निधानं निधी
यतेस्मिन् जगत्सर्वं महाप्रलयादाविति किंच वेत्तासि वेदितासि सर्वस्य च वेद्यं ज्ञातव्यं यच्च वेद्यं वेदनार्हं तदपि च परं च धाम
परमं पदं वैष्णवं च त्वया ततं व्याप्तं विश्वं समस्तमनंतरूप अंतो न विद्यते नंतरूपाणां ३८ ॥ ५(

10/1943

किंच वायुस्त्वं यमश्चाग्निर्वरुणोऽपांपतिः शशांकश्चंद्रमाः प्रजापतिस्त्वं कश्यपादिः प्रपितामहश्च पितामहस्यापि पिता प्रपि
तामहः पितामहो ब्रह्मा ब्रह्मणोपि पितेत्यर्थः नमो नमस्तेस्तु तुभ्यमस्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते बहुशो नम
स्कारक्रियाभ्यासावृत्तिगणनं कृत्वा सुचाभ्यां पुनश्च भूयः प्रीतिश्रद्धाभक्त्यतिशयात् परितोषमात्मना दर्शयति ३९ तथा
नमः पुरस्तात्पूर्वस्यां दिशि तुभ्यमथ पृष्ठतोपि ते नमोस्तु ते सर्वत एव सर्वासु दिक्षु सर्वत्र स्थिताय हे सर्व अनंतवीर्यामितवि
क्रमानंतवीर्यं यस्यामितो विक्रमो यस्य वीर्यं सामर्थ्यं विक्रमः पराक्रमो वीर्यवानपि कश्चिच्छस्त्रादिविषये न पराक्रमते मंदपरा
क्रमो वा त्वं तु अनंतवीर्यश्चामितविक्रमश्चेत्यनंतवीर्यामितविक्रमः सर्वं समस्तं जगत् समाप्नोषि सम्यगेकेनात्मना व्याप्नोषि य
तस्तस्मादसि भवसि सर्वं त्वया विनाभूतं न किंचिदस्तीत्यर्थः ४० यतोहं त्वन्माहात्म्यापरिज्ञानादपराध्यातः सखा समानव

वायुर्यमोग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च नमो नमस्तेस्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते ३९
नमः पुरस्तादथ पृष्ठतस्ते नमोस्तु ते सर्वत एव सर्व अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोसि सर्वः ४०
सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ४१
यच्चावहासार्थमसत्कृतोसि विहारशय्यासनभोजनेषु एकोथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ४२
पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् न त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमप्रभाव ४३

याः इति मत्वा ज्ञात्वा विपरीतबुध्या प्रसभं अभिभूय प्रसह्य यदुक्तं किं हे कृष्ण हे यादव हे सखेति अजानता अज्ञानिना मूढेन किमजा
नता इत्याह महिमानं माहात्म्यं तवेदं तवेश्वरस्य विश्वरूपं तदेवं महिमानमजानतेति व्यधिकरणेन संबंधः तवेममिति पाठे य
… सामानाधिकरण्यमेव मया प्रमादात् क्षिप्तचित्ततया प्रणयेन वापि प्रणयो नाम स्नेहनिमित्तो विस्रंभस्तेनापि कारणेन य
दुक्तवानस्मि ४१ यच्च अपहासार्थं परिहासप्रयोजनाय असत्कृतोसि परिभूतोसि भवसि क्व विहारशय्यासनभोजनेषु विहरणं
विहारः पादव्यायामः शयनं शय्या आसनमास्थायिका भोजनं अदनमित्येतेषु विहारशय्यासनभोजनेषु एकः परोक्षः सन् असत्कृतो
सि परिभूतोसि अथवापि हे अच्युत तत्समक्षं तच्छब्दः क्रियाविशेषणार्थः प्रत्यक्षं वा असत्कृतोसि तत्सर्वमपराधजातं क्षामये क्षमां कार
ये त्वामहमप्रमेयं प्रमाणातीतं ४२ यतस्त्वं पितासि जनयितासि लोकस्य प्राणिजातस्य चराचरस्य स्थावरजंगमस्य न केवलं त्वम
स्य जगतः पिता पूज्यश्च पूजार्हो यतो गुरुर्गरीयान् गुरुतरः कस्माद् गुरुतरत्वमित्याह न त्वत्समस्त्वत्तुल्योस्ति नहीश्वरद्वयं सं

गी॰ शां॰ भा॰

५१

भवति अनेकेश्वरत्वे व्यवहारानुपपत्तेरत्वत्सम एव तावदन्यो न संभवति कुत एवान्योऽभ्यधिकः स्यात् लोकत्रयेऽपि कस्मात्सर्वस्मि
न्नु अर्वाचीनप्रभावप्रतिमीयते यया सा प्रतिमा न विद्यते प्रतिमा यस्य तव स प्रभावस्य सत्त्वमप्रतिमप्रभावः हे अप्रतिमप्रभाव निरतिशयप्र
भाव इत्यर्थः ४३ यत एवं तस्मात् प्रणम्य नमस्कृत्वा प्रणिधाय प्रकर्षेण नीचैर्धृत्वा कायं शरीरं प्रसादये प्रसादं कारये त्वामहमीशमीश्वरमी
ड्यं स्तुत्यं त्वं पुनः पुत्रस्यापराधं पिता यथा क्षमते सर्वं सखेव सख्युरपराधं यथा वा प्रियः प्रियायाः अपराधं क्षमते एवमर्ह
सि देह त्वमादं प्रसहितुं क्षन्तुमित्यर्थः ४४ अदृष्टपूर्वं न कदाचिदपि दृष्टपूर्वमिदं विश्वरूपं तव मया त्वद्व्यतिरिक्तैर्दृष्टोऽहृष्टोऽस्मि भयेन
च प्रव्यथितं मनो मे अतस्तदेव मे दर्शय देव रूपं यन्मत्सखं प्रसीद देवेश जगन्निवास जगतो निवासो जगन्निवासः हे जगन्नि
वास ४५ किंच किरीटिनं किरीटवन्तं तथा गदिनं गदावन्तं चक्रहस्तमिच्छामि पार्थ त्वां द्रष्टुमहं तथैव पूर्ववदित्यर्थः यत एवं तस्मात्
तेनैव रूपेण चतुर्भुजेन वसुदेवपुत्ररूपेण सहस्रबाहो वार्तमानिकेन विश्वरूपेण भव विश्वमूर्ते उपसंहृत्य विश्वरूपं तेनैव वसुदेवपुत्र

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ४४ अदृष्टपू
र्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ४५ किरीटिनं गदिनं चक्रहस्तमिच्छामि
त्वां द्रष्टुमहं तथैव तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ४६ श्रीभगवानुवाच मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ४७ न वेदयज्ञाध्ययनैर्न दानैर्न च
क्रियाभिर्न तपोभिरुग्रैः एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ४८ ॥

वं रूपेण भवेत्यर्थः ४६ अर्जुनं भीतमुपलभ्य संहृत्य विश्वरूपं प्रियवचनेन आश्वासयन् श्रीभगवानुवाच मया प्रसन्नेन प्रसादो
नाम त्वय्यनुग्रहबुद्धिस्तद्वता प्रसन्नेन मया तव हे अर्जुन इदं परं रूपं विश्वरूपं दर्शितमात्मयोगात् आत्मन ऐश्वर्यस्य सामर्थ्यात्तेजो
मयं तेजःप्रायं विश्वं समस्तमनन्तमाद्यमादौ भवमाद्यं यद्रूपं मम मे त्वदन्येन त्वत्तोऽन्येन केनचिन्न दृष्टपूर्वं ४७ मम रूपदर्शनेन कृतार्थ एव
त्वं संवृत्त इति तत्स्तौति न वेदयज्ञाध्ययनैश्चतुर्णामपि वेदानामध्ययनैर्यथावत् यज्ञाध्ययनैश्च वेदाध्ययनेनैव यज्ञाध्ययन
स्य वेदाध्ययनेनैव यज्ञाध्ययनस्य सिद्धत्वात् पृथक् यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपलक्षणार्थं तथा न दानैर्न च क्रियाभिरग्निहो
त्रादिभिः श्रौतादिभिर्नापि तपोभिरुग्रैश्चान्द्रायणादिभिरुग्रैर्घोरैः एवं रूपं यथा दर्शितं विश्वरूपं यस्य सोऽहमेवं रूपः शक्योऽहं
शक्यः अहं नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन त्वत्तोऽन्येन कुरुप्रवीर ४८ श्रीराम जय राम जय जय राम श्रीकृष्ण हेरंब

हेरंब

५१

103/1943

मा ते व्यथा मा भूत्ते भयं मा च विमूढभावो विमूढचित्तता दृष्ट्वोपलभ्य रूपं घोरमीदृक् यथा दर्शितं ममेदं व्यपेतभीः विगतभयः प्रीतमना
श्च सन् पुनर्भूयस्त्वं तदेव चतुर्भुजं शङ्खचक्रगदाधरं तव इष्टं रूपमिदं प्रपश्य ४९ संजय उ॰ इत्यर्जुनं वासुदेवस्तथा भूतं वचनमुक्त्वा स्वकं
वसुदेवगृहे जातं रूपं दर्शयामास दर्शितवान् भूयः पुनराश्वासयामास च आश्वासितवान् भीतमेनं भूत्वा पुनः सौम्यवपुः प्रसन्नदेहो म
हात्मा ५० अर्जुन उवाच दृष्ट्वेदं मानुषं रूपं मत्सखं प्रसन्नं तव सौम्यं जनार्दन इदानीमधुनास्मि संवृत्तः संजातः किं सचेताः प्रसन्न
चित्तः प्रकृतिं स्वभावं गतश्चास्मि ५१ श्रीभगवानुवाच सुदुर्दर्शमिदं सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्म
मम देवा अप्यस्य मम रूपस्य नित्यं सर्वदा दर्शनकाङ्क्षिणो दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तो न द्रक्ष्यन्ति चेत्यभिप्रायः ५२ कस्मात्
नाहं वेदैः ऋग्यजुःसामाथर्ववेदैश्चतुर्भिरपि न तपसोग्रेण चान्द्रायणादिना न दानेन गोभूहिरण्यादिना न चेज्यया यज्ञेन पूजया वा श
क्य एवं विधो यथा दर्शितप्रकारः द्रष्टुं अन्यैः दृष्टवानसि मां यथा त्वं ५३ कथं पुनः शक्य इत्युच्यते भक्त्या तु किं विशिष्टया

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ४९ संजय उ॰ इत्यर्जु
नं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ५० अर्जुन उ॰ दृष्ट्वेदं मा
नुषं रूपं तव सौम्यं जनार्दन इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ५१ श्रीभगवानु॰ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम देवा
अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ५२ नाहं वेदैर्न तपसा न दानेन न चेज्यया शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा ५३ भक्त्या
त्वनन्यया शक्य अहमेवं विधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ५४ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः निर्वैरः सर्वभूतेषु

ह अनन्यया अपृथग्भूतया भगवतोऽन्यत्र पृथङ्न कदाचिदपि या भवति सर्वैरपि करणैर्वासुदेवादन्यन्नोपलभ्यते यया सा अनन्या भक्ति
स्तया भक्त्या शक्योऽहमेवंविधो विश्वरूपप्रकारो हे अर्जुन ज्ञातुं शास्त्रतो न केवलं ज्ञातुं शास्त्रतो द्रष्टुं च साक्षात्कर्तुं तत्त्वेन तत्त्वतः प्रवेष्टुं च मोक्षं
च गन्तुं परंतप ५४ अधुना सर्वस्य गीताशास्त्रस्य सारभूतार्थो निःश्रेयसार्थोऽनुष्ठेयत्वेन समुच्चित्योच्यते मत्कर्मकृन्मदर्थं कर्म मत्कर्म तत्क
रोतीति मत्कर्मकृत् मत्परमः करोति भृत्यः स्वामिकर्म न त्वात्मनः परमा प्रेत्य गन्तव्या गतिरिति स्वामिनं प्रतिपद्यते अयं तु मत्कर्मकृन्मामे
व मत्परमोऽहं परमा गतिर्यस्य सोऽयं मत्परमः तथा मद्भक्तः मामेव सर्वप्रकारैः सर्वात्मना सर्वोत्साहेन भजत इति मद्भक्तः संगवर्जितः धन
पुत्रमित्रकलत्रबन्धुवर्गेषु संगवर्जितः प्रीतिस्नेहवर्जितो निर्वैरः निर्गतवैरः सर्वभूतेषु शत्रुभावरहितः आत्मनोऽत्यन्तापकारणप्र
वृत्तेष्वपि नाद्वेष्टा यः स मद्भक्तः स मामेति अहमेव तस्य परा गतिर्नान्या काचिद्भवति अयं तवोपदेशाद्दृष्टो मयोपदिष्टो हे पाण्डवेति ५५ ६७
इति श्रीगी॰ विश्वरूपदर्शनो नाम एकादशोऽध्यायः ११ ६७ ५५ ६८

Library of the Bombay Branch of the Royal Asiatic Society

गी॰शां॰भा॰ द्वितीयाध्यायप्रभृतिषु विभूत्यंतेष्वध्यायेषु परमात्मनो ब्रह्मणोऽक्षरस्य विध्वस्तसर्वविशेषणस्योपासनमुक्तं सर्वयोगैश्वर्यसर्वज्ञान
शक्तिमत्सत्वोपाधिरीश्वरस्य तव चोपासनं तत्र तत्रोक्तं विश्वरूपाध्याये त्वैश्वरमाद्यं समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासना
र्थमेव त्वया तच्च दर्शयित्वा उक्तवानसि मत्कर्मकृदित्यादि अतोऽहमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामीति अर्जुन उ॰ एवमित्य
५२ तीतानंतरश्लोकेनोक्तमर्थं परामृशति मत्कर्मकृदित्यादिना एवं सततयुक्ताः नैरंतर्येण भगवत्कर्मादौ यथोक्तेऽर्थे समाहिताः संतः प्रवृत्ता इ
त्यर्थः ये भक्ता अनन्यशरणाः संतस्त्वां यथादर्शितं विश्वरूपं पर्युपासते ध्यायंति ये चान्येऽपि त्यक्तसर्वैषणाः संन्यस्तसर्वकर्माणो यथा
विशेषितं ब्रह्माक्षरं निरस्तसर्वोपाधित्वादव्यक्तमकरणगोचरं यदव्यक्तमुच्यते ... तेषां मध्ये के योगवित्तमाः के अतिशयेन योगविद इत्यर्थः १ ये तदक्षरोपासका अ
स्यक्तदर्शिनो निवृत्तैषणास्ते तावत्तिष्ठंतु तान्प्रति यद्वक्तव्यं तदुपरिष्टाद्वक्ष्यामो ये त्वितरे मयि विश्वरूपे परमेश्वरे आवेश्य समाधाय मनो

अर्जुन उ॰ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः १ श्रीभगवानुवाच मय्यावेश्य मनो ये मां नित्ययुक्ता
उपासते श्रद्धया परयोपेतास्ते मे युक्ततमा मताः २ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ३

ये भक्ताः संतो मां सर्वेषां योगेश्वराणामीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशतिमिरदृष्टिं नित्ययुक्ता अतीतानंतराध्यायांतोक्तश्लोका
र्थन्यायेन सततयुक्ताः संत उपासते श्रद्धया परया प्रकृष्टयोपेतास्ते मे मम मता अभिप्रेता युक्ततमा इति नैरंतर्येण हि मच्चित्ततया ...
... तानू प्रति युक्ततमा इति वक्तुं किमितरे युक्ततमा न भवंति न किंतु तान्प्रति यद्वक्तव्यं २ तच्छृणु ये त्वक्षर
मनिर्देश्यमव्यक्तत्वादशब्दगोचरमिति न निर्देष्टुं शक्यते अतोऽनिर्देश्यं अव्यक्तं पर्युपासते परि समंतादुपासते उपासनं नाम यथा
शास्त्रं उपास्यस्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं तदुपासनं
माचक्षते अक्षरस्य विशेषणमाह सर्वत्रगं व्योमवद्व्यापि अव्यक्तत्वाच्च अचिंत्यं च यद्धि करणगोचरं तन्मनसापि चिंत्यं तद्वि
परीतत्वादचिंत्यमक्षरं कूटस्थं दृश्यमानगुणमंतर्दोषं वस्तु कूटं कूटरूपं कूटसाक्ष्यमित्यादौ कूटशब्दः प्रसिद्धो लोके तथा च
विद्यायनेकसंसारबीजमंतर्दोषवन्मायाव्याकृतादिशब्दवाच्यं मायां तु प्रकृतिं विद्या न्मायिनं तु महेश्वरं मम माया दुरत्यया इ
त्यादौ प्रसिद्धं यत्तत्कूटं तस्मिन्कूटे स्थितं कूटस्थं तदध्यक्षतया अथवा राशिरिव स्थितं कूटस्थं अत एवाचलं यस्मादचलं तस्माद्ध्रुवं नि
त्यमित्यर्थः ३ हेतव ५२

105/1943

संनियम्य सम्यङ्नियम्य संहृत्य इंद्रियग्राममिंद्रियसमुदायं सर्वत्र सर्वस्मिन्काले समबुद्धयः समा तुल्या बुद्धिर्येषां इष्टानिष्ट
प्राप्तौ समबुद्धयः ते य एवंविधाः प्राप्नुवंति मामेव सर्वभूतहिते रताः न तु तेषां वक्तव्यं किंचिन्मां ते प्राप्नुवंतीति ज्ञानी त्वात्मैव मे मत
मिति ह्युक्तं न हि भगवत्स्वरूपाणां सतां युक्ततमत्वमयुक्ततमत्वं वा वाच्यं ४ किंतु क्लेशोऽधिकतरो यद्यपि मत्कर्मादिपराणा
मधिक एव क्लेशोऽधिकतरस्त्वक्षरात्मदर्शिनां परमार्थदर्शिनां देहाभिमानपरित्यागनिमित्तोऽव्यक्तासक्तचेतसामव्यक्ते असक्तं
चेतो येषां तेऽव्यक्तासक्तचेतसस्तेषामव्यक्तासक्तचेतसां अव्यक्ता हि यस्मात् या गतिरक्षरात्मिका दुःखं देहवद्भिः देहाभि
मानवद्भिरवाप्यते अतः क्लेशोऽधिकतरः ५ अक्षरोपासकानां यद्वर्तनं तदुपरिष्टाद्वक्ष्यामः ये तु कर्माणि सर्वाणि मयि संन्य
स्य मत्पराः अहं परो येषां ते मत्पराः संतो अनन्येनैव अविद्यमानमन्यदालंबनं विश्वरूपं देवमात्मानं मुक्त्वा यस्य सोऽनन्यस्तेनानन्ये
नैव केवलेन योगेन समाधिना मां ध्यायंतश्चिंतयंत उपासते ६ तेषां किं तेषां मदुपासनैकपराणामहमीश्वरः समुद्धर्ता कुत इत्य

संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ४ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ५ ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येनैव योगेन मां ध्यायंत उपासते ६
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् भवामि न चिरात्पार्थ मय्यावेशितचेतसां ७ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ८ अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ९

त आह मृत्युसंसारसागरात् मृत्युयुक्तः संसारो मृत्युसंसारः स एव सागर इव सागरो दुस्तरत्वात्तस्मान्मृत्युसंसारसागरादह
हं तेषां समुद्धर्ता भवामि न चिरात् किं तर्हि क्षिप्रमेव हे पार्थ मय्यावेशितचेतसां मयि विश्वरूपे आवेशितं प्रवेशितं समाहितं चेतो
येषां ते मय्यावेशितचेतसः तेषां ७ यत एवं तस्मात् मय्येव विश्वरूपे ईश्वरे मनः संकल्पविकल्पात्मकमाधत्स्व स्थापय मय्ये
वाध्यवसायं कुर्वतीं बुद्धिं चाधत्स्व निवेशय तत्र तस्ते किं स्यादिति शृणु निवसिष्यसि निवत्स्यसि निःसंशयेन मदात्मना मय्येव वासं
करिष्यस्यत ऊर्ध्वं शरीरपाताद्‌ ऊर्ध्वं न संशयः संशयोऽत्र न कर्तव्यः ८ अथैवं यथावोचाम तथा मयि चित्तं समाधातुं स्थापयितुं
स्थिरमचलं न शक्नोषि चेत्ततः पश्चादभ्यासयोगेन चित्तस्यैकस्मिन्नालंबने सर्वतः समाहृत्य पुनः पुनः स्थापनमभ्या
सः तत्पूर्वको योगः समाधानलक्षणस्तेनाभ्यासयोगेन मां विश्वरूपमिच्छ प्रार्थयस्व आप्तुं प्राप्तुं हे धनंजय ९

अभ्यासेप्यसमर्थोसि यद्यसमर्थोसि तर्हि मत्कर्मपरमो भव मदर्थं कर्म मत्कर्म तत्परमो मत्कर्मप्रधान इत्यर्थः अभ्यासेन विना मदर्थमपि कर्माणि केवलं कुर्वन् सिद्धिं सत्त्वशुद्धियोगज्ञानप्राप्तिद्वारेणावाप्स्यसि २० अथ पुनरेतदपि यदुक्तं मत्कर्मपरमत्वं तदपि कर्तुमशक्तो
५३ सि मद्योगमाश्रितो मयि क्रियमाणानि कर्माणि संन्यस्य यत्करणं तेषामनुष्ठानं स मद्योगस्तमाश्रितः सन् सर्वकर्मफलत्यागं सर्वेषां कर्मणां फलसंन्यासं सर्वकर्मफलत्यागं ततो नंतरं कुरु यतात्मवान् संयतचित्तः सन्नित्यर्थः २१ इदानीं सर्वकर्मफलत्यागं स्तौति श्रेयो हि प्रशस्यतरं ज्ञानं कस्माद्विवेकपूर्वकादभ्यासात् तस्मादपि ज्ञानात् ज्ञानपूर्वकं ध्यानं विशिष्यते ज्ञानवतो ध्यानादपि कर्मफलत्यागो विशिष्यत इति अनुषज्यते एवं कर्मफलत्यागात्पूर्वविशेषणवतः शांतिरुपशमः सहेतुकस्य संसारस्यानंतरमेव स्यात् नतु कालांतरमपेक्षते अज्ञस्य कर्मणि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मणां फलत्यागः श्रेयः साधनमुपदिष्टं न प्रथममेव अतश्च श्रेयो हि ज्ञानमित्याद्युत्तरोत्तरविशिष्टत्वोपदेशेन सर्वकर्मफलत्यागः स्तूयते सम्पन्नज्ञानसाधनानुष्ठानाशक्तावनुष्ठेयत्वेन

अभ्यासेप्यसमर्थोसि मत्कर्मपरमो भव मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि २० अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् २१ श्रेयो हि ज्ञानमभ्यासात् ज्ञानाद्ध्यानं विशिष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं २२

श्रुतत्वात् केन धर्मेण स्तुतित्वं यदा सर्वे प्रमुच्यंत इति सर्वकामप्रहाणादमृतत्वमुक्तं तत्प्रसिद्धं कामाश्च सर्वे श्रौतस्मार्तकर्मणां फलानि तत्त्यागे च विदुषो ध्याननिष्ठस्यानंतरैवांतिरिति सर्वकामत्यागसामान्यं सर्वकर्मफलत्यागस्यास्तीति तत्सामान्यात्कर्मफलत्यागस्तुतिरियं प्ररोचनार्था यथाऽगस्त्येन ब्राह्मणेन समुद्रः पीत इदानीं तना अपि ब्राह्मणा ब्राह्मणत्वसामान्यात्स्तूयंते एवं कर्मफलत्यागात्कर्मयोगस्य श्रेयःसाधनत्वमभिप्रेतमत्र चात्मेश्वरभेदमाश्रित्य विश्वरूपईश्वरे चेतःसमाधानलक्षणो योग उक्तः ईश्वरार्थं कर्मानुष्ठानादि च अथैतदप्यशक्तोसीत्यज्ञानकार्यसूचनान्नाभेददर्शिनोऽक्षरोपासकस्य कर्मयोग उपपद्यत इति दर्शयति भगवान् ये त्वक्षरोपासकाः सांख्यास्तेषां कैवल्यप्राप्तौ सांतं त्वमुक्तं तेषां पारतंत्र्यमीश्वराधीनतां दर्शितवान् तेषामहं समुद्धर्तेति यदि हीश्वरस्यात्मभूतास्ते मता अभेददर्शित्वादक्षरस्वरूपा एव त इति समुद्धरणकर्मवचनं तान्प्रत्यनुपपन्नं स्यात् यस्माच्चार्जुनस्यात्यंतमेव हितैषी भगवांस्तस्य सम्यग्दर्शितानन्वितं कर्मयोगं भेददृष्टिमंतमेवोपदिशति न चात्मानमीश्वरं प्रमाणतो बुद्ध्वा कस्यचिद्गुणभावं जिगमिषति कश्चिद्विरोधात् तस्मादक्षरोपासकानां सम्यग्दर्शननिष्ठानां संन्यासिनां त्यक्तसर्वैषणानामद्वेष्टा सर्वभूतानामित्यादिधर्मपूगं साक्षादमृतत्वकारणं वक्ष्यामीति प्रवर्तते १२

107/1943

अद्वेष्टा सर्वभूतानां न द्वेष्टा आत्मनो दुःखहेतुमपि न किंचिद्द्वेष्टि सर्वाणि भूतानि आत्मत्वेन हि पश्यति मैत्रः मित्रभावो मैत्री मित्रतया वर्तत इति मैत्रः करुण एव च करुणा कृपा दुःखितेषु दया तद्वान्करुणः सर्वभूताभयप्रदः संन्यासीत्यर्थः निर्ममो ममेति प्रत्ययवर्जितो निरहंकारो निर्गतोऽहंकारप्रत्ययः समदुःखसुखः समे दुःखसुखे द्वेषरागयोरप्रवर्तके यस्य स समदुःखसुखः क्षमी क्षमावानाक्रुष्टोभिहतो वापि इत्यविक्रिय एवास्ते १३ संतुष्टः सततं नित्यं देहस्थितिकारणस्य लाभालाभे चोत्पन्नालंप्रत्ययः तथा गुणवल्लाभविपर्यये च संतुष्टः सततं योगी समाहितचित्तो यतात्मा संयतस्वभावः दृढनिश्चयो दृढः स्थिरः निश्चयोऽध्यवसायो यस्यात्मतत्त्वविषये स दृढनिश्चयः मय्यर्पितमनोबुद्धिः संकल्पविकल्पात्मकं मनोऽध्यवसायलक्षणा बुद्धिस्ते मय्येवार्पिते स्थापिते यस्य संन्यासिनः स मय्यर्पितमनोबुद्धिः य ईदृशो मद्भक्तः स मे प्रियः १४ प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रिय इति सप्तमाध्याये सूचितं तदिह प्रपंच्यते यस्मान्नोद्विजते लोको यस्मात्संन्यासिनो नोद्विजते उद्वेगं न गच्छति न संतप्यते न संक्षुभ्यते लोकस्तथा लोका

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसुखः क्षमी १३ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः १४ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः १५ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः १६ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः १७ समः शत्रौ च मित्रे च तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः संगविवर्जितः

न्नोद्विजते च यः हर्षामर्षभयोद्वेगैः हर्षश्चामर्षश्च भयं च उद्वेगश्च तैः हर्षामर्षभयोद्वेगैर्मुक्तो हर्षः प्रियलाभेऽन्तःकरणस्योत्कर्षो रोमांचनाश्रुपातादिलिंगः अमर्षोऽसहिष्णुता भयं त्रासः उद्वेग उद्विग्नता तैर्मुक्तो यः स च मे प्रियः १५ देहेंद्रियविषयसंबंधादिष्वपेक्षाविषयेष्वनपेक्षो निस्पृहः शुचिर्बाह्येनाभ्यंतरेण च शौचेन संपन्नो दक्षः प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत्प्रतिपत्तुं समर्थ उदासीनो न कस्यचिन्मित्रादेः पक्षं भजते यः उदासीनो यतिर्गतव्यथः गतभयः सर्वारंभपरित्यागी आरभ्यंत इत्यारंभा इहामुत्रार्थानि कामहेतूनि कर्माणि सर्वारंभास्तान्परित्यक्तुं शीलं यस्येति सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः १६ किंच यो न हृष्यति इष्टप्राप्तौ न द्वेष्टि अनिष्टप्राप्तौ न शोचति प्रियवियोगे न चाप्राप्तं कांक्षति शुभाशुभे कर्मणी परित्यक्तुं शीलमस्येति शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः १७ समः शत्रौ च मित्रे च तथा मानापमानयोः पूजापरिभवयोः शीतोष्णसुखदुःखेषु समः सर्वत्र च संगवर्जितः १८

गी॰ शां॰ भा॰ किंच तुल्यनिंदास्तुतिः निंदा च स्तुतिश्च निंदास्तुती ते तुल्ये यस्य स तुल्यनिंदास्तुतिः मौनी मौनवान् संयतवाक् संतुष्टो येन केन
८४ न चित् शरीरस्थितिहेतुमात्रेण तथा चोक्तं येन केनचिदाच्छन्नो येन केनचिदाशितः यत्र क्वचनशायी स्यात्तं देवा ब्राह्मणं विदुरिति किं
च अनिकेतः निकेतः निकेत आश्रयो निवासो नियतो यतो न विद्यते यस्य सो निकेतो नागार इत्यादिस्मृत्यंतरात् स्थिरमतिः स्थिरा पर
मार्थवस्तुविषया मतिर्यस्य स स्थिरमतिः भक्तिमान्मे प्रियो नरः १९ अद्वेष्टा सर्वभूतानामित्यादिना अक्षरस्योपासकानां सन्यासिनां निवृ
त्तसर्वैषणानां परमार्थज्ञाननिष्ठानां धर्मजातमुपक्रांतमुपसंह्रियते इति ये तु सन्यासिनो धर्म्यामृतं धर्म्यं च तदमृतं च धर्म्यामृतं
अमृतत्वप्राप्तिहेतुत्वात् इदं यथोक्तमद्वेष्टा सर्वभूतानामित्यादिना पर्युपासते अनुतिष्ठंति श्रद्दधानाः संतो मत्परमाः यथोक्तोहमक्षरा
त्मा परमा निरतिशया गतिर्येषां ते मत्परमा मद्भक्ताश्च उत्तमां परमार्थज्ञानलक्षणां भक्तिमाश्रितास्ते अतीव मे प्रियाः प्रियो हि ज्ञानि
नोत्यर्थमित्यत्र सूचितं तद्व्याख्यायेहोपसंहृतं भक्तास्तेतीव मे प्रिया इति यस्माद्धर्म्यामृतमिदं यथोक्तमनुतिष्ठन् भगवतो विष्णोः

तुल्यनिंदास्तुतिर्मौनी संतुष्टो येनकेनचित् अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः १९ ये तु धर्म्यामृतमिदं यथोक्तं पर्यु
पासते श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः २० हरिः ॐ तत्सदिति श्री॰ भक्तियोगो नाम द्वादशोध्यायः १२

परमेश्वरस्यातीव प्रियो भवति तस्मादिदं धर्म्यामृतं मुमुक्षुणा यत्नतो नुष्ठेयं प्रियं विष्णोः परं धाम जिगमिषुणेति वाक्यार्थः २०
इति श्रीभगवद्गीताभाष्ये शंकरभगवतः कृतौ द्वादशोध्यायः १२ ८ ८ सप्तमेध्याये सूचिते द्वे प्रकृती ईश्वर
स्य त्रिगुणात्मिका अष्टधा भिन्ना अपरा संसारहेतुत्वात् परा चान्या जीवभूता क्षेत्रज्ञलक्षणा ईश्वरात्मिका याभ्यां प्रकृतिभ्यामी
श्वरो जगदुत्पत्तिस्थितिलयहेतुत्वं प्रतिपद्यते तत्र क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण तद्वत ईश्वरस्य तत्त्वनिर्धारण
ार्थं क्षेत्राध्याय आरभ्यते अतीतानंतराध्याये चाद्वेष्टा सर्वभूतानामित्यादिना यावदध्यायपरिसमाप्ति तावत्तत्त्वज्ञानिनां
सन्यासिनां निष्ठा यथा ते वर्तंत इत्येतदुक्तं केन पुनस्ते तत्त्वज्ञानेन युक्ता यथोक्तधर्माचरणाद्भगवतः प्रिया भवंतीत्येवमर्थश्चाय
मध्याय आरभ्यते प्रकृतिश्च त्रिगुणात्मिका सर्वकार्यकरणविषयाकारेण परिणता पुरुषस्य भोगापवर्गार्थकर्तव्यतया देहें
द्रियाद्याकारेण संहन्यते सोयं संघात इदं शरीरं तदेतद्भगवानुवाच ॥ ॥ ८५

109
1903

इदमिति सर्वनाम्नोक्तं विशिनष्टि शरीरमिति हे कौंतेय क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रवद्वास्मिन् कर्मफलनिर्वृत्तेः क्षेत्र
मितीति शब्द एवं शब्दपदार्थकः क्षेत्रमित्येवमभिधीयते कथ्यते एतत् शरीरं क्षेत्रं यो वेत्ति विजानात्यापादतलमस्तकं ज्ञानेन वि
षयीकरोति स्वाभाविकेनौपदेशिकेन वा ज्ञानेन विषयीकरोति विभागशस्तं वेदितारं प्राहुः कथयंति क्षेत्रज्ञ इति शब्दः
एवं शब्दपदार्थकः एवं पूर्ववत् क्षेत्रज्ञ इत्येवमाहुः के तद्विदः क्षेत्रक्षेत्रज्ञौ ये विदंति ते तद्विदः एवं क्षेत्रक्षेत्रज्ञावुक्तौ किमेता
वन्मात्रेण ज्ञानेन ज्ञातव्याविति नेत्युच्यते १ क्षेत्रज्ञं यथोक्तलक्षणं चापि मां परमेश्वरमसंसारिणं विद्धि विजानीहि यो
सर्वक्षेत्रेषु एकः क्षेत्रज्ञो ब्रह्मादिस्तंबपर्यंतानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्वोपाधिभेदं सदसदादिशब्दप्रत्ययागोच
रं विद्धीत्यभिप्रायः हे भारत यस्मात् क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेण ज्ञानगोचरमन्यदवशिष्टमस्ति तस्मात् क्षे
त्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यत् ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते तत् ज्ञानं सम्यग्ज्ञानमिति मम मतमित्यभिप्रा

श्रीभगवानुवाच इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः
१ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम २ ७

यो मम परमेश्वरस्य विष्णोः ननु सर्वक्षेत्रेष्वेक ईश्वरो नान्यस्तद्व्यतिरिक्तो भोक्ता चेत् तत ईश्वरस्य संसारित्वं प्राप्तमीश्व
रव्यतिरेकेण वा संसारिणो न्यस्याभावात् संसाराभावप्रसंगस्त्वेतद्द्वयमनिष्टं बंधमोक्षतद्धेतुशास्त्रानर्थक्यप्रसंगात्
प्रत्यक्षादिप्रमाणविरोधाच्च प्रत्यक्षेण तावत् सुखदुःखतद्धेतुलक्षणः संसार उपलभ्यते जगद्वैचित्र्योपलब्धेश्च धर्माधर्म
निमित्तः संसारो नुमीयते सर्वमेतदनुपपन्नमात्मेश्वरैकत्वे न ज्ञानाज्ञानयोरन्यत्वोपपत्तेः दूरमेते विपरीते विषूची अविद्या
या च विद्येति ज्ञाता तथानयोर्विद्याविद्ययोर्विषयफलभेदो विरुद्धो निर्दिष्टः श्रेयश्च प्रेयश्चेति विद्याविषयः श्रेयः प्रे
यस्तु अविद्याकार्यमिति तथा च व्यासः द्वाविमावथ पंथानावित्यादि इमौ द्वावेव पंथानावित्यादि च इह चैव निष्ठे उक्ते अ
विद्यां च सह कार्येण विद्यया हातव्येति श्रुतिस्मृतिन्यायेभ्यो वगम्यते श्रुतयस्तावदिह चेदवेदीदथ सत्यमस्ति न चेदिह
वेदीन्महती विनष्टिस्तमेवं विद्वानमृत इह भवति नान्यः पंथा विद्यतेऽयनाय विद्वान्न बिभेति कुतश्चन अविद्वानस्य तस्य

गीतां भा० यंभवति अविद्यायामंतरे वर्तमानाः ब्रह्मवेद ब्रह्मैव भवति अन्योसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानामविद्या
सद्वंद्वं संबंभवति यदा चर्मवदित्याद्याः सहस्रशः सन्ति यच्च अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः इहैव तैर्जितः सर्गो येषां साम्ये स्थि
तं मनः समं पश्यन्हि सर्वत्र इत्याद्याः न्यायतश्च सर्पान् कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयंति अज्ञानतस्तत्र पतंति
५५ केचित् ज्ञानफलं पश्य यथा विशिष्टं तथा च देहादिष्वात्मबुद्धिरविद्वान् रागद्वेषादियुक्तो धर्माधर्मानुष्ठानकृज्जायते म्रियते च
त्यवगम्यते देहादिव्यतिरिक्तात्मदर्शिनो रागद्वेषादिप्रहाणापेक्षधर्माधर्मप्रवृत्त्युपशमान्मुच्यंत इति न केनचित् प्रत्याख्यातुं शक्य
न्यायतः तत्रैवं सति क्षेत्रज्ञस्येश्वरस्यैव सतो अविद्याकृतोपाधिभेदतः संसारित्वमिव भवति यथा देहाद्यात्मत्वमात्मनः सर्वजंतूनां हि
प्रसिद्धा हि देहादिष्वनात्मस्वात्मभावो निश्चितोऽविद्याकृतो यथा स्थाणौ पुरुषनिश्चयो न चैतावता पुरुषधर्मः स्थाणोर्भवति स्थाणुध
र्मो वा पुरुषस्य तथा न चैतन्यं देहस्य धर्मो देहधर्मो वा चेतन्यस्य सुखदुःखमोहात्मकत्वादिरात्मनो न युक्तो अविद्याकृतत्वाविशेषा
ज्जरामृत्युवच्च नानुपपन्नत्वादिति चेत् स्थाणुपुरुषौ ज्ञेयावेव संतौ ज्ञात्रान्योन्यस्मिन्नध्यस्तावविद्ययेति देहात्मनोस्तु ज्ञेयज्ञा
त्रोरेवेतरेतराध्यास इति न समो दृष्टांतो देहधर्मो ज्ञेयोऽपि ज्ञातुरात्मनो भवतीति नन्वेवमादिप्रसंगात् यदि हि ज्ञेयस्य देहादेः
क्षेत्रस्य धर्माः सुखदुःखमोहेच्छाद्वेषादयो ज्ञातुरात्मनो भवंति ज्ञेयस्य क्षेत्रस्य धर्माः केचनात्मनो भवंतीत्यविद्याध्यारोपिता जन्मजरा
मरणादयस्तु न भवंतीति विशेषहेतुर्वक्तव्यो न भवंतीत्यत्यनुमानमविद्याध्यारोपितत्वात् जरामरणादिवदिति हेयत्वादुपादेय
त्वाच्च इत्यादि तत्रैवं सति कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्ययाध्यारोपित इति न तेन ज्ञातुः किंचिद् दुष्यति यथा
बालैरध्यारोपितेन आकाशस्य तलमलिनत्वादिना एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः क्षेत्रज्ञेश्वरस्य संसारित्वगंधमात्रमपि
नाशंक्यं नहि क्वचिदपि लोके अविद्याध्यस्तेन धर्मेण कस्यचिदुपकारोऽपकारो वा दृष्टो यत्तूक्तं न समो दृष्टांत इति तदसत् कथम् अविद्याध्या
समात्रं हि दृष्टांतदार्ष्टांतिकयोः साधर्म्यं विवक्षितं तन्न व्यभिचरति यत्तु ज्ञातर्यभिचरतीति मन्यसे तस्याप्यनैकांतिकत्वं दर्शि
तं जरादिभिः अविद्यावत्त्वात् क्षेत्रज्ञस्य संसारित्वमिति चेन्न अविद्यायास्तामसत्वात् तामसो हि प्रत्यय आवरणात्मकत्वादविद्या विप
रीतग्राहकः संशयोपस्थापको वा विवेकप्रकाशाभावे च तदभावात् तामसे चावरणात्मके तिमिरादिदोषे सत्यग्रहणादेरविद्यात्र
यस्योपलब्धेः अत्राह एवं तर्हि ज्ञातृधर्मोऽविद्या न करणस्य चक्षुषि तैमिरिकत्वादिदोषोपलब्धेः यत्तु मन्यसे ज्ञातृधर्मोऽविद्या तदेव चा
विद्याधर्मवत्त्वं क्षेत्रज्ञस्य संसारित्वं तत्र यदुक्तं क्षेत्रज्ञ एवेश्वरो न संसारीत्येतदयुक्तमिति तन्न यथा करणे चक्षुषि विपरीतग्रा

हकादिदोषस्य दर्शनान्न विपरीतादिग्रहणं तन्निमित्तो वा तैमिरिकत्वादिदोषो ग्रहीतुः चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रही
तुरदर्शनान्न ग्रहीतुर्धर्मो यस्मात्तथा सर्वत्रैवाग्रहणविपरीतसंशयप्रत्ययास्तन्निमित्ताः करणस्यैव कस्यचिद्भवितुमर्हंति न
ज्ञातुः क्षेत्रज्ञस्य संवेद्यत्वाच्च तेषां प्रदीपप्रकाशवत् न ज्ञातृधर्मत्वं संवेद्यत्वादेव स्वात्मव्यतिरिक्तसंवेद्यत्वं सर्वकरणवियोगे च कै
वल्ये सर्ववादिभिरविद्यादिदोषवत्त्वानभ्युपगमात् आत्मनो यदि क्षेत्रज्ञस्य अग्न्युष्णवत् स्वो धर्मस्ततो न कदाचिदपि तेन वियोगः
स्यात् अविक्रियस्य व्योमवत् सर्वगतस्यामूर्तस्यात्मनः केनचित्संयोगवियोगानुपपत्तेः सिद्धं क्षेत्रज्ञस्य नित्यमेवेश्वरत्वं अनादि
त्वान्निर्गुणत्वादित्यादीश्वरवचनाच्च नन्वेवं सति संसारसंसारित्वाभावे शास्त्रानर्थक्यादिदोषः स्यादिति न सर्वैरभ्युपगमत्वात्
सर्वैरात्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्तव्यो भवतीति कथमभ्युपगत इति मुक्तात्मनां संसारसंसारित्वव्यवहाराभावः स
र्वैरात्मवादिभिरिष्यते न च तेषां शास्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगतास्तथा नः क्षेत्रज्ञानामीश्वरैकत्वे सति शास्त्रानर्थक्यं भव
त्वविद्याविषये चार्थवत्त्वं यथा द्वैतिनां सर्वेषां बंधावस्थायामेव शास्त्राद्यर्थवत्त्वं न मुक्तावस्थायामेवं ननु आत्मनो बंधमो
क्षावस्थे परमार्थत एव वस्तुभूते द्वैतिनां नः सर्वेषाम् अतो हेयोपादेयतत्साधनसद्भावे शास्त्राद्यर्थवत्त्वं स्यात् अद्वैतिनां पुनर्द्वैतस्यापर
मार्थत्वादविद्याकृतत्वात् बंधावस्थायामप्यात्मनोऽपरमार्थत्वे निर्विषयत्वाच्छास्त्राद्यानर्थक्यमिति चेन्नात्मनोऽवस्थाभेदानुपपत्तेः
यदि तावदात्मनो बंधमुक्तावस्थे युगपत्स्यातां क्रमेण वा युगपत्तावद्विरोधान्न संभवतः स्थितिगती इवैकस्मिन् क्रमभावित्वे च नि
र्निमित्तत्वे अनिर्मोक्षप्रसंगात् अन्यनिमित्तत्वे च स्वतोऽभावादपरमार्थत्वप्रसंगस्तथा च सत्यभ्युपगमहानिः किं च बंधमोक्षावस्थयोः
पौर्वापर्यनिरूपणायां बंधावस्था पूर्वं प्रकल्प्या अनादिमत्यंतवती च तच्च प्रमाणविरुद्धं तथा च मोक्षावस्थादिमत्यनंतवती च
प्रमाणविरुद्धैवाभ्युपगम्यते न चावस्थावतोऽवस्थांतरं गच्छतो नित्यत्वमुपपादयितुं शक्यमथानित्यत्वदोषपरिहाराय बंधमुक्ता
वस्थाभेदो न कल्प्यते अतो द्वैतिनामपि शास्त्रानर्थक्यादिदोषोऽपरिहार्य एवेति समानत्वान्नाद्वैतवादिना परिहर्तव्यो दोषः न च
शास्त्रानर्थक्यं यथाप्रसिद्धाविद्वत्पुरुषविषयत्वाच्छास्त्रस्य विदुषां हि फलहेत्वोरनात्मनोरात्मदर्शनं न विदुषां विदुषां हि फलहे
तुभ्यामात्मनोऽन्यत्वदर्शने सति तयोरहमित्यात्मदर्शनानुपपत्तेः नहि अत्यंतमूढ उन्मत्तादिरपि जलाग्न्योः छायाप्रकाशयोर्वैक
त्वं पश्यति किमुत विवेकी तस्मान्न विधिप्रतिषेधशास्त्रं तावत्फलहेतुभ्याम् आत्मनोऽन्यत्वदर्शिनो भवति नहि देवदत्त त्वमिदं कु
र्विति कस्मिंश्चित्कर्मणि नियुक्ते विष्णुमित्रोऽहं नियुक्त इति तत्रस्थो नियोगं शृण्वन्नपि प्रतिपद्यते नियोगविषयविवेकाग्रहणा

गी०भा० त्पपद्यते प्रतिपत्तिस्तथा फलहेत्वोरपि ननु प्राकृतसंबंधापेक्षया युक्तैव प्रतिपत्तिः शास्त्रार्थविषया फलहेतुत्यागस्यात्मदर्शि
पि सति इष्टफलहेतौ प्रवर्तितोऽस्म्यनिष्टफलहेतोश्च निवर्तितोऽस्मीति यथा पितृपुत्रादीनामितरेतरात्मान्यत्वदर्शने सत्यपि अन्योन्य
५८ नियोगप्रतिषेधार्थप्रतिपत्तिर्न व्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेव फलहेत्वोरात्माभिमानस्य सिद्धत्वात् प्रतिपन्ननियोगप्रतिषेधा
र्थो हि फलहेतुभ्यामात्मनोऽन्यत्वं प्रतिपद्यते न पूर्वं तस्माद्विधिप्रतिषेधशास्त्रमविद्वद्विषयमिति सिद्धं ननु स्वर्गकामो यजेत कलञ्जं न
भक्षयेदित्यादावात्मव्यतिरेकदर्शिनामप्रवृत्तिः केवलदेहाद्यात्मदृष्टीनां चातः कर्तुरभावाच्छास्त्रानर्थक्यमिति चेन्न यथाप्रसिद्धि
त एव प्रवृत्तिनिवृत्त्युपपत्तेरीश्वरक्षेत्रज्ञैकत्वदर्शी ब्रह्मवित्तावन्न प्रवर्तते तथा नैरात्म्यवाद्यपि नास्ति परलोक इति न प्रवर्तते यथाप्र
सिद्धस्तु विधिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्या अनुमितात्मास्तित्व आत्मविशेषानभिज्ञः कर्मफलसंजाततृष्णः श्रद्दधानश्च प्र
वर्तत इति सर्वेषां नः प्रत्यक्षमतो न शास्त्रानर्थक्यं विवेकिनामप्रवृत्तिदर्शनात्तदनुगामिनामप्रवृत्तेः शास्त्रानर्थक्यमिति चेन्न कस्यचि
देव विवेकोपपत्तेरनेकेषु हि प्राणिषु कश्चिदेव विवेकी स्याद्यथेदानीं न च विवेकिनमनुवर्तन्ते मूढाः रागादिदोषतन्त्रत्वात्प्रवृत्ते
रभिचरणादौ च प्रवर्तमाना दृश्यन्ते स्वाभाव्याच्च प्रवृत्तेः स्वभावस्तु प्रवर्तत इति चोक्तं तस्मादविद्यामात्रः संसारो यथादृष्टविषय
एव न क्षेत्रज्ञस्य केवलस्याविद्या तत्कार्यं च न च मिथ्याज्ञानं परमार्थवस्तु दूषयितुं समर्थं न ह्यूषरदेशं स्नेहेन पङ्कीकर्तुं शक्नोति मरी
च्युदकं तथाविद्या क्षेत्रज्ञस्य न किंचित्कर्तुं शक्नोति अतश्चेदमुक्तं क्षेत्रज्ञं चापि मां विद्धि अज्ञानेनावृतं ज्ञानमिति च अथ किमिदं सं
सारिणामिवाहमेवं ममैवेदमिति पण्डितानामपि कथं शृणु इदं तत्पाण्डित्यं यत्क्षेत्र एवात्मदर्शनं यदि पुनः क्षेत्रज्ञमविक्रियं पश्येयुस्ततो
न भोगं कर्म वा कांक्षेयुर्मम स्यादिति विक्रियैव हि भोगकर्मणी अथैवं सति फलार्थित्वादविद्वान् प्रवर्तते विदुषः पुनरविक्रियात्मदर्शिनः
फलार्थित्वाभावात्प्रवृत्त्यनुपपत्तौ कार्यकरणसंघातव्यापारोपरमे निवृत्तिरुपचर्यते इदं चान्यत्पाण्डित्यं केषांचिदस्तु क्षेत्रज्ञ ईश्व
र एव क्षेत्रं चान्यत्क्षेत्रज्ञस्य विषयः अहं तु संसारी सुखी दुःखी च संसारोपरमश्च मम कर्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेन ध्यानेन चे हरिः
श्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेनेति यश्चैवं बुध्यते यश्च बोधयति नासौ क्षेत्रज्ञ इत्येवं मन्वानो यः स पण्डितापसदः संसार
मोक्षयोः शास्त्रस्य चार्थवत्त्वं करोमीत्यात्महा स्वयं मूढोऽन्यांश्च व्यामोहयति शास्त्रार्थसंप्रदायरहितत्वात् श्रुतहानिमश्रुतपरिकल्पनां ५८
कुर्वंस्तस्मादसंप्रदायवित् सर्वशास्त्रविदपि मूर्खवदेवोपेक्षणीयः यत्तूक्तं ईश्वरस्य क्षेत्रज्ञैकत्वे संसारित्वं प्राप्नोति क्षेत्रज्ञानां च
ईश्वरैकत्वे संसारिणोऽभावात्संसाराभावप्रसंग इत्येतौ दोषौ प्रत्युक्तौ विद्याविद्ययोर्वैलक्षण्याभ्युपगमादिति कथमविद्याप

113/1953

रिकल्पितदोषेण तद्विषयं वस्तु पारमार्थिकं न दुष्यतीति तथा च दृष्टान्तो दर्शितो मरीच्यम्भसोषरदेशो न पङ्कीक्रियत इति संसारिणो
ऽभावात्संसाराभावप्रसंगदोषोऽपि संसारसंसारिणोरविद्याकल्पितत्वोपपत्त्या प्रत्युक्तः ननु अविद्यावत्त्वमेव क्षेत्रज्ञस्य संसारित्वदो
षस्तत्कृतं च दुःखित्वादि प्रत्यक्षमुपलभ्यते न ज्ञेयस्य क्षेत्रधर्मत्वात् ज्ञातुः क्षेत्रज्ञस्य न तत्कृतदोषानुपपत्तेः यावत्किंचित्क्षेत्रज्ञस्य दोष
जातमसंतमाध्यस्यति तस्य ज्ञेयत्वोपपत्तेः क्षेत्रधर्मत्वमेव न क्षेत्रज्ञधर्मत्वं न तेन क्षेत्रज्ञो दुष्यति ज्ञेयेन ज्ञातुः संसर्गानुपपत्तेः यदि हि
संसर्गः स्यात् ज्ञेयत्वमेव नोपपद्येत यद्यात्मनो धर्मोऽविद्यावत्त्वं दुःखित्वादि च कथं भोः प्रत्यक्षमुपलभ्यते कथं वा क्षेत्रज्ञधर्मः ज्ञेयं च
तत्सर्वं क्षेत्रं ज्ञातैव क्षेत्रज्ञ इत्यवधारितं अविद्यादुःखित्वादेः क्षेत्रज्ञधर्मत्वं क्षेत्रज्ञविशेषणत्वं तस्य च प्रत्यक्षोपलभ्यत्वमिति विरुद्ध
मुच्यते अविद्यामात्रावष्टम्भात्केवलं अत्राह साविद्या कस्येति यस्य दृश्यते तस्यैव कस्य दृश्यत इत्यत्रोच्यते अविद्या कस्य दृश्यत इति
प्रश्नो निरर्थकः कथं दृश्यते चेदविद्या तद्वन्तमपि पश्यसि न च तद्वत्युपलभ्यमाने सा कस्येति प्रश्नो युक्तो न हि गोमत्युपलभ्यमाने गा
वः कस्येति प्रश्नोऽर्थवान् भवेत् ननु विषमो दृष्टान्तो गवां तद्वतश्च प्रत्यक्षत्वात् संबन्धोऽपि प्रत्यक्ष इति प्रश्नो निरर्थको न तथाविद्यातद्वतो
श्च प्रत्यक्षो यतः प्रश्नोऽनर्थकः स्यात् अप्रत्यक्षेणाविद्यावताविद्यासंबन्धे ज्ञाते किं तव स्यात् अविद्याया अनर्थहेतुत्वात्परिहर्तव्या स
स्यात् यस्याविद्या स तां परिहरिष्यति ननु ममैवाविद्या जानासि तर्ह्यविद्यां तद्वन्तं चात्मानं जानामि न तु प्रत्यक्षेण अनुमानेन चेज्ज्ञा
नासि कथं संबन्धग्रहणं न हि तव ज्ञातुर्ज्ञेयभूतया अविद्यया तत्काले संबन्धो ग्रहीतुं शक्यते अविद्याया विषयत्वेनैव ज्ञातुरुपयुक्तत्वा
त्न च ज्ञातुरविद्यायाश्च संबन्धस्य आरोपितेन क्रियाकारकव्यापारात्मनोपचर्यते यो गृहीता ज्ञानं चान्यत्तद्विषयं संभवत्यनवस्थाप
त्तेर्यदि ज्ञात्रापि ज्ञेयसंबन्धो ज्ञायतेऽन्यो ज्ञाता कल्प्यः स्यात्तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्थापरिहार्या यदि पुनरविद्या ज्ञेयान्य
द्वा ज्ञेयं ज्ञेयमेव तथा ज्ञातापि ज्ञातैव न ज्ञेयं भवति यदा चैवमविद्यादुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किंचिद्दुष्यति ननु अयमेव दोषो यद्दो
षवत्क्षेत्रविज्ञातृत्वं न विज्ञानस्वरूपस्यैवाविक्रियस्य विज्ञातृत्वोपचारात् यथाग्नेरौष्ण्यमात्रेण तप्तिक्रियोपचारस्तद्वत् यथात्र भग
वता क्रियाकारकफलात्मत्वाभाव आत्मनि स्वत एव दर्शितोऽविद्याध्यारोपितेनैव क्रियाकारकाद्यात्मन्युपचर्यते तथा तत्र तत्र य एनं वे
त्ति हन्तारं प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः नादत्ते कस्यचित्पापं इत्यादिप्रकरणेषु दर्शितस्तथैव च व्याख्यातमस्माभिरु
त्तरेष्वपि प्रकरणेषु दर्शयिष्यामः हन्त तर्ह्यात्मनि क्रियाकारकफलात्मताया स्वतोऽभावे अविद्यया चाध्यारोपितत्वे कर्माण्यविद्वत्कर्तव्या
न्येव न विदुषामिति प्राप्तं सत्यमेवं प्राप्तं एतदेव च न हि देहभृता शक्यमित्यत्र दर्शयिष्यामः सर्वशास्त्रार्थोपसंहारप्रकरणे च स

मासेन च कौंतेय निष्ठा ज्ञानस्य या परा सर्वविशेषणपेतादर्शयिष्यामः अहं त्विति विप्रसिहा रं हव ऊ पपं च नेत्यसंतोषेणे इदं शरीरमि
त्यादि श्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य संग्रहश्लोकोयमुपन्यस्यते तत्क्षेत्रं यच्चेत्यादिनाचिरव्यासितस्य तत्पर्यस्य संग्रहोपन्या
सोन्याय्य इति यत्निर्दिष्टमिदं शरीरं इति २ यन्निर्दिष्टमिदं शरीरमिति तत्तच्छब्देन परामृशति यच्चेदं निर्दिष्टं क्षेत्रं तत्तया र्त्कृत्या
दृष्टां स्वकीयैर्धर्मैश्च यादृक् समुच्चयार्थ याद्रिकारियोविकारो यस्य तत्तयाद्रिकारि यतो यस्मात्कार्यमुत्पद्यते इ निवाक्यशेषः
स च यः क्षेत्रज्ञो निर्दिष्टः स यत्प्रभावा ये प्रभावा उपाधिकृताः शक्तयो यस्य स यत्प्रभावश्च तत् क्षेत्रक्षेत्रज्ञयो याथात्म्यं यथा विशे
षितं तत्समासेन संक्षेपेण मे मम वाक्यतः शृणु श्रुत्वावधारये त्यर्थः ३ तत्क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं विवक्षितं स्तौति श्रोतृबुद्धिप्र
रोचनार्थं ऋषिभिर्वसिष्ठादिभिर्बहुधा बहुप्रकारं गीतं कथितं छंदोभिश्च छंदांसि ऋगादीनि तैः पृथग्विवेकेन नानाप्रका
रेण भिन्नं विवेकितं गीतं किंच ब्रह्मसूत्रपदैश्चैव ब्रह्मणः सूचकानि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते ज्ञायते ब्रह्मेति तानि पदान्युच्य

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् स च यो यत्प्रभावश्च तत्समासेन मे शृणु ३ ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः
पृथक् ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ४ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ५

दान्युच्यंते तैरेव च क्षेत्रक्षेत्रज्ञयाथात्म्यं गीतमिति अनुवर्तते आत्मेत्येवोपासीतेत्यादिभिर्हि ब्रह्मसूत्रपदैरात्मा ज्ञायते हेतुमद्भिर्यु
क्तियुक्तैर्विनिश्चितैर्न संशयरूपैर्निश्चितप्रत्ययोत्पादकैरित्यर्थः ४ स्तुत्याभिमुखीभूतायार्जुनायाह श्रीभगवानुवाच महाभू
तानि महांति च तानि भूतानि सर्वविकारव्यापकत्वाद्भूतानि च सूक्ष्माणि न स्थूलानि न स्थूलानीन्द्रियगोचरशब्देनाभिधास्यते अ
हंकारो महाभूतकारणमहंप्रत्ययलक्षणो अहंकारकारणं बुद्धिरध्यवसायलक्षणा तत्कारणमव्यक्तमेव च न व्यक्तमव्यक्तमव्या
कृतमीश्वरशक्तिर्मम माया दुरत्ययेत्युक्तम् ॥ एवशब्दः प्रकृत्यवधारणार्थः एतावत्येवाष्टधा भिन्ना प्रकृतिः चशब्दो भेदसमु
च्चयार्थः इंद्रियाणि दश श्रोत्रादीनि पंच बुद्धयुत्पादकत्वात् बुद्धींद्रियाणि वाक्पाण्यादीनि पंच कर्मनिर्वर्तकत्वात् कर्मेंद्रिया
णि तानि दश एकं च किं तन्मन एकादशं संकल्पाद्यात्मकं पंच चेंद्रियगोचराः शब्दादयो विषयास्तान्येतानि सांख्याश्चतुर्विंशति
तत्त्वान्याचक्षते ५ अथेदानीमात्मगुणा इति यानाचक्षते वैशेषिकास्तेपि क्षेत्रधर्मा एव न तु क्षेत्रज्ञस्येत्याह भगवान् ५

115/1943

इच्छा यज्जातीयं सुखात्मकं हेतुमर्थमुपलब्धवान् पूर्वं पुनस्तज्जातीयमुपलभमानस्तमादातुमिच्छति सुखहेतुरिति येयमि
च्छा तः करणधर्मो ज्ञेयत्वात् क्षेत्रमेव तथा द्वेषो यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवान् पुनस्तज्जातीयमुपलभमानस्तं द्वेष्टि
सोयं द्वेषो ज्ञेयत्वात् क्षेत्रमेव तथा सुखमनुकूलं प्रसन्नं सत्त्वात्मकं ज्ञेयत्वात् क्षेत्रमेव दुःखं प्रतिकूलात्मकं ज्ञेयत्वात् तदपि क्षेत्रं
संघातो देहेंद्रियाणां संहतिस्तस्यामभिव्यक्तांतःकरणवृत्तिस्तप्त इव लोहपिंडे अग्निरात्मचैतन्याभासरसविद्धा चेतना सा च
क्षेत्रं ज्ञेयत्वात् धृतिर्ययावसादप्राप्तानि देहेंद्रियाणि धीयंते सा च ज्ञेयत्वात् क्षेत्रं सर्वांतःकरणधर्मोपलक्षणार्थं मिच्छादिग्र
हणं यत उक्तं तदुपसंहरति एतत्क्षेत्रं समासेन सविकारं सह विकारेण महदादिनोदाहृतमुक्तं यस्य क्षेत्रभेदजातस्य संह
तिरिदं शरीरं क्षेत्रमित्युक्तं तत्क्षेत्रं व्याख्यातं ६ महाभूतादिभेदभिन्नं धृत्यंतं क्षेत्रज्ञो वक्ष्यमाणविशेषणो यस्य सप्रभावस्य
क्षेत्रज्ञस्य परिज्ञानादमृतत्वं भवति ततः ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिना सविशेषणं स्वयमेव वक्ष्यति भगवान् अधुनात

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः एतत्क्षेत्रं समासेन सविकारमुदाहृतं ६
अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ७

ज्ञानसाधनगणममानित्वादिलक्षणं यस्मिन् सति तज्ज्ञेयविज्ञाने योग्योऽधिकृतो भवति तत्परः सन्यासी ज्ञाननिष्ठ उच्यते तमम
नित्वादिगणं ज्ञानसाधनत्वात् ज्ञानशब्दवाच्यं विदधाति भगवान् अमानित्वं मानिनो भावो मानित्वमात्मनः श्लाघनं तदभावो
अमानित्वं अदंभित्वं स्वधर्मप्रकटीकरणं दंभित्वं तदभावो अदंभित्वं अहिंसा अहिंसनं प्राणिनामपीडनं क्षांतिः परापराधप्राप्ता
वविक्रिया आर्जवं ऋजुभावोऽवक्रत्वं आचार्योपासनं मोक्षसाधनोपदेष्टुराचार्यस्य शुश्रूषादिप्रयोगेण सेवनं शौचं कायम
लानां मृज्जलाभ्यां प्रक्षालनं अंतश्च मनसः प्रतिपक्षभावनया रागादिमलानामपनयः शौचं स्थैर्यं स्थिरभावो मोक्षमा
र्गे एव कृतव्यवसायित्वमात्मविनिग्रहः आत्मन उपकारकस्यात्मशब्दवाच्यस्य कार्यकारणसंघातस्य विनियहः स्व
भावेन सर्वतः प्रवृत्तस्य सन्मार्गे एव निरोध आत्मविनियहः ७ हेरंब

किंच इंद्रियार्थेषु शब्दादिषु दृष्टादृष्टेषु विषयभोगेषु विरागस्य भावो वैराग्यम् अनहंकारो हंकाराभाव एव च जन्ममृत्यु जराव्या
धि दुःखदोषानुदर्शनं जन्म च मृत्युश्च जरा च व्याधयश्च दुःखानि च तेषु जन्मादिषु दुःखांतेषु प्रत्येकं दोषानुदर्शनं तत्र जन्मनि गर्भ
र्भवासयोनिद्वारानिःसरणे दोषस्यानुदर्शनं आलोचनं तथा मृत्यो दोषानुदर्शनं तथा जरायां प्रज्ञाशक्तितेजोनिरोधदोषानु
दर्शनं परिभूतता चेति तथा व्याधिषु शिरोरोगादिषु दोषानुदर्शनं तथा दुःखेषु अध्यात्माधिभूताधिदैवनिमित्तेषु च वा दुःखमेव
च दोषो दुःखदोषस्तस्य जन्मादिषु दर्शनं दुःखं जन्म दुःखं मृत्युः दुःखं जरा दुःखं व्याधयो दुःखनिमित्तत्वात् जन्मादयो दुःखं
दुःखानि पुनः स्वरूपेणैव दुःखमित्येवं जन्मादिषु दुःखदोषानुदर्शनाद्देहेंद्रियविषयाणां भोगेषु वैराग्यमुपजायते ततः प्रत्यगा
त्मनि प्रवृत्तिः करणानामात्मदर्शनायेवं ज्ञानहेतुत्वात् ज्ञानमुच्यते जन्मादिषु दुःखदोषानुदर्शनं ८ किंच असक्तिः सक्तिः सं
गनिमित्तेषु विषयेषु प्रीतिमात्रं तदभावो असक्तिः अनभिष्वंगो अभिष्वंगाभावो अभिष्वंगो नाम सक्तिविशेष एवान्यात्मभावनालक्ष
णो यथान्यस्मिन्सुखिनि दुःखिनि वा अहमेव सुखी दुःखी च जीवति मृते वाहमेव जीवामि मरिष्यामि चेति क्वचित् पुत्रदारगृहा

इंद्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ८ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ९ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि १०

दिषु पुत्रेषु दारेषु गृहेषु आदिग्रहणादन्येष्वप्यत्यंतेष्टेषु सेदोर्वर्ग्यादिषु तच्चोभयं ज्ञानार्थत्वात् ज्ञानमुच्यते नित्यं च समचित्तत्वं तु
ल्यचित्तता क्व इष्टानिष्टोपपत्तिषु इष्टानामनिष्टानां चोपपत्तयः संप्राप्तयस्तास्विष्टानिष्टोपपत्तिषु नित्यमेव तुल्यचित्ततेष्ट
ोपपत्तिषु न हृष्यति न कुप्यति चानिष्टोपपत्तिषु तच्चैतन्नित्यं समचित्तत्वं ज्ञानं ९ किंच मयि चेश्वरे अनन्ययोगेन अपृथक्समा
धिना नान्यो भगवतो वासुदेवात्परोस्त्यतः स एव नो गतिरित्येवं निश्चिताव्यभिचारिणी बुद्धिरनन्ययोगस्तेन भजनं भक्तिर्न व्य
भिचरणशीला अव्यभिचारिणी सा च ज्ञानं विविक्तदेशसेवित्वं विविक्तः स्वभावतः संस्कारेण वाशुच्यादिभिः सर्पव्याघ्रादिभि
श्च रहितः अरण्यनदीपुलिनदेवगृहादिभिर्विविक्तो देशस्तं सेवितुं शीलमस्येति विविक्तदेशसेवी तद्भावो विविक्तदेशसेवित्वं
विविक्तेषु हि देशेषु चित्तं प्रसीदति यतस्तत आत्मादिभावना विविक्त उपजायते अतो विविक्तदेशसेवित्वं ज्ञानमुच्यते अरति
रमणं जनसंसदि जनानां प्राकृतानां संस्काररहितानां अविनीतानां संसत्समवायो जनसंसत् न संस्काररवतां विनीतानां
संसत् तस्या ज्ञानोपकारकत्वादतः प्राकृतजनसंसद्यरतिर्ज्ञानार्थत्वात् ज्ञानं १० ॥

117/1943

किंच अध्यात्मज्ञाननित्यत्वं आत्मादिविषयं ज्ञानमध्यात्मज्ञानं तस्मिन् नित्यभावो नित्यत्वममानित्वादीनां ज्ञानसाधनानां
भावनापरिपाकनिमित्तं तत्त्वज्ञानं तस्यार्थो मोक्षः संसारोपरमस्तस्यालोचनं तत्त्वज्ञानार्थदर्शनं तत्त्वज्ञानफलालोचने हि तत्सा
धनानुष्ठाने प्रवृत्तिः स्यादिति एतदमानित्वादितत्त्वज्ञानार्थदर्शनांतमुक्तं ज्ञानमिति प्रोक्तं ज्ञानार्थत्वाद् ज्ञानं यदतोस्माद्यथो
क्ताद्न्यथा विपर्ययेण मानित्वं दंभित्वं हिंसाक्षांतिरनार्जवमित्याद्यज्ञानं विज्ञेयं परिहरणाय संसारप्रवृत्तिकारणत्वादिति यथो
क्तेन ज्ञानेन ज्ञातव्यं किमित्याकांक्षायामाह ज्ञेयं यत्तदिति ननु यमा नियमाश्चामानित्वादयो न तैर्ज्ञेयं ज्ञायते न ह्यमानित्वा
दि कस्यचिद्वस्तुनः परिच्छेदकं दृष्टं सर्वत्रैव च यद्विषयं तत् ज्ञानं तदेव तस्य ज्ञेयस्य परिच्छेदकं दृश्यते न ह्यन्यविषयेण ज्ञा
नेनान्य उपलभ्यते यथा घटविषयेण ज्ञानेनाग्निर्नैष दोषः ज्ञाननिमित्तत्वाज्ज्ञानमिति ह्यवोचाम ज्ञानसहकारिकारणत्वा
च्च ११ ज्ञेयं ज्ञातव्यं यत्तत्प्रवक्ष्यामि प्रकर्षेण यथावद्वक्ष्यामि किं फलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणायाह यज्ज्ञे

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा ११
ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते १२

यं ज्ञात्वा अमृतममृतत्वमश्नुते न पुनर्म्रियत इत्यर्थः अनादिमत् न आदिरस्यास्तीति आदिमत् न आदिमदनादिमत् किं तत्प
रं निरतिशयं ब्रह्म ज्ञेयमिति प्रकृतमत्र केचिदनादिमत्परमिति पदं छिंदंति बहुव्रीहिणोक्तेर्थे मतुप आनर्थक्यमनिष्टं स्या
दित्यर्थविशेषं च दर्शयंति अहं वासुदेवाख्या परा शक्तिर्यस्य तन्मत्परमिति सत्यमेवमपुनरुक्तं स्यादर्थश्चेत्संभवति न त्वर्थः
संभवति ब्रह्मणः सर्वविशेषप्रतिषेधेनैव विजिज्ञापयिषितत्वान्न सत्तन्नासदुच्यत इति विशिष्टशक्तिमत्त्वप्रदर्शनं विशे
षप्रतिषेधश्चेति विप्रतिषिद्धं तस्मान्मतुपो बहुव्रीहिणा समानार्थत्वे अपि प्रयोगः श्लोकपूरणार्थः अमृतत्वफलं ज्ञेयं म
योच्यत इति प्ररोचनेनाभिमुखीकृत्याह न सत्तज्ज्ञेयमुच्यते नाप्यसत्तदुच्यते ननु महता कंठरवेणोद्घुष्य ज्ञेयं वक्ष्यामीत्यनु
रूपमुक्तं न सत्तन्नासदुच्यत इति न अनुरूपमेवोक्तं कथं सर्वासु ह्युपनिषत्सु ज्ञेयं ब्रह्म नेति नेत्यस्थूलमनण्वित्यादिवि
शेषप्रतिषेधेनैव निर्दिश्यते नेदं तदिति वाचो गोचरत्वात् ननु तदस्ति यद्वस्त्वस्तिशब्देन नोच्यते अथास्ति शब्देन नोच्यते
नास्ति न तज्ज्ञेयं विप्रतिषिद्धं च ज्ञेयं यदस्तिशब्देन नोच्यत इति न तावन्नास्ति नास्तिबुद्ध्यविषयत्वात् ननु सर्वा बुद्धयो

स्ति नास्ति बुध्यनुगता एव तत्रैवं सति ज्ञेयमप्यस्तिबुध्यनुगतप्रत्ययविषयं वा स्यात् नास्तिबुध्यनुगतप्रत्ययविषयं वा न त्वतींद्रियत्वे
नोभयबुध्यनुगतप्रत्ययाविषयत्वात् यद्धींद्रियगम्यं वस्तु घटादिकं तदस्तिबुध्यनुगतप्रत्ययविषयं वा स्यान्नास्तिबुध्यनुगतप्रत्यय
विषयं वा स्यात् इदं तु ज्ञेयमतींद्रियत्वेन शब्दैकप्रमाणगम्यत्वान्न घटादिवदुभयबुध्यनुगतप्रत्ययविषयमित्यतो न सत्तन्नासदु
च्यते यत्तूक्तं विरुद्धमुच्यते ज्ञेयं तन्न सत्तन्नासदुच्यत इति न विरुद्धमन्यदेव तद्विदितादथो अविदितादधीति श्रुतेः श्रुतिरपि विरु
द्धार्थेति चेद्यथा यज्ञाय शालामारभ्य को हि तद्वेद यद्यमुष्मिंल्लोकेऽस्ति वा न वेत्येवमिति चेन्न विदिताविदिताभ्यामन्यत्वश्रु
तेरवश्यविज्ञेयार्थप्रतिपादनपरत्वाद्यद्यमुष्मिन्नित्यादि तु विधिशेषोऽर्थवादः उपपत्तेश्च सदसदादिशब्दैर्ब्रह्म नोच्यत इति सर्वो हि श
ब्दोऽर्थप्रकाशनाय प्रयुक्तः श्रूयमाणश्च श्रोतृभिर्जातिक्रियागुणसंबंधद्वारेण संकेतग्रहणसव्यपेक्षोऽर्थं प्रत्याययति नान्यथा
दृष्टत्वात् यथा गौरश्व इति वा जातितः पचति पठतीति पाचकः पाठक इति वा क्रियातः शुक्लः कृष्ण इति वा गुणतो धनी गोमानिति वा
संबंधतो न तु ब्रह्म जातिमदतो न सदादिशब्दवाच्यं नापि गुणवद्येन गुणशब्देनोच्येत निर्गुणत्वान्नापि क्रियाशब्दवाच्यं निष्क्रिय

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति १३

त्वात् निष्कलं निष्क्रियं शांतमिति श्रुतेः न च संबंधि एकत्वात् अद्वयत्वादविषयत्वादात्मत्वाच्च न केनचिच्छब्देनोच्यत इति युक्तं य
तो वाचो निवर्तंत इत्यादिश्रुतिभ्यश्च सच्छब्दप्रत्ययाविषयत्वादसत्त्वाशंकायां ज्ञेयस्य सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्र
तिपादयंस्तदाशंकानिवृत्त्यर्थमाह सर्वतः पाणिपादं सर्वतः सर्वत्र पाणयः पादाश्चास्येति सर्वतः पाणिपादं तत् ज्ञेयं सर्व
प्राणिकरणोपाधिभिः क्षेत्रज्ञास्तित्वं विभाव्यते क्षेत्रज्ञश्च क्षेत्रोपाधित उच्यते क्षेत्रं च पाणिपादादिभिरनेकधा भिन्नं क्षेत्रोपा
धिभेदकृतं च विशेषजातं मिथ्यैव क्षेत्रज्ञस्येति तदपनयनेन ज्ञेयत्वमुक्तं न सत्तन्नासदुच्यत इति उपाधिकृतं मिथ्यारूपमप्यस्ति
त्वाधिगमाय ज्ञेयधर्मवत्परिकल्प्योच्यते सर्वतः पाणिपादमित्यादि तथा हि संप्रदायविदां वचनमध्यारोपापवादाभ्यां निःप्रपंचं प्रपं
च्यत इति सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादादयो ज्ञेयशक्तिसद्भावनिमित्तस्वकार्या इति ज्ञेयसद्भावे लिंगानि ज्ञेयस्ये
त्युपचारत उच्यते यथा व्याख्येयमन्यत् सर्वतः पाणिपादं तत् ज्ञेयं सर्वतोऽक्षिशिरोमुखं सर्वतोऽक्षीणि शिरांसि मुखानि च यस्य
तत्सर्वतोऽक्षिशिरोमुखं सर्वतःश्रुतिमत् श्रुतिः श्रवणेंद्रियं तद्यस्य तत् श्रुतिमत् लोके प्राणिनिकाये सर्वमावृत्य संव्याप्य ति
ष्ठति स्थितिं लभते उपाधिभूतपाणिपादादींद्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ताशंका मा भूदित्येवमर्थः १३ राम

हेरंब
५७

119/1943

श्लोकारंभः सर्वेंद्रियगुणाभासं सर्वाणि च तानींद्रियाणि श्रोत्रादीनि बुद्धींद्रियकर्मेंद्रियाख्यानि अंतःकरणे च बुद्धिमन
सी ज्ञेयोपाधित्वस्य तुल्यत्वात्सर्वेंद्रियग्रहणेन गृह्यते अपि च अंतःकरणोपाधिद्वारेणैव श्रोत्रादीनामप्युपाधित्वमित्यतोंतःक
रणबहिःकरणोपाधिभूतैः सर्वेंद्रियगुणैरध्यवसायसंकल्पश्रवणवदनादिभिरवभासत इति सर्वेंद्रियगुणाभासं सर्वेंद्रिय
व्यापारैर्व्यापृतमिव तद्ज्ञेयमित्यर्थः ध्यायतीव लेलायतीवेति श्रुतेः कस्मात्पुनः कारणात् व्यापृतमेवेति न गृह्यत इत्यत आह
सर्वेंद्रियविवर्जितं सर्वकरणरहितमित्यर्थः अतो न करणव्यापारैर्व्यापृतं तत् ज्ञेयं यस्त्वयं मंत्रोऽपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादिः स सर्वेंद्रियोपाधिगुणानुगुण्यभजनशक्तिमत् ज्ञेयमेवेति प्रदर्शनार्थो न तु साक्षादेव ज
वनादिक्रियावत्त्वप्रदर्शनार्थोऽन्धो मणिमविंददित्यादिमंत्रार्थवत्तस्य मंत्रस्यार्थो यस्मात्सर्वकरणवर्जितं तत् ज्ञेयं तस्मादस
क्तं सर्वसंश्लेषवर्जितं यद्यप्येवं तथापि सर्वभृच्चैव सदास्पदं हि सर्वं सर्वत्र सद्बुध्यनुगमात् नहि मृगतृष्णिकादयोऽपि निरास्पदाः

सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च १४
बहिरंतश्च भूतानामचरं चरमेव च सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् १५

वंत्यतः सर्वभृत् सर्वं बिभर्तीति स्यादिदं चान्यत् ज्ञेयस्य सत्त्वाधिगमद्वारं निर्गुणं सत्त्वरजस्तमांसि गुणास्तैर्वर्जितं तत् ज्ञेयं तथा
पि गुणभोक्तृ च गुणानां सत्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकारपरिणतानां भोक्तृ चोपलब्धृ तत् ज्ञेयमित्यर्थः १४
किंच बहिस्त्वक्पर्यंतं देहमात्मत्वेनाविद्याकल्पितमपेक्ष्य तमेवावधिं कृत्वा बहिरुच्यते तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृ
त्वांऽतरुच्यते बहिरंतश्चेत्युक्ते मध्येऽभावे प्राप्ते इदमुच्यते चरमचरमेव च यच्चराचरं देहाभासमपि तदेव ज्ञेयं यथा रज्जु
सर्पाभासं यद्यचरं चरमेव च स्याद्व्यवहारविषयं सर्वं ज्ञेयं किमर्थमिदमिति सर्वैर्न विज्ञेयमित्युच्यते सत्यं सर्वाभासं तथापि व्यो
मवत्सूक्ष्मम् अतः सूक्ष्मत्वात्स्वेन रूपेण तत् ज्ञेयमप्यविज्ञेयमविदुषां विदुषां त्वात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमित्यादिप्रमाणतो नित्यं
विज्ञातमविज्ञातया अत एव दूरस्थं वर्षसहस्रकोट्याप्यविदुषामप्राप्यत्वादंतिके च तदात्मत्वाद्विदुषां १५ किंच।

गी॰ भा॰ अविभक्तं च प्रतिदेहं व्योमवत्तदेकं भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं देहेष्वेव विभाव्यमानत्वात् भूतभर्तृ च भूतानि बिभ

६० र्तीति तत् ज्ञेयं भूतभर्तृ स्थितिकाले प्रलयकाले प्रसिष्णु ग्रसनशीलं उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं यथा रज्ज्वादि

सर्पादेर्मिथ्याकल्पितस्य किं च सर्वत्र विद्यमानमपि सन्नोपलभ्यते चेत् ज्ञेयं तमस्तर्हि न १६ किं च तर्हि ज्योतिषामादित्यादीना

मपि तत् ज्ञेयं ज्योतिः आत्मचैतन्याभिव्यक्तं ज्योतिः येन ज्योतिषा आदित्यादीनि दीप्यन्ते येन सूर्यस्तपति तेजसेद्धः तस्य भासा सर्वमिदं विभातीत्या

दिश्रुतिभ्यः स्मृतेश्चैवं यदादित्यगतं तेज इत्यादेस्तमसोऽज्ञानात्परम् अस्पृष्टमुच्यते ज्ञानादेर्दुःसंपादनबुद्ध्या प्राप्तावसादनस्यो

त्तंभनार्थमाह ज्ञानममानित्वादि ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिनोक्तं ज्ञानगम्यं ज्ञेयमेव ज्ञानं सत्त्वज्ञानफलमिति ज्ञानगम्यमुच्य

ते ज्ञायमानं तु ज्ञेयं तदेतत्त्रयमपि हृदि बुद्धौ सर्वस्य प्राणिजातस्य विशेषेण स्थितं १७ तत्र यदि त्रयं विभाव्यते यथोक्ता

र्थोपसंहारार्थोऽयं श्लोक आरभ्यते इत्येवं क्षेत्रं महाभूतादि धृत्यन्तं तथा ज्ञानममानित्वादि तत्त्वज्ञानार्थदर्शनपर्यन्तं ज्ञेयं च ज्ञेयं य

त्तदित्यादि तमसः परमुच्यत इत्येवमन्तमुक्तं समासतः संक्षेपतः एतावान्हि सर्वो वेदार्थो गीतार्थश्चोपसंहृत्योक्तोऽस्मिन्नुप स

> अविभक्तं च भूतेषु विभक्तमिव च स्थितं भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च १६ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते
>
> ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं १७ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते १८
>
> प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ॥

म्यग्दर्शनं केनाधिक्रियत इत्युच्यते मद्भक्तो मयीश्वरे सर्वज्ञे च परमगुरौ वासुदेवे समर्पितसर्वात्मभावो यत्पश्यति शृणोति स्पृ

शति वा सर्वमेव भगवान्वासुदेव इत्येवं ग्रहाविष्टबुद्धिर्मद्भक्तः स नू एतद्यथोक्तं सम्यग्दर्शनं विज्ञाय मद्भावाय मम भावो मद्भावः

परमात्मभावस्तस्मै मद्भावायोपपद्यते मोक्षं गच्छति १८ तत्र सप्तमे ईश्वरस्य द्वे प्रकृती उपन्यस्ते परापरे क्षेत्रक्षेत्रज्ञलक्षणे एतद्यो   हेरंब

नीनि भूतानीति चोक्तं क्षेत्रक्षेत्रज्ञप्रकृतिद्वययोनित्वं कथं भूतानामित्ययमर्थोऽधुनोच्यते प्रकृतिं पुरुषं चैवेश्वरस्य प्रकृती तौ प्र

कृतीपुरुषावुभावप्यनादी विद्धि न विद्यते आदिर्ययोस्तावनादी नित्येश्वरत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुं   ६०

प्रकृतिद्वयवत्त्वमेव हीश्वरस्येश्वरत्वं याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुस्ते द्वे अनादी सत्यौ संसारस्य कारणं

भवतः न आदी अनादी इति तत्पुरुषसमासं केचिद्वर्णयन्ति तेन हि केवलेश्वरस्य कारणत्वं सिध्यति यदि पुनः प्रकृतिपुरुषावेव नि

121/1943

त्यौ स्यातां तत्कृतमेव जगन्नेश्वरस्य जगत्कर्तृत्वमिति तदसत् प्राक्प्रकृतिपुरुषयोरुत्पत्तेरीशितव्याभावादीश्वरस्यानीश्वरत्व

प्रसंगात् संसारस्य वा निर्निमित्तत्वे निर्मोक्षत्वप्रसंगात् शास्त्रानर्थक्यप्रसंगाद्बन्धमोक्षाभावप्रसंगाच्च नित्यत्वे पुनरीश्वरप्रकृत्योः सर्व

मेतदुपपन्नं भवेत् कथं विकारांश्च गुणांश्चैव वक्ष्यमाणान्बुद्ध्यादिदेहेंद्रियपर्यन्तान् गुणांश्च सुखदुःखमोहप्रत्ययाकारपरिणतान्

विकारांश्च गुणांश्चैव वक्ष्यमाणान्विद्धि विजानीहि प्रकृतिसंभवान् प्रकृतिरीश्वरस्य विकारकारणशक्तिः त्रिगुणात्मिका माया सा स

म्भवो येषां विकाराणां गुणानां च तान्विकारान्गुणांश्चैव विद्धि प्रकृतिसंभवान् प्रकृतिपरिणामान् १९ के पुनस्ते विकारा गुणाश्च

प्रकृत्यासंभवा इत्याह कार्यकारणकर्तृत्वे कार्यं शरीरं करणानि तत्स्थानि त्रयोदश देहस्यारंभकाणि भूतानि विषयाश्च प्रकृतिसं

भवा विकाराः पूर्वोक्ता इह कार्यग्रहणेन गृह्यन्ते गुणाश्च प्रकृतिसंभवाः सुखदुःखमोहात्मकाः करणाश्रयत्वात्करणग्रहणेन

गृह्यन्ते तेषां कार्यकरणानां कर्तृत्वमुत्पादकत्वं यत्तत्कार्यकरणकर्तृत्वं तस्मिन्कार्यकरणकर्तृत्वे हेतुः कारणमारंभकत्वेन प्रकृति

रुच्यते एवं कार्यकरणकर्तृत्वेन संसारस्य कारणं प्रकृतिः कार्यकारणकर्तृत्व इत्यस्मिन्नपि पाठे कार्यं यत्तद्यस्य विपरिणामस्तत्त

> विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् १९ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते २०

स्य कार्यं विकारो विकारि कारणं तयोर्विकारविकारिणोः कार्यकारणयोः कर्तृत्व इति तान्येव कार्यकारणान्युच्यन्ते अथवा षोडश वि

काराः कार्यं सप्त प्रकृतिविकृतयः कारणं तेषां कर्तृत्वे हेतुः प्रकृतिरुच्यते आरंभकत्वेनैव पुरुषस्य संसारस्य कारणं यथा स्यात्तदु

च्यते पुरुषो जीवः क्षेत्रज्ञो भोक्तेति पर्यायाः सुखदुःखानां भोग्यानां भोक्तृत्व उपलब्धृत्वे हेतुरुच्यते कथं पुनरनेन कार्यकरणकर्तृ

त्वेन सुखदुःखभोक्तृत्वेन च प्रकृतिपुरुषयोः संसारकारणत्वमुच्यत इति अत्रोच्यते कार्यकारणसुखदुःखरूपेण हेतुफलात्मना

प्रकृतेः परिणामाभावे पुरुषस्य च चेतनस्यासति तदुपलब्धृत्वे कुतः संसारस्यात्यदा पुनः कार्यकारणरूपेण हेतुफलात्मना परि

णतया प्रकृत्या भोग्यया पुरुषस्य तद्विपरीतस्य भोक्तृत्वेनाविद्यारूपः संयोगः स्यात्तदा संसारः स्यादिति अतो यत्प्रकृतिपुरुष

योः कार्यकरणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च संसारकारणत्वमुक्तं तद्युक्तं कः पुनरयं संसारो नाम सुखदुःखसंभोगः

संसारः पुरुषस्य च सुखदुःखानां संभोक्तृत्वं संसारित्वमिति २० ॥

यत्पुरुषस्य सुखदुःखानां भोक्तृत्वं संसारित्वमित्युक्तं तस्य तत्किं निमित्तमित्युच्यते पुरुषो भोक्ता प्रकृतिस्थः प्रकृतावविद्यालक्ष
णायां कार्यकारणरूपेण परिणतायां स्थितः प्रकृतिस्थः प्रकृतिमात्मत्वेन गत इत्येतत् हि यस्मात्तस्माद्भुंक्ते उपलभत इत्यर्थः प्रकृ
 तिजान् प्रकृतितो जातान् सुखदुःखमोहाकाराभिव्यक्तान् गुणान् सुखी दुःखी मूढः पंडितोहमित्येवं सत्यामप्यविद्यायां सुख
दुःखमोहेषु गुणेषु भुज्यमानेषु यः संग आत्मभावः संसारस्य स प्रधानकारणमस्य पुरुषस्य जन्मनः स यथाकामो भवति तत्क्र
तुर्भवतीत्यादिश्रुतेः तदेतदाह कारणं हेतुर्गुणसंगोस्य पुरुषस्य भोक्तुः सदसद्योनिजन्मसु सत्यश्चासत्यश्च सदसत्यस्ता योनयः स
दसद्योनयस्तासु सदसद्योनिषु जन्मानि सदसद्योनिजन्मानि तेषु सदसद्योनिजन्मसु विषयभूतेषु निमित्तं कारणं गुणसंगोथ
वा सदसद्योनिजन्मसु अस्य संसारस्य कारणं गुणसंग इति संसारपदमध्याहार्यं सद्योनयो देवादियोनयः असद्योनयः पश्वा
दियोनयः सामर्थ्यात्सदसद्योनयोपि मनुष्ययोनयो वाद अवरुध्या द्रष्टव्याः एतदुक्तं भवति २१ प्रकृतिस्थत्वाख्या अविद्या गुणेषु
च संगः कामः संसारस्य कारणमिति तच्च परिवर्जनायोच्यते अस्य च निवृत्तिकारणं ज्ञानवैराग्ये ससंन्यासे गीताशास्त्रे प्रसि

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् कारणं गुणसंगोस्य सदसद्योनिजन्मसु २१
परद्रष्टानुमंता च भर्ता भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषः परः २२

द्धं तच्च ज्ञानं पुरस्तादुपन्यस्तं क्षेत्रक्षेत्रज्ञविषयं यज्ज्ञात्वामृतमश्नुत इत्युक्तं चान्यायोहेनातद्धर्माध्यारोपणेन च तस्यैव पुनः
साक्षान्निर्देशः क्रियते उपद्रष्टा समीपस्थः सन्द्रष्टा स्वयमव्यापृतो यथा ऋत्विक्षु यजमानेषु यज्ञकर्मव्यापृतेषु तटस्थोन्यो व्या
पृतो यज्ञविद्याकुशलः ऋत्विग्यजमानव्यापारगुणदोषाणामीक्षिता तद्वत्कार्यकरणव्यापारेष्वव्यापृतोन्यो विलक्षणस्तेषां
कार्यकरणानां सव्यापाराणां सामीप्येन द्रष्टा उपद्रष्टा अथवा देहचक्षुर्मनोबुद्ध्यात्मानो द्रष्टारस्तेषां बाह्यो द्रष्टा देहस्तत आरभ्यां
तरतमश्च प्रत्यक्समीप आत्मा द्रष्टा यतः परो नान्तरतमोस्ति द्रष्टा सोतिशयसामीप्येन द्रष्टृत्वादुपद्रष्टा स्यात् यज्ञोपद्रष्टृवद्वा
सर्वविषयीकरणादुपद्रष्टा अनुमंता च अनुमोदनमनुमननं कुर्वत्सु तत्क्रियासु परितोषस्तत्कर्तानुमंता अथवा अनुमंता का
र्यकरणप्रवृत्तिषु स्वयमप्रवृत्तोपि प्रवृत्त इव तदनुकूलो विभाव्यते तेनानुमंता अथवा प्रवृत्तान्स्वव्यापारेषु तत्साक्षिभूतः कदा
चिदपि न निवारयतीत्यनुमंता भर्ता भरणं नाम देहेंद्रियमनोबुद्धीनां संहतानां चैतन्यात्मपारार्थ्येन निमित्तभूतेन चैतन्याभा
सानां यत्स्वरूपधारणं तच्चैतन्यात्मकृतमेवेति भर्तात्मोच्यते भोक्ताग्न्युष्णवन्नित्यचैतन्यस्वरूपेण बुद्धेः सुखदुःखमोह

123
194³

त्मकाः प्रत्ययाः सर्वविषयाश्चैतन्यात्मग्रस्ता इव जायमाना अविभक्ता विभाव्यंत इति भोक्तात्मोच्यते महेश्वरः सर्वात्मत्वात्स्वतं
त्रत्वाच्च महानीश्वरश्चेति महेश्वरः परमात्मा देहादीनां बुद्ध्यंतानां प्रत्यगात्मत्वेन कल्पितानामविद्यया परम उपद्रष्टृत्वा
दिलक्षण आत्मेति परमात्मा सोतः परमात्मेत्यनेन शब्देन चाप्युक्तः कथितः श्रुतौ क्वासौ अस्मिन्देहे पुरुषः परोव्यक्तादुत्तमः पुरुष
स्त्वन्यः परमात्मेत्युदाहृत इति यो वक्ष्यमाणः क्षेत्रज्ञं चापि मां विद्धीत्युपन्यस्तो व्याख्यायोपसंहृतश्च २२ तमेवं यथोक्तलक्षण
मात्मानं य एवं यथोक्तप्रकारेण वेत्ति पुरुषं साक्षादहमिति प्रकृतिं च यथोक्तामविद्यालक्षणां गुणैः स्वविकारैः सह निवर्तितामभाव
मापादितां विद्यया सर्वथा सर्वप्रकारेण वर्तमानोपि स भूयः पुनः पतितेस्मिन्विद्वच्छरीरे देहांतराय नाभिजायते नोत्पद्यते देहांतरं
न गृह्णातीत्यर्थः अपिशब्दात्किमु वक्तव्यं स्ववृत्तस्थो न जायत इत्यभिप्रायः ननु यद्यपि ज्ञानोत्पत्त्यनंतरं पुनर्जन्माभाव उक्तस्तथा
पि प्राक् ज्ञानोत्पत्तेः कृतानां कर्मणामुत्तरकालभाविनां च यानि चातिक्रांतानेकजन्मकृतानि च तेषां च फलमदत्वा नाशो न युक्त इति
स्यात्त्रीणि जन्मानि कृतविप्रणाशो हि न युक्त इति यथा फले प्रवृत्तानामारब्धजन्मनां कर्मणां न च कर्मणां च विशेषो वगम्यते तस्मात्त्रि

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्तमानोपि न स भूयोभिजायते २३

प्रकाराण्यपि कर्माणि त्रीणि जन्मान्यारभेरन् संहतानि वा सर्वाण्येकं जन्मारभेरन् अन्यथा कृतविप्रणाशे सर्वत्रानाश्वासप्रसंगः
शास्त्रानर्थक्यं च स्यादित्यत इदमयुक्तमुक्तं न स भूयोभिजायत इति न क्षीयंते चास्य कर्माणि ब्रह्मवेद ब्रह्मैव भवति तस्य तावदेव चि
रमिषीकातूलवत्सर्वाणि कर्माणि प्रदूयंत इत्यादिश्रुतिशतेभ्यः उक्तो विदुषः सर्वकर्मदाहः इहापि चोक्तो यथैधांसि इत्यादिना सर्व
कर्मदाहो वक्ष्यति चोपपत्तेश्च अविद्याकामक्लेशबीजनिमित्तानि हि कर्माणि जन्मांतरांकुरमारभंते इहापि च साहंकाराभिसंधीनि क
र्माणि फलारंभकाणि नेतराणीति तत्र तत्र भगवतोक्तं बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संप
द्यते पुनरिति च अस्तु तावत् ज्ञानोत्पत्त्युत्तरकालकृतानां कर्मणां ज्ञानेन दाहो ज्ञानसहभावित्वात् इह जन्मनि ज्ञानोत्पत्तेः प्राक्कृ
तानां कर्मणामतीतानेकजन्मांतरकृतानां च दाहो युक्तो न सर्वकर्माणीति विशेषणात् ज्ञानोत्तरकालभाविनामेव सर्वकर्मणामिति
चेन्न संकोचकारणानुपपत्तेः यच्चोक्तं यथा वर्तमानजन्मारंभकाणि कर्माणि न क्षीयंते फलदानाय प्रवृत्तान्येव सत्यपि ज्ञाने तथा ऽ
नारब्धफलानामपि कर्मणां क्षयो न युक्त इति तदसत् कथं तेषां मुक्तेषुवत्प्रवृत्तफलत्वात् यथा पूर्वं लक्ष्यवेधाय मुक्त इषुर्धनुषो लक्ष्यवे

गी॰ भा॰ ध्योत्तरकालमप्यारब्धवेगक्षयात्पातान्निवर्तते एवं शरीरारंभकं कर्म शरीरस्थितिप्रयोजनेति। कृतेपि आत्मज्ञाने संस्कारवेगक्षयात् पूर्व
वद्वर्तत एव स एवं तेषां प्रवृत्तिनिमित्तनिवृत्तौ अनारब्धवेगस्य मुक्तो धनुषि प्रवृत्तेकोप्युपसंह्रीयते तथानारब्धफलानि कर्माणि स्वा
६२ श्रयस्थान्येव ज्ञानेन निर्दग्धानीति क्षियं तद्वृत्तिपतितेस्मिन् विद्वच्छरीरे न स भूयोभिजायत इति युक्तमेवोक्तमिति सिद्धं २३ अत्रात्मदर्शने
उपायविकल्पा इमे ध्यानादय उच्यंते ध्यानेन ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनस्युपसंहृत्य मनश्च प्रत्यक्
चेतयितर्येकाग्रतया यत् चिंतनं तत् ध्यानं तथा ध्यायतीव बको ध्यायतीव पृथिवी ध्यायंतीव पर्वता इत्युपमोपादानात् तैलधा
रावत्संततो विच्छिन्नप्रत्ययो ध्यानं तेन ध्यानेनात्मनि बुद्धौ पश्यंत्यात्मानं प्रत्यक्चेतनमात्मना ध्यानसंस्कृतेनांतःकरणेन केचिद्यो
गिनोन्ये सांख्येन योगेन सांख्यं नाम इमे सत्वरजस्तमांसि गुणा मया दृश्या अहं तेभ्योन्यस्तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आ
त्मेति चिंतनमेष सांख्यो योगस्तेन पश्यंत्यात्मानमात्मनेति अनुवर्तते कर्मयोगेन च कर्मैव योग ईश्वरार्पणबुद्ध्यानुष्ठीयमानं योगार्थत्वा
द्योग उच्यते गुणतस्तेन सत्वशुद्धिज्ञानोत्पत्तिद्वारेण चापरे २४ अन्ये त्वेषु विकल्पेष्वन्यतरेणाप्येवं यथोक्तमात्मानमजानंतो

ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना अन्ये सांख्येन योगेन कर्मयोगेन चापरे २४ अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते
तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः २५ यावत्संजायते किंचित्सत्वं स्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ २६

न्येभ्य आचार्येभ्यः श्रुत्वा इदमेवं चिंतयतेत्युक्ता उपासते श्रद्दधानाः संतश्चिंतयंतीति तेपि चातितरंत्येवातिक्रामंत्येव मृत्युं मृत्युयुक्तं संसार
मित्येतत् श्रुतिपरायणाः श्रुतिः श्रवणं परमयनं गमनं मोक्षमार्गप्रवृत्तौ परं साधनं येषां ते श्रुतिपरायणाः केवलपरोपदेशप्र
माणाः स्वयं विवेकरहिता इत्यभिप्रायः किमु वक्तव्यं प्रमाणं प्रति स्वतंत्रा विवेकिनो मृत्युमतितरंतीत्यभिप्रायः २५ क्षेत्रज्ञेश्वरैक
त्वविषयं ज्ञानं मोक्षसाधनं यत्तज्ज्ञात्वामृतमश्नुत इत्युक्तं तत्कस्माद्धेतोरिति तद्धेतुप्रदर्शनार्थं श्लोक आरभ्यते यस्मात् यावद्यत्
किंचित्संजायते समुत्पद्यते सत्वं वस्तु किमविशेषेण नेत्याह स्थावरजंगमं स्थावरं जंगमं च क्षेत्रक्षेत्रज्ञसंयोगात्तज्जायत इत्येवं विद्धि
जानीहि हे भरतर्षभ कः पुनरयं क्षेत्रक्षेत्रज्ञयोः संयोगोभिप्रेतो न तावद्रज्ज्वेव घटस्यावयवसंश्लेषद्वारकः संबंधविशेषः संयोगः क्षे
त्रेण क्षेत्रज्ञस्य संभवति आकाशवन्निरवयवत्वात् नापि समवायलक्षणः क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमादि
त्युच्यते क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेका ६२
भावनिबंधनो रज्जुशुक्तिकादीनां तद्विवेकविज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत् सोयमध्यासरूपः क्षेत्रक्षेत्रज्ञ

125/1943

योः संयोगो मिथ्याज्ञानलक्षणो यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्राक्प्रदर्शितरूपात्क्षेत्रान्मुंजादिवेषीकां य
थोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य न सत्तन्नासदुच्यत इत्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्म स्वरूपेण यः पश्यति क्षेत्रं च माया
निर्मितहस्तिस्वप्नदृष्टवस्तुगंधर्वनगरादिवदसदेव सदिवावभासत इत्येवं विनिश्चितविज्ञानो यस्तस्य यथोक्तसम्यक्दर्शनवि
रोधादपगच्छति मिथ्याज्ञानं तस्य जन्महेतोरपगमात् य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सहेत्यनेन विद्वान्भूयो नाभिजायत इति य
दुक्तं तदुपपन्नमुक्तं न स भूयोभिजायत इति सम्यक्दर्शनफलमविद्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभाव उक्तो जन्मकारणं
चाविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोग उक्तः २६ अतस्तस्या अविद्याया निवर्तकं सम्यक्दर्शनमुक्तमपि पुनः शब्दांतरे
णोच्यते समं सर्वेष्वित्यादिना समं निर्विशेषं तिष्ठंतं स्थितिं कुर्वंतं क्व सर्वेषु समस्तेषु भूतेषु ब्रह्मादिस्थावरांतेषु प्राणिषु कं पर
मेश्वरं देहेंद्रियमनोबुद्ध्यव्यक्तात्मनोपेक्ष्य परमश्चासावीश्वरश्चेशनशील इति परमेश्वरस्तं च सर्वेषु भूतेषु समं तिष्ठंतं

समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति २७

नि विशिनष्टि विनश्यत्स्विति एवं परमेश्वरमविनश्यंतमिति भूतानां परमेश्वरस्य चात्यंतवैलक्षण्यप्रदर्शनार्थं कथं सर्वेषां हि भा
वविकाराणां जनिलक्षणो भावविकारो मूलं जन्मोत्तरकालभाविनोन्ये सर्वे भावविकारा विनाशांता विनाशात्परो न कश्चिद
स्ति भावविकारः भावाभावात् सति धर्मिणि धर्मा भवंत्यतोंत्यभावविकाराभावानुवादेन पूर्वभाविनः सर्वे भावविकाराः प्र
तिषिद्धा भवंति सह कार्यैस्तस्मात् सर्वभूतैर्वैलक्षण्यमत्यंतमेव परमेश्वरस्य सिद्धं निर्विशेषत्वमेकत्वं च य एवं यथोक्तं
परमेश्वरं पश्यति स पश्यति ननु सर्वोपि लोकः पश्यति किं विशेषणेनेति सत्यं पश्यति किंतु विपरीतं पश्यत्यतो विशिनष्टि स
एव पश्यतीति यथा तिमिरदृष्टिरनेकं चंद्रं पश्यति तमपेक्ष्यैकचंद्रदर्शी विशिष्यते स एव पश्यतीति तथेहाप्येकमविभक्तं य
थोक्तमात्मानं यः पश्यति स विभक्तानेकात्मविपरीतदर्शिभ्यो विशिष्यते स एव पश्यतीति इतरे पश्यंतोपि न पश्यंति
विपरीतदर्शित्वादनेकचंद्रदर्शिवदित्यर्थः २७ ॥ ॥ ॥

गी॰ शं॰ भा॰ यथोक्तस्य सम्यक्दर्शनस्य फलवचनेन स्तुतिः कर्तव्येति श्लोक आरभ्यते समं पश्यन् उपलभमानो हि यस्मात्सर्वत्र सर्वभूतेषु स
मवस्थितं तुल्यतयावस्थितमीश्वरमतीतानंतरश्लोकोक्तलक्षणमित्यर्थः समं पश्यन् किं न हिनस्ति हिनस्ति हिंसां न करोति आत्म
६३ नात्मनैव स्वमात्मानं ततो न हिनस्त्यात्मना यो भवति हिंसनात् परां प्रकृष्टां गतिं मोक्षाख्यां ननु नैव कश्चित्प्राणी स्वयं स्वात्मानं हिनस्ति कथमुच्य
ते अप्राप्तं न हिनस्तीति यथा न पृथिव्यामग्निश्चेतव्यो नांतरिक्षे इत्यादि नैष दोषः अज्ञानात्मनिरस्करणोपपत्तेः सर्वो ह्यज्ञोऽत्यंतप्र
सिद्धं साक्षादपरोक्षादात्मानं तिरस्कृत्य नात्मानमात्मत्वेन परिगृह्य तमपि धर्माधर्मौ कृत्वोपात्तमात्मानं हत्वान्यमात्मानमुपा
दत्ते नवं तं चैवं हत्वा अन्यमेवं तमपि हित्वा अन्यमित्येवमुपात्तमुपात्तमात्मानं हंतीत्यात्महा सर्वोऽज्ञः यस्तु परमार्थात्मा असाव
पि सर्वदाविद्यया हत एव विद्यमानफलाभावादिति सर्वे आत्महन एवाविद्वांसः अयं त्वितरो यथोक्तात्मदर्शी स उभयथा
प्यात्मनात्मानं न हिनस्ति ततो याति परां गतिं यथोक्तं फलं तस्य भवतीत्यर्थः २८ सर्वभूतस्थमीशं समं पश्यन्न हिनस्त्यात्मना

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरं न हिनस्त्यात्मनात्मानं ततो याति परां गतिं २८ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्व
शः यः पश्यति तथात्मानमकर्तारं स पश्यति २९ यदा भूतपृथग्भावमेकस्थमनुपश्यति तत एव च विस्तारं ब्रह्म संपद्यते तदा ३०

त्मा न भिद्यत इति तदनुपपन्नं स्वगुणकर्मवैलक्षण्यभेदभिन्नेष्वात्मस्वित्येवदाशंक्याह प्रकृत्या प्रकृतिर्भगवतो माया त्रिगुणात्मिका
मायां तु प्रकृतिं विद्यादिति मंत्रवर्णात्तया प्रकृत्यैव च नान्येन महदादिकार्यकारणाकारपरिणतया तानि च कर्माणि वाङ्मनःका
यारभ्याणि क्रियमाणानि निर्वर्त्यमानानि सर्वशः सर्वप्रकारैः यः पश्यत्युपलभते तथात्मानं क्षेत्रज्ञमकर्तारं सर्वोपाधिवर्जितं
स पश्यति स परमार्थदर्शीत्यभिप्रायः निर्गुणस्याकर्तुर्निर्विशेषस्याकाशस्येव भेदे प्रमाणानुपपत्तिरित्यर्थः २९ पुनरपि
तदेव सम्यक्दर्शनं शब्दांतरेण प्रपंच्यते यदा यस्मिन्काले भूतपृथग्भावं भूतानां पृथग्भावं पृथक्त्वमेकस्मिन्नात्मनि
स्थितमेकस्थमनुपश्यति शास्त्राचार्योपदेशतो मत्वात्मप्रत्यक्षेण पश्यत्यात्मैवेदं सर्वमिति तत एव च तस्मादेव च
विस्तारमुत्पत्तिं सविकाशमात्मनः प्राण आत्मन आशा आत्मनः स्मर आत्मन आकाश आत्मनस्तेज आत्मन आप आत्मन आविर्भावति
रोभावावात्मतोऽन्नमित्येवमादिप्रकारैर्विस्तारं यदा पश्यति ब्रह्म संपद्यते ब्रह्मैव भवति तदा तस्मिन्काल इत्यर्थः ३०

हेरंब ६३

127
1942

एकस्यात्मनः सर्वदेहात्मत्वे तद्दोषसंबंधे प्राप्ते इदमुच्यते अनादित्वादनादेर्भावोऽनादित्वमादिः कारणं तद्यस्य नास्ति सोऽना
दिर्यद्ध्यादिमत्तत्स्वेनात्मना व्येति अयं त्वनादित्वान्निरवयव इति कृत्वा न व्येति तथा निर्गुणत्वात्सगुणो हि गुणव्ययादात्मव्ययं तु निर्गु
णत्वाच्च न व्येतीति परमात्मायमव्ययो नास्य व्ययो विद्यत इत्यव्ययो यत एवमतः शरीरस्थोऽपि शरीरेष्वात्मन उपलब्धिर्भवतीति
शरीरस्थ उच्यते तथापि न करोति तदकरणादेव तत्फलेन न लिप्यते यो हि कर्ता स कर्मफलेन लिप्यते अयं त्वकर्तातो न फलेन लिप्य
त इत्यर्थः कः पुनर्देहेषु करोति लिप्यते च यदि तावदन्यः परमात्मनो देही करोति लिप्यते च ततः इदमनुपपन्नमुक्तं क्षेत्रज्ञेश्वरयोरे
कत्वं क्षेत्रज्ञं चापि मां विद्धीत्यादिना अथ नास्तीश्वरादन्यो देही कः करोति लिप्यते च इति वाच्यं परो वा नास्तीति सर्वथा दुर्विज्ञेयं दु
र्वाच्यं चेति भगवता प्रोक्तमौपनिषदं दर्शनं परित्यक्तं वैशेषिकैः सांख्यार्हतबौद्धैश्च तत्रायं परिहारो भगवतास्वेनैवोक्तः स्वभावस्तु
प्रवर्तत इत्यविद्यामात्रस्वभावो हि करोति लिप्यते चेति व्यवहारो भवति न तु परमार्थत एकस्मिन्परमात्मनि तदस्तीत्यत एतस्मि
परमार्थसांख्यदर्शने स्थितानां ज्ञाननिष्ठानां परमहंसपरिव्राजकानां तिरस्कृताविद्याव्यवहाराणां कर्माधिकारो नास्तीति तत्र तत्र प्र

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ३१ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलि
प्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ३२ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति
भारत ३३ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं ३४ त्रयोदशोऽध्यायः १३

र्शितं भगवता ३१ किमिव न करोति न लिप्यत इत्यत्र दृष्टांतमाह यथा सर्वगतं व्याप्यपि सत् सौक्ष्म्यात्सूक्ष्मभावादाकाशं खं नोपलिप्य
ते न संबध्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ३२ किं च यथा प्रकाशयति अवभासयति एकः कृत्स्नं लोकमिमं रविः सविता
आदित्यस्तथा महाभूतादि धृत्यंतं क्षेत्रमेकः सन् प्रकाशयति कः क्षेत्री परमात्मेत्यर्थः ३३ रविदृष्टांतोऽत्रा
त्मन उभयार्थोऽपि भवति रविवत्सर्वक्षेत्रेष्वेक आत्मा अलेपकश्चेति समस्ताध्यायार्थोपसंहारार्थः श्लोकः क्षेत्रक्षेत्रज्ञयोर्यथाव्या
ख्यातयोरेवं यथाप्रदर्शितप्रकारेणांतरमितरेतरवैलक्षण्यविशेषं ज्ञानचक्षुषा शास्त्राचार्यप्रसादोपदेशजनितमात्मप्रत्य
यिकं ज्ञानं चक्षुस्तेन ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च भूतानां प्रकृतिरविद्यालक्षणाव्यक्ताख्या तस्या भूतप्रकृतेर्मोक्षणमभाव
गमनं च ये विदुर्विजानंति यांति गच्छंति ते परं परमार्थतत्त्वं ब्रह्म न पुनर्देहमाददत इत्यर्थः ३४ इति श्रीमत्परमहंसपरिव्राज
काचार्य श्रीशंकरभगवता कृतौ क्षेत्रक्षेत्रज्ञयोगो नाम त्रयोदशोऽध्यायः १३ श्रीरामसीतापती भगवान् गोपालकृष्ण

गी॰ टी॰ अ॰ सर्वमुत्पद्यमानं क्षेत्रक्षेत्रज्ञसंयोगादुत्पद्यत इत्युक्तं तत्कथमिति तत्प्रदर्शनार्थं परं भूय इत्यादिरध्याय आरभ्यते अथवेश्व
रपरमेश्वरयोः क्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वं न तु सांख्यानामिव स्वतंत्रयोरित्येवमर्थं प्रकृतिस्थत्वं गुणेषु च संगः संसारकारणमि
६४ त्युक्तं कस्मिन् गुणे कथं संगः के वा गुणाः कथं ते बध्नंतीति गुणेभ्यश्च मोक्षः कथं स्यान्मुक्तस्य च लक्षणं वक्तव्यमित्येवं सर्वं च भग
वानुवाच परं ज्ञानमिति अव्यवहितेन संबंधो भूयः पुनः पूर्वेषु सर्वेष्वध्यायेषु असकृदुक्तमपि प्रवक्ष्यामि तच्च परं परवस्तुविषयत्वा
त् किं तत् ज्ञानं सर्वेषां ज्ञानानामुत्तममुत्तमफलत्वात् ज्ञानानामिति नामानि यज्ञादीनां किंतर्हि यज्ञादिज्ञेयविषयाणामिति ना
तिनमोक्षायेदं तु मोक्षायेति परोत्तमशब्दाभ्यां स्तौति श्रोतृबुध्द्युत्पादनार्थं यत् ज्ञात्वा यज्ज्ञानं ज्ञात्वा प्राप्य मुनयः सन्यासि
नो मननशीलाः सर्वे परां सिद्धिं मोक्षाख्यं इतोऽस्माद्देहबंधनादूर्ध्वं गताः प्राप्ताः १ यद्यां च किंफलमित्युच्यते यस्याश्च सिध्दे
रैकांतिकत्वं दर्शयति इदं ज्ञानं यथोक्तमाश्रित्य ज्ञानसाधनमनुष्ठायेत्येतन्मम परमेश्वरस्य साधर्म्यं तत्स्वरूपतामागताः प्राप्ता इ

श्रीभगवानुवाच परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः १ इदं ज्ञानमुपा
श्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायंते प्रलये न व्यथंति च २ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं संभवः
सर्वभूतानां ततो भवति भारत ३ सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः तासां ब्रह्म महद्योनीरहं बीजप्रदः पिता ४

त्यर्थः न तु समानधर्मता साधर्म्यं क्षेत्रज्ञेश्वरयोर्भेदानभ्युपगमात् गीताशास्त्रे फलवादश्चायं स्तुत्यर्थं उच्यते सर्गेपि सर्गकाले
पि नोपजायंते नोत्पद्यंते प्रलये ब्रह्मणोपि विनाशकाले न व्यथंति च न व्यथामापद्यंते न च्यवंतीत्यर्थः २ क्षेत्रक्षेत्रज्ञसंयोग ईदृशो भू
तकारणमित्याह मम स्वभूता मदीया माया त्रिगुणात्मिका प्रकृतिर्योनिः सर्वभूतानां सर्वकार्येभ्यो महत्त्वात् भरणाच्च स्वविकारा
णां महद्ब्रह्मेति तस्मिन्योनिरेव विशिष्यते तस्मिन्महति ब्रह्मणि योनौ गर्भं हिरण्यगर्भस्य जन्मनो बीजं सर्वभूतजन्मकारणं बीजं द हेरंब
धामि निक्षिपामि क्षेत्रक्षेत्रज्ञप्रकृतिद्वयशक्तिमानीश्वरोहमविद्याकामकर्मोपाधिस्वरूपानुविधायिनं क्षेत्रज्ञं क्षेत्रेण संयोज
यामीत्यर्थः संभव उत्पत्तिः सर्वभूतानां हिरण्यगर्भोत्पत्तिद्वारेण ततस्तस्माद् गर्भाधानाद्भवति हे भारत ३ देवपितृमनुष्यपशु
मृगादिसर्वयोनिषु कौंतेय मूर्तयो देहसंस्थानलक्षणा मूर्छितांगावयवा मूर्तयः संभवंति यास्तासां मूर्तीनां ब्रह्म महत्सर्वा ६४
वस्थं योनिः कारणमहं ईश्वरो बीजप्रदो गर्भाधानस्य कर्ता पिता ४ ६७ ५

129/1943

के गुणाः कथं बध्नंतीत्युच्यते सत्त्वं रजस्तम इत्येवं नामानो गुणा इति पारिभाषिकः शब्दो न रूपादिवद्द्रव्याश्रिताः न गुणगुणि
नोरन्यत्वमत्र विवक्षितं तस्माद्गुणा इव नित्यपरतंत्राः क्षेत्रज्ञं प्रत्यविद्यात्मकत्वात् क्षेत्रज्ञं निबध्नंतीव तमास्पदीकृत्यात्मानं प्रतिल
भंत इति निबध्नंतीत्युच्यते ते च प्रकृतिसंभवा भगवन्मायासंभवाः निबध्नंतीव हे महाबाहो महांतौ समर्थतरौ आजानुप्रलंबौ बा
हू यस्य स महाबाहुः हे महाबाहो देहे शरीरे देहिनं देहवंतमव्ययं अव्ययत्वं चोक्तमनादित्वादित्यादिश्लोकेन ५ ननु देही न लि
प्यत इत्युक्तं तत्कथमिह निबध्नंतीत्यन्यथोच्यते परिहृतमस्माभिरिवशब्देन निबध्नंतीवेति तत्र सत्त्वादीनां सत्त्वस्यैव तावल्लक्ष
णमुच्यते निर्मलत्वात् स्फटिकमणिरिव प्रकाशकमनामयं निरुपद्रवं सत्त्वं निबध्नाति कथं सुखसंगेन सुख्यहमिति विषयभूतस्य
सुखस्य विषयिण्यात्मनि संश्लेषापादनं मृषैव सुखे संजननं सैषा अविद्या न हि विषयधर्मो विषयिणो भ
वति इच्छादि च धृत्यंतं क्षेत्रस्यैव विषयस्य धर्म इत्युक्तं भगवता अतो अविद्ययैव स्वकीयधर्मभूतया विषयविषय्यविवेकलक्षण
यास्वात्मभूते सुखे संजयतीव सक्तमिव करोत्यसुखिनं सुखिनमिव तथा ज्ञानसंगेन च ज्ञानमिति सुखसाहचर्यात् क्षेत्रस्यैव

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः निबध्नंति महाबाहो देहे देहिनमव्ययं ५ तत्र सत्त्वं निर्मलत्वात्प्रकाशकमना
मयं सुखसंगेन बध्नाति ज्ञानसंगेन चानघ ६ रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं तन्निबध्नाति कौंतेय कर्मसंगेन
देहिनं ७ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ८ सत्त्वं सुखे संजय
ति रजः कर्मणि भारत ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ९ ॥ ५

पयस्यांतःकरणस्य धर्मो नात्मनः आत्मधर्मत्वे संगानुपपत्तेर्बंधानुपपत्तेश्च सुखस्येव ज्ञानादेः संगो मंतव्यः अनघ अव्यसन भगवा
६ रजो रागात्मकं रंजनात् रागो गैरिकादिवद्रागात्मकं विद्धि तृष्णासंगसमुद्भवं तृष्णा अप्राप्ताभिलाषः आसंगः प्राप्ते विषये मन
सः प्रीतिलक्षणः संश्लेषः तृष्णासंगसमुद्भवं तृष्णासंगयोः समुद्भवं तृष्णासंगसमुद्भवं तं निबध्नाति तद्रजः कौंतेय कर्मसंगेन दृष्टादृ
ष्टार्थेषु कर्मसु संजननं तत्परता कर्मसंगस्तेन बध्नाति रजो देहिनं ७ तमस्तृतीयो गुणोऽज्ञानजं अज्ञानात् जातं अज्ञानजं विद्धि मो
हनं मोहकरमविवेककरमविवेककरं सर्वदेहिनां सर्वेषां देहवतां प्रमादालस्यनिद्राभिः प्रमादश्चालस्यं च निद्रा च प्रमादालस्यनि
द्रास्ताभिः प्रमादालस्यनिद्राभिस्तत्तमो निबध्नाति भारत ८ पुनर्गुणानां व्यापारः संक्षेपत उच्यते सत्त्वं सुखे संजयति संश्लेषयति
रजः कर्मणि भारत संजयतीतिवर्तते ज्ञानं सत्त्वकृतं विवेकमावृत्य आच्छाद्य तु तमः स्वेनावरणात्मना प्रमादे संजयत्युत प्रमादः प्राप्तकर्तव्याकर
णं ९

उक्तं कार्यं कदा कुर्वंति गुणा इत्युच्यते रजस्तमश्चोभावपि अभिभूय सत्वं भवत्युद्भवति वर्धते यदा तदा लब्धात्मकं सत्वं स्वकार्यं ज्ञा
नसुखाद्यारभते भारत तथा रजो गुणः सत्वं तमश्चैवोभावप्यभिभूय तथैव वर्धते यदा तदा कर्म तृष्णादि स्वकार्यमारभते तम आख्योपि
गुणः सत्वं रजश्चोभावप्यभिभूय तथैव वर्धते यदा तदा ज्ञानावरणादि स्वं कार्यमारभते २० यदा यो गुण उद्भूतो भवति तदा तस्य किं
लिंगमित्युच्यते सर्वद्वारेष्वात्मन उपलब्धिद्वाराणि श्रोत्रादीनि सर्वाणि करणानि तेषु सर्वद्वारेष्वंतःकरणस्य बुद्धेर्वृत्तिः प्रकाशो
देहेस्मिन् प्रकाश उत्पद्यते उपजायते तदेव ज्ञानं यदैवं प्रकाशो ज्ञानाख्य उपजायते तदा ज्ञानप्रकाशेन लिंगेन विद्याद्विवृद्धमुद्भू
तं सत्वमित्युतापि २१ रजस उद्भूतस्येदं चिन्हं लोभः परद्रव्यादित्सा प्रवृत्तिः प्रवर्तनं सामान्यचेष्टा आरंभः कस्य कर्मणां अशमो
नुपशमः हर्षरागादि प्रवृत्तिः स्पृहा सर्वसामान्यवस्तुविषया तृष्णा रजसि गुणे विवृद्धे एतानि लिंगानि जायंते हे भरतर्षभ
१२ अप्रकाशोविवेकोत्यंतं अप्रवृत्तिश्च प्रवृत्यभावस्तत्कार्यं प्रमादो मोह एव चाविवेको मूढतेत्यर्थः तमसि गुणे विवृद्धे एता

रजस्तमश्चाभिभूय सत्वं भवति भारत रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा १० सर्वद्वारेषु देहेस्मिन् प्रकाश उपजा
यते ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत ११ लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा रजस्येतानि जायंते विवृद्धे भर
तर्षभ १२ अप्रकाशोप्रवृत्तिश्च प्रमादो मोह एव च तमस्येतानि जायंते विवृद्धे कुरुनंदन १३ यदा सत्वे प्रवृद्धे तु प्रलयं याति दे
हभृत् तदोत्तमविदां लोकानमलान्प्रतिपद्यते १४ रजसि प्रलयं गत्वा कर्मसंगिषु जायते तथा प्रलीनस्तमसि मूढ
योनिषु जायते १५ कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलं रजसस्तु फलं दुःखमज्ञानं तमसः फलं १६

नि लिंगानि जायंते हे कुरुनंदन १३ मरणद्वारेणापि यत्फलं प्राप्यते तदपि सर्वं गौणमेवेति दर्शयन्नाह यदा सत्वे प्रवृद्धे
उद्भूते तु प्रलयं मरणं याति प्रतिपद्यते देहभृदात्मा तदोत्तमविदां महदादितत्वविदां इत्येतत् लोकानमलान्मलरहितान् हेरंब
प्रतिपद्यते प्राप्नोतीत्येतत् १४ रजसि प्रवृद्धे प्रलयं मरणं गत्वा प्राप्य कर्मसंगिषु जायते कर्मासक्तियुक्तेषु मनुष्येषूत्पद्यते
तथा तद्वत् प्रलीनो मृतस्तमसि प्रवृद्धे मूढयोनिषु पश्वादियोनिषु जायते १५ अतीतश्लोकार्थस्यैव संक्षेप उच्यते कर्म ६५
णः सुकृतस्य सात्विकस्येत्यर्थः आहुः शिष्टाः सात्विकमेव निर्मलं फलमिति रजसस्तु राजसस्य कर्मण इत्यर्थः कर्मो
धिकारात्फलमपि दुःखमेव कारणानुरूप्याद्राजसमेव तथाज्ञानं तमसः तामसस्य कर्मणोधर्मस्य पूर्ववत् १६

131/1943

किंच गुणेभ्यो भवति सत्वात्लब्धात्मकात्संजायते समुत्पद्यते ज्ञानं रजसो लोभ एव च प्रमादमोहौ प्रमादश्च मोहश्च उभौ प्रमा
दमोहाबुभौ तमसो भवतोज्ञानमेव च भवति १७ किंच ऊर्ध्वं गच्छंति देवलोकादिषूत्पद्यंते सत्वस्थाः सत्वगुणवृत्तस्था मध्ये
तिष्ठंति मनुष्येषूत्पद्यंते राजसाः जघन्यगुणवृत्तिस्था जघन्यश्चासौ गुणश्च जघन्यगुणस्तमस्तस्य वृत्तं निद्रालस्यादि तत्र
स्थिता जघन्यगुणवृत्तस्था मूढा अधो गच्छंति पश्वादिषूत्पद्यंते तामसाः १८ पुरुषस्य प्रकृतिस्थत्वरूपेण मिथ्याज्ञानेन
युक्तस्य भोग्येषु गुणेषु सुखदुःखमोहात्मकेषु सुखी दुःखी मूढोहमस्मीत्येवंरूपो यः संगस्तत्कारणं पुरुषस्य सदसद्योनि
जन्मप्राप्तिलक्षणस्य संसारस्येति समासेन पूर्वाध्याये यदुक्तं तदिह सत्वं रजस्तम इति गुणाः प्रकृतिसंभवा इत्यत आरभ्य
गुणस्वरूपं गुणवृत्तं स्ववृत्तेन च गुणानां बंधकत्वं गुणवृत्तनिबद्धस्य पुरुषस्य या गतिरित्येतत्सर्वं मिथ्याज्ञानमज्ञानमूलं
च बंधकारणं विस्तरेणोक्त्वा अधुना सम्यग्दर्शनान्मोक्षो वक्तव्य इत्याह भगवान् नान्यं कार्यकरणविषयाकारपरिणतेभ्यो

सत्वात्संजायते ज्ञानं रजसो लोभ एव च प्रमादमोहौ तमसो भवतोज्ञानमेव च १७ ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठं
ति राजसाः जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः १८ नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति गुणेभ्यश्च प
रं वेत्ति मद्भावं सोधिगच्छति १९ गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् जन्ममृत्युजरादुःखैर्विमुक्तोमृतमश्नु
ते २० अर्जुन उवाच कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते २१
गुणेभ्यः कर्तारमन्यं यदा द्रष्टा विद्वान्सन्नानुपश्यति गुणा एव सर्वावस्थाः सर्वकर्मणां कर्तार इत्येवं पश्यति गुणेभ्यश्च परं गु
णव्यापारसाक्षिभूतं वेत्ति मद्भावं मम भावं वासुदेवत्वं वासुदेवः सर्वमित्येवं पश्यन्स द्रष्टाधिगच्छति १९ कथं सोधिग
च्छतीत्युच्यते गुणानेतान्यथोक्तानतीत्य जीवन्नेवातिक्रम्य मायोपाधिभूतांस्त्रीन्देही देहसमुद्भवान् देहोत्पत्तिबीज
भूतान् जन्ममृत्युजरादुःखैर्जन्म च मृत्युश्च जरा च दुःखं च जन्ममृत्युजरादुःखानि तैर्जीवन्नेव मुक्तः सन् विद्वानमृतमश्नुते
एवं मद्भावमधिगच्छतीत्यर्थः २० जीवन्नेव गुणानतीतोमृतमश्नुत इति प्रश्नबीजं प्रतिलभ्यार्जुन उवाच कैर्लिंगैश्चिन्हैस्
त्रीनेतान्व्याख्यातान्गुणानतीतोतिक्रांतो भवति प्रभो किमाचारः कोस्याचार इति किमाचारः कथं केन च प्र
कारेणैतांस्त्रीन्गुणानतिवर्तते अतीत्य वर्तते २१ ॐ नमो भगवते वासुदेवाय नमः हेरंब सांबसीतापती

गुणातीतस्य लक्षणं गुणातीतत्वोपायश्चार्जुनेन पृष्टो ऽस्मिन् श्लोके प्रश्नद्वयार्थं प्रतिवचनं श्रीभगवानुवाच यत्तावत्, किंलिंगैर्युक्तो
गुणातीतो भवतीति तच्छृणु प्रकाशं च सत्वकार्यं प्रवृत्तिं च रजःकार्यं मोहमेव च तमःकार्यमित्येतानि न द्वेष्टि संप्रवृत्तानि सम्यग्विषयभावेनोद्भूतानि मम तामसः प्रत्ययो जातस्तेनाहं मूढः तथा राजसी प्रवृत्तिर्मे ऽत्पन्ना दुःखात्मिका तेनाहं रजसा प्रवर्तितः प्रचलितः स्वरूपात् कष्टं ममवर्तते योयं मम स्वरूपावस्थानाद् भ्रंशस्तथा सात्विको गुणः प्रकाशात्मा मां विवेकित्वमापादयन् सुखे च संजयति बध्नाती-
ति तानि द्वेष्टि असम्यग्दर्शित्वेन तदेवं गुणातीतो न द्वेष्टि संप्रवृत्तानि यथा च सात्विकादिपुरुषः सत्वादिकार्याण्यात्मानं प्रति-
प्रकाश्य निवृत्तानि कांक्षति न तथा गुणातीतो निवृत्तानि कांक्षतीत्यर्थः २२ एतन्न परप्रत्यक्षं लिंगं किं तर्हि स्वात्मप्रत्यक्षत्वादात्मार्थमेतल्ल-
क्षणं न हि स्वात्मविषयं द्वेषमाकांक्षां वा परः पश्यति अथेदानीं गुणातीतः किमाचार इति प्रश्नस्य प्रतिवचनमाह उदासीनवद्यथोदा-
सीनो न कस्यचित्पक्षं भजते तथायं गुणातीतत्वोपायमार्गे ऽवस्थित आसीन आत्मवित् गुणैर्यः संन्यासी न विचाल्यते नैव कर्तुं नात्मस्था-

श्रीभगवानुवाच प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति २२ उदासीनवदासीनो गुणैर्यो
न विचाल्यते गुणा वर्तन्त इत्येवं यो ऽवतिष्ठति नेंगते २३ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः तुल्यप्रियाप्रियो धीर-
स्तुल्यनिंदात्मसंस्तुतिः २४ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः सर्वारंभपरित्यागी गुणातीतः स उच्यते २५

नस्तदेतत्स्फुटीकरोति गुणाः कार्यकरणविषयाकारपरिणता अन्योन्यस्मिन्वर्तन्त इति यो ऽवतिष्ठति छंदोभंगभयात्परस्मैपदप्र-
योगः योनुतिष्ठतीति पाठान्तरे नेंगते न चलति स्वरूपावस्थ एव भवतीत्यर्थः २३ किंच समदुःखसुखः समे दुःखसुखे यस्य स
समदुःखसुखः स्वस्थः स्वात्मनि स्थितः प्रसन्नः समलोष्टाश्मकांचनः लोष्टं चाश्मा च कांचनं च समानि यस्य स तुल्यप्रियाप्रियः
प्रियं चाप्रियं च तुल्ये समे प्रियाप्रिये यस्य सो ऽयं तुल्यप्रियाप्रियः धीरो धीमान् तुल्यनिंदात्मसंस्तुतिः निंदा चात्मसंस्तुतिश्च
तुल्ये निंदात्मसंस्तुती यस्य यतेः स तुल्यनिंदात्मसंस्तुतिः २४ किंच मानापमानयोस्तुल्यः समो निर्विकारस्तुल्यो मि- दंभ
त्रारिपक्षयोः यद्यप्युदासीनस्य परे मित्राद्यभिप्रायो नास्ति तथापि परेषां वयमस्य मित्राणि वयमस्यारय इति तुल्यो ६६
मित्रारिपक्षयोरित्याह सर्वारंभपरित्यागी दृष्टादृष्टार्थानि कर्माण्यारभ्यंत इत्यारंभाः सर्वानारंभान् परित्यक्तुं शीलमस्येति
स सर्वारंभपरित्यागी देहधारणमात्रनिमित्तव्यतिरेकेण सर्वकर्मपरित्यागीत्यर्थः गुणातीतः स उच्यते २५ ॥

133
1943

उदासीनवदित्यादि गुणातीतः स उच्यत इत्येतदंतमुक्तं यावद्यत्नसाध्यं तावत्संन्यासीनानुष्ठेयं गुणातीतत्वसाधनं मुमुक्षोः स्थि-
रीभूतं स्वसंवेद्यं सद्गुणातीतस्य यतेर्लक्षणं भवति अधुना च कथं त्रीन् गुणान् अतिवर्तत इति प्रश्नस्य प्रतिवचनमाह अयमन्यो गु-
णातीतत्वाभ्युपायो विशिष्टतरः पूर्वस्मादुच्यते मां चेश्वरं नारायणं सर्वभूतहृदयाश्रितं यो यतिः कर्मी वा अव्यभिचारेण न कदाचि-
द्यो व्यभिचरति भक्तियोगो भजनं भक्तिः सैव योगस्तेन भक्तियोगेन सेवते स गुणान् समतीत्यैतान् यथोक्तान् ब्रह्मभूयाय भवनं
भूयो ब्रह्मभूयाय ब्रह्मभवनाय मोक्षाय कल्पते समर्थो भवतीत्यर्थः २६ कुत एतदित्युच्यते अव्यभिचारिज्ञानादिस्वरूपस्य प-
रमानंदरूपस्य परमात्मनः प्रत्यगात्मतया प्रतिष्ठा सम्यग्ज्ञानेन परमात्मतया निश्चीयत इति एतद्ब्रह्मभूयाय कल्पत इत्युक्तं ते-
षु श्चात्मत्वाह ब्रह्मणः परमात्मनः हि यस्मात् प्रतिष्ठाहं प्रतिष्ठा प्रत्यस्मिन् प्रतिष्ठाहं प्रत्यगात्मा कीदृग्भूतस्य ब्रह्मणो ऽमृतस्या-
विनाशिनो ऽव्ययस्याविकारिणः शाश्वतस्य नित्यस्य धर्मस्य ज्ञानयोगधर्मप्राप्यस्य सुखस्यानंदरूपस्यैकांतिकस्याव्यभिचारि-

मां च यो ऽव्यभिचारेण भक्तियोगेन सेवते स गुणान् समतीत्यैतान्ब्रह्मभूयाय कल्पते २६ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्य-
यस्य च शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च २७ हरिःॐ तत्सदिति श्रीमद्भगवद्गीतासू॰ चतुर्दशो ऽध्यायः १४

णो ऽमृतादिस्वभावस्य परमानंदरूपस्य परमात्मा प्रत्यगात्मा प्रतिष्ठा सम्यग्ज्ञानेन परमात्मतया निश्चीयते तदेतद्ब्रह्मभूयाय क-
ल्पत इत्युक्तं यये श्वरशक्त्या भक्त्यानुग्रहादिप्रयोजनाय ब्रह्म प्रतितिष्ठति प्रवर्तते सा शक्तिर्ब्रह्मैव अहं शक्तिशक्तिमतोरन-
न्यत्वादित्यभिप्रायो ऽथवा ब्रह्मशब्दवाच्यत्वात्सविकल्पकं ब्रह्म तस्य ब्रह्मणो निर्विकल्पको ऽहमवाच्यः प्रतिष्ठाश्रयः किं-
विशिष्टस्यामृतस्यामरणधर्मस्याव्ययस्य व्ययरहितस्य किंच शाश्वतस्य च नित्यस्य धर्मस्य ज्ञाननिष्ठालक्षणस्य सुखस्य
तज्जनितस्यैकांतिकस्य नियतस्य च प्रतिष्ठाहमिति वर्तते २७ इति श्रीमत्परमहंसपरिव्राजकाचार्य॰ चतुर्दशो ऽध्यायः १४
यस्मान्मदधीनं प्राणिनां कर्मफलं ज्ञानिनां च ज्ञानयोगधर्मप्राप्यं सुखं च ज्ञानफलमतो भक्तियोगेन मां ये सेवंते ते मत्प्र-
सादाद् ज्ञानप्राप्तिक्रमेण गुणातीता मोक्षं गच्छंति किमु वक्तव्यमात्मनस्तत्वमेव सम्यग्विजानंत इत्यतो भगवानर्जुनेना-
पृष्टो ऽप्यात्मनस्तत्वं विवक्षुरुवाच ऊर्ध्वमूलमित्यादि तत्र तावद्वृक्षरूपकल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति वि-

रक्षकहिस्य संसाराङ्गवत्तत्त्वज्ञानेधिकारो नान्यस्येति ऊर्ध्वमूलं कालतः सूक्ष्मत्वात्कारणत्वान्नित्यत्वात् महत्त्वाच्चोर्ध्वमुच्य
ते ब्रह्माव्यक्तमायाशक्तिमत्तन्मूलमस्येति सोयं संसारवृक्ष ऊर्ध्वमूलः श्रुतेश्च ऊर्ध्वमूलोवाक्शाख एषोश्वत्थः सनातन इति
पुराणेचोक्तं अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः बुद्धिस्कंधमयश्चैव इंद्रियांतरकोटरः महाभूतविशाखश्च विषयैः प
त्रवांस्तथा धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः एतद्ब्रह्मवनं चैव ब्रह्माचरति
नित्यशः एतच्छित्वा च भित्वा च ज्ञानेन परमासिना ततश्चात्मरतिं प्राप्य यस्मान्नावर्तते पुनरित्यादि तमूर्ध्वमूलं संसारं माया
मयं वृक्षं अधःशाखं महदहंकारतन्मात्रादयः शाखा इवास्याधो भवंतीति सोयमधःशाखः तमधःशाखं न श्वोपि स्थास्य
तीत्यश्वत्थं तं क्षणप्रध्वंसिनमश्वत्थं प्राहुः कथं तर्ह्ययं संसारमयामयं अनादिकालप्रवृत्तत्वात्सोयं संसारवृक्षोऽव्ययः ना
द्यनंतदेहादिसंतानाश्रयो हि सुप्रसिद्धस्तमव्ययं तस्यैव संसारवृक्षस्य इदमन्यद्विशेषणांतरं छंदांसि छादनाद्धर्मा
धर्मलक्षणानि यस्य संसारवृक्षस्य पर्णानीव पर्णानि यथा वृक्षस्य परिरक्षणार्थानि पर्णानि तथा वेदाः संसारवृक्षपरिरक्ष

श्रीभगवानुवाच ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् १ अध
श्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके २

णार्थाः त्रिपर्णानि धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात् यथा व्याख्यातं संसारवृक्षं समूलं यस्तं वेद स वेदवित् वेदार्थविदित्यर्थः
१ नहि संसारवृक्षादस्मात्समूलात् ज्ञेयोन्योणुमात्रोप्यवशिष्टोस्तीत्यतः सर्वज्ञः स यो वेद स वेदार्थविदिति समूलवृक्षज्ञा
नं स्तौति तस्यैव संसारवृक्षस्यापराच्यव्यापारकल्पनोच्यते अधो मनुष्यादिभ्यो यावत्स्थावरं ऊर्ध्वं च यावद्ब्रह्मा विश्वसृ
जो धर्म इत्येतदंतं यथाकर्म यथाश्रुतं ज्ञानकर्मफलानि तस्य वृक्षस्य शाखा इव शाखाः प्रसृताः प्रवृद्धाः गुणप्रवृद्धा गु
णैः सत्त्वरजस्तमोभिः प्रवृद्धाः स्थूलीकृताः उपादानभूतैः विषयप्रवालाः विषयाः शब्दादयः प्रवाला इव देहादिकर्मफलेभ्यः
शाखाभ्यः अंकुरीभवंतीव तेन विषयप्रवालाः शाखाः संसारवृक्षस्य परं मूलमुपादानकारणं पूर्वमुक्तमथेदानीं कर्मफलज
नितरागद्वेषादिवासनाः मूलानीव धर्माधर्मप्रवृत्तिकारणानि अवांतरभावीनि तानि अधश्च देवाद्यपेक्षया मूलान्यनुसंततानि
अनुप्रविष्टानि कर्मानुबंधीनि कर्म धर्माधर्मलक्षणमनुबंधः पश्चाद्भावि येषामुद्भूतिमनुभवंतीति तानि कर्मा
नुबंधीनि मनुष्यलोके विशेषतो ह्यत्र मनुष्याणां कर्माधिकारः प्रसिद्धः २

135
1963

यस्त्वयं वर्णितः संसारवृक्षः न रूपमस्येह यथा वर्णितं तथा नैवोपलभ्यते स्वप्नमरीच्युदकमायागंधर्वनगरसमत्वात् दृष्टनष्टस्व
रूपो हि स इत्यत एव नांतो न पर्यंतो निष्ठा समाप्तिर्वा विद्यते तथा न चादिरिति आरभ्यायं प्रवृत्त इति न केनचिद्गम्यते न च संप्रतिष्ठा
स्थितिर्मध्यमस्य न केनचिदुपलभ्यते अश्वत्थमेनं यथोक्तं सुविरूढमूलं सुष्ठुविरूढानि विरोहं गतानि सुदृढानि मूलानि यस्य
तमेनं सुविरूढमूलमसंगशस्त्रेण असंगः पुत्रवित्तलोकैषणादिभ्यो व्युत्थानं तेन असंगशस्त्रेण दृढेन परमात्माभिमुखनि
श्चयदृढीकृतेन पुनः पुनर्विवेकाभ्यासाश्मनिशितेन छित्वा संसारवृक्षं सबीजमुद्धृत्य ३ ततः पश्चाद्यत्पदं वैष्णवं तत्परिमा
र्गितव्यं परिमार्गणमन्वेषणं ज्ञातव्यमित्यर्थः यस्मिन्पदे गताः प्रविष्टा न निवर्तंति नावर्तंते भूयः पुनः संसाराय कथं परिमा
र्गितव्यमित्याह तमेव च यः पदशब्देनोक्तः आद्यं आदौ भवं आद्यं पुरुषं प्रपद्ये इत्येवं परिमार्गितव्यं तच्छरणतयेत्यर्थः कोसौ पु
रुष इत्युच्यते यतो यस्मात्पुरुषात्संसारमायावृक्षप्रवृत्तिः प्रसृता निःसृता ऐंद्रजालिकादिव माया पुराणी चिरंतनी ४ कथंभू

न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा ३ ततः
पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तंति भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ४ निर्मानमो
हा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत् ५ न
तद्भासयते सूर्यो न शशांको न पावकः यद्गत्वा न निवर्तंते तद्धाम परमं मम ६

तास्तत्पदं गच्छंतीत्युच्यते निर्मानमोहाः मानश्च मोहश्च मानमोहौ तौ निर्गतौ येभ्यः ते निर्मानमोहाः मानमोहविवर्जिताः
जितसंगदोषाः संग एव दोषः संगदोषः जितः संगदोषो यैस्ते जितसंगदोषाः अध्यात्मनित्याः परमात्मस्वरूपालोचननि
त्याः तत्पराः विनिवृत्तकामाः विशेषतो निर्लेपेन निवृत्ताः कामा येषां ते निवृत्तकामाः यतयः संन्यासिनो द्वंद्वैः प्रियाप्रि
यादिभिः विमुक्ताः सुखदुःखसंज्ञैः परित्यक्ता गच्छंत्यमूढा मोहवर्जिताः पदमव्ययं यथोक्तं ५ तदेव पदं पुनर्विशेष्यते
तद्धामेति व्यवहितेन धाम्ना संबध्यते तद्धाम मे तेजोरूपं पदं न भासयते सूर्य आदित्यः सर्वावभासनशक्तिमत्त्वेपि स
ति तथा न शशांकश्चंद्रो न पावकोग्निरपि यद्धाम वैष्णवं पदं गत्वा प्राप्य न निवर्तंते यच्च सूर्यादिर्नावभासयते त
द्धामपदं परमं विष्णोर्मम यद्गत्वा न निवर्तंत इत्युक्तं ६ गोविंद हेरंब सांब राम ६

गी०टी०अ० ननु सर्वो हि गतिरागत्य ता संयोगा वियोगांता इति हि प्रसिद्धं कथमुच्यते तद्धामगतानां नास्ति निवृत्तिरिति शृणु तत्रैव कारणं
ममैवेति परमात्मनो नारायणस्यांश एव अंशो भाग एकदेश इत्यर्थः स न जीवलोके जीवानां लोके संसारे जीवभूतो भोक्ता कर्तेति प्रसि-
६८ द्धः सनातनो निवर्तते न तथापि मत्प्रसादानो पुरातनो यथा जलसूर्यकः सूर्यांशो जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते तथायम
प्यंशः तेनैवात्मना गच्छत्येवमेव यथा वा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाशस्तु आकाशांशः सन् घटादिनिमित्तापाये आका-
शं प्राप्य न निवर्तते इत्येवं अत उपपन्नमुक्तं यद्गत्वा न निवर्तन्त इति ननु निरवयवस्य परमात्मनः कुतोंऽश एकदेशोऽशात्तु निसाव
यवत्वे च विनाशप्रसंगो वयविभागान्नैष दोषो वियाकृतोपाधिपरिच्छिन्नः केवल देशांशा इव कल्पितो यतः दर्शितश्चायमर्थः सत्रा
ध्याये विस्तरशः स च जीवो मदंशत्वेन कल्पितः कथं संसरति इत्यपेक्षायामाह मनःषष्ठानि श्रोत्रादीन्द्रियाणि प्रकृतिस्थानि स्व
स्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि कर्षत्याकर्षयति ७ कस्मिन्काले यच्चापि यदाप्युत्क्रामतीश्वरो देहादिसंघातस्वामि

ममैवांशो जीवलोके जीवभूतः सनातनः मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ७ शरीरं यदवाप्नोति यच्चा-
प्युत्क्रामतीश्वरः गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ८ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च अधि-
ष्ठाय मनश्चायं विषयानुपसेवते ९ उत्क्रामन्तं स्थितं वापि भुंजानं वा गुणान्वितं विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः १०

जीवः तदा कर्षतीति श्लोकस्य द्वितीयपादार्थत्वेनात्र प्राथम्येन संबध्यते यदा च पूर्वस्माच्छरीरांतरं प्राप्नोति तदा गृहीत्वैतानि मन-
षष्ठानीन्द्रियाणि संयाति सम्यक् याति गच्छति किमिवेत्याह वायुः पवनो गंधानिवाशयात्पुष्पादेः ८ कानि पुनस्तानि श्रोत्रं च-
क्षुः स्पर्शनं त्वगिंद्रियं रसनं जिह्वा घ्राणमेव च मनश्च षष्ठं प्रत्येकं इन्द्रियेण सहाधिष्ठाय देहस्थो विषयाञ्छब्दादीनुपसे-
वते ९ एवं देहगतं देहात् उत्क्रामंतं देहं पूर्वोपात्तं परित्यजंतं स्थितं वा देहे तिष्ठंतं भुंजानं वा शब्दादीन्योपलभमानं गुणा- देहंबु
न्वितं सुखदुःखमोहाद्यैर्गुणैरन्वितमनुगतं संयुक्तमित्यर्थः एवंभूतमप्येनमत्यंतदर्शनगोचरप्राप्तं विमूढा दृष्टादृष्टविष-
भोगबलाकृष्टचेतस्तयानेकधा मूढा नानुपश्यंति अहो कष्टं वर्तत इत्यनुक्रोशति भगवान् ये तु पुनः प्रमाणजनितज्ञान- ६९
चक्षुषस्त एव पश्यंति ज्ञानचक्षुषो विविक्तदृष्टय इत्यर्थः १० ॥ ॥

137/1943

किं च यतंतः प्रयत्नं कुर्वंतो योगिनश्च समाहितचित्ताः एनं प्रकृतमात्मानं पश्यंति अयमहमस्मीत्युपलभंते आत्मनि स्वस्यां
बुद्धाववस्थितं यतंतोऽपि शास्त्रादिप्रमाणैः अकृतात्मानोऽसंस्कृतात्मानस्तपसेन्द्रियजयेन च दुश्चरितादनुपरता अशांतदर्पा
त्मानः प्रयत्नं कुर्वंतोऽपि नैनं पश्यंत्यचेतसो विवेकिनः ११ यत्पदं सर्वस्यावभासकमप्यग्न्यादित्यादिकं ज्योतिर्नावभासयते तत्
त्वाप्ताश्च मुमुक्षवः पुनः संसाराभिमुखा न निवर्तन्ते तस्य च पदस्योपाधिभेदमनुविधीयमाना जीवा घटाकाशादय इवाका-
शस्यांशास्तस्य पदस्य सर्वात्मत्वं सर्वव्यवहारास्पदत्वं च विवक्षुश्चतुर्भिः श्लोकैर्विभूतिसंक्षेपमाह भगवान् यदादित्यग
तमादित्यगतमादित्याश्रयं किं तत्तेजो दीप्तिः प्रकाशः जगद्भासयते प्रकाशयति अखिलं समस्तं यच्चंद्रमसि शशभृति तेजोऽव
भासकं वर्तते यच्चाग्नौ हुतवहे तत्तेजो विद्धि मामकं मदीयं मम विष्णोस्तज्ज्योतिः ननु अथवा यदादित्यगतं तेजश्चैतन्यात्म
कं ज्योतिर्यच्चंद्रमसि शशभृति यच्चाग्नौ हुतवहे तत्तेजो विद्धि मामकं मदीयं मम विष्णोस्तज्ज्योतिः ननु स्थावरेषु जंगमेषु च तत्

यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं यतंतोप्यकृतात्मानो नैनं पश्यंत्यचेतसः ११ यदादित्यगतं तेजो जगद्भासयतेऽखिलं
यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं १२ गामाविश्य च भूतानि धारयाम्यहमोजसा पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः

समानं चैतन्यात्मकं ज्योतिस्तत्र कथमिदं विशेषणं यदादित्यगतमित्यादि नैष दोषः सत्वाधिक्यादाधिक्योपपत्तेः आदित्यादिषु १३
हि सत्वमत्यंतप्रकाशमत्यंतभास्वरम् अतस्तत्रैवाविष्कृततरं ज्योतिरिति तद्विशिष्यते न तु तत्रैव तदधिकमिति यथा हि लोके तुल्येपि
मुखसंस्थाने न काष्ठकुड्यादौ मुखमाविर्भवति आदर्शादौ च स्वच्छे स्वच्छतरे च तारतम्येनाविर्भवति तद्वत् १२ किं च
गां पृथिवीमाविश्य प्रविश्य धारयामि भूतानि जगदहमोजसा बलेन यद्बलं कामरागविवर्जितं मैश्वरं रूपं जगद्विधारणाय
पृथिव्यामाविशति येन गुर्वी पृथिवी नाधः पतति न विदीर्यते च तथा च मंत्रवर्णो येन द्यौरुग्रा पृथिवी च दृढेति स दाधार पृथिवी
मित्यादिश्चातो गामाविश्य च भूतानि चराचराणि धारयामीति युक्तमुक्तं किं च पृथिव्यां जाता ओषधीः सर्वा व्रीहियवाद्याः पु
ष्णामि पुष्टिमतीः रसस्वादुमतीश्च करोमि सोमो भूत्वा रसात्मकः सोमः सन् सर्वरसात्मकः रसस्वभावः सर्वरसानामा
करः सोमः स हि सर्वा ओषधीः स्वात्मरसानुप्रवेशनेन पुष्णाति १३ गोविंदराम गोविंद हेरंब सदाशिव राम

किंच अहमेव वैश्वानर उदरस्थोऽग्निर्भूत्वा अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते इत्यादिश्रुतेः वैश्वानरः सन् प्राणिनां
प्राणवतां देहमाश्रितः प्रविष्टः प्राणापानसमायुक्तः प्राणापानाभ्यां संयुक्तः पचामि पक्तिं करोमि अन्नं चतुर्विधं चतुःप्रकारं भक्ष्यभोज्यलेह्य
चोष्यं भोज्यं भक्ष्यं चोष्यं लेह्यं च भोक्ता वैश्वानरोऽग्निर्भोज्यमन्नं सोमः तदेतदुभयमग्नीषोमौ सर्वमिति पश्यतोऽन्नदोषलेपो न भव
ति १४ किंच सर्वस्य च प्राणिजातस्याहमात्मा सन् हृदि बुद्धौ संनिविष्टः अतो मत्त आत्मनः सर्वप्राणिनां स्मृतिर्ज्ञानं तदपोह
नं च येषां पुण्यकर्मणां पुण्यकर्मानुरोधेन ज्ञानस्मृती भवतः तथा पापकर्मणां पापकर्मानुरूपेण स्मृतिज्ञानयोरपोहनं चाप
चयनमपगमनं च वेदैश्च सर्वैरहमेव परमात्मा वेद्यो वेदितव्यः वेदान्तकृत् वेदान्तार्थसंप्रदायकृदित्यर्थः वेदविदेव वेदार्थविदेव चाहं १५ भग
वत ईश्वरस्य नारायणाख्यस्य विभूतिसंक्षेप उक्तो विशिष्टोपाधिकृतः यदादित्यगतं तेज इत्यादिना अथाधुना तस्यैव क्षराक्षरोपाधि
प्रविभक्ततया निरुपाधिकस्य केवलस्य स्वरूपनिर्दिधारयिषया उत्तरे श्लोका आरभ्यन्ते तत्र सर्वमेवातीतानागताध्यायार्थजातं त्रिधा
राशीकृत्याह द्वाविमौ पृथग्राशीकृतौ पुरुषाविति उच्यते लोके संसारे क्षरश्च क्षरतीति क्षरो विनाशी इत्येको राशिः अक्षरः पुरुषः पु

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं १४ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृ
तिर्ज्ञानमपोहनं च वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहं १५ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः
सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते १६ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः १७

रुषोऽक्षरस्तद्विपरीतो भगवतो मायाशक्तिः क्षराख्यस्य पुरुषस्योत्पत्तिबीजं अनेकसंसारिजन्तुकामकर्मादिसंस्काराश्रयोऽक्षरः पुरु
ष उच्यते कौ तौ पुरुषावित्याह स्वयमेव भगवान् क्षरः सर्वाणि भूतानि समस्तं विकारजातमित्यर्थः कूटस्थः कूटो राशी राशिरिव स्थितः अ
थवा कूटो माया वञ्चना जिह्मता कुटिलता इति पर्यायाः अनेकमायावञ्चनादिप्रकारेण स्थितः संसारबीजानन्त्यान्न क्षरतीत्यक्ष
र उच्यते १६ आभ्यां क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्वयदोषेणास्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभावः उत्तमः उत्कृष्टतमः
उत्तमपुरुषस्त्वन्यः अत्यन्तविलक्षण आभ्यां परमात्मेति परमश्चासौ देहाद्यविद्याकृतात्मभ्य आत्मा च सर्वभूतानां प्रत्यक्चेतन इ
तः परमात्मेत्युदाहृत उक्तो वेदान्तेषु स एव विशिष्यते यो लोकत्रयं भूर्भुवः स्वराख्यं स्वकीयया चैतन्यबलशक्त्या आविश्य प्रविश्य बिभर्ति स्वरू
पसद्भावमात्रेण बिभर्ति धारयति अव्ययो नास्य व्ययो विद्यत इत्यव्ययः ईश्वरः सर्वज्ञो नारायणाख्य ईशनशीलः यथाव्याख्या
तस्येश्वरस्य पुरुषोत्तम इत्येतन्नाम प्रसिद्धं १७ ॥ ॥ ॥

हरिः
६९

137
145

तस्य नाम्नो निर्वचनप्रसिद्ध्या अन्वर्थत्वं नाम्नो दर्शयन्निरतिशयोऽहमीश्वर इत्यात्मानं दर्शयति भगवान् यस्मात्क्षरमतीतोऽहं संसार
मायावृक्षमश्वत्थाख्यं अतिक्रान्तोऽहं अक्षरादपि संसारवृक्षबीजभूतादपि चोत्तमः उत्कृष्टतम ऊर्ध्वतमो वा अतस्ताभ्यां क्षराक्षराभ्यामुत्तमत्वा
दस्मि भवामि लोके वेदे च प्रथितः प्रख्यातः पुरुषोत्तम इत्येवं मां भक्तजना विदुः कवयः काव्यादिषु चेदं नाम निबध्नन्ति पुरुषोत्तम इत्यनेन
नाभिधानेनाभिगृणन्ति १८ अथेदानीं यथानिरुक्तमात्मानं यो वेद तस्येदं फलमुच्यते यो मामीश्वरं यथोक्तविशेषणमेवं यथोक्ते
न प्रकारेणासंमूढः संमोहवर्जितः सन् जानाति अयमहमस्मीति पुरुषोत्तमं स सर्ववित् सर्वात्मना सर्वं वेत्तीति सर्वज्ञः सर्वभूतस्थं
भजति मां सर्वभावेन सर्वात्मचित्ततया भारत १९ अस्मिन्नध्याये भगवत्तत्त्वज्ञानं मोक्षफलमुक्त्वाथेदानीं तत्स्तौति इत्येतदिति गुह्यतमं गो
प्यतममत्यन्तरहस्यमित्येतत् किं तत् शास्त्रं यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते तथाप्ययमेवाध्याय इह शास्त्रमुच्यते स्तुत्यर्थं प्रकर
णात् सर्वो हि गीताशास्त्रार्थोऽस्मिन्नध्याये समासेनोक्तः न केवलं गीताशास्त्रार्थ एव किंतु सर्वश्च वेदार्थ इहोपसंहृतः यस्तं वेद स वेदवित् वेदैश्च सर्वैरह

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः १८ यो मामेवमसंमूढो जानाति पुरु
षोत्तमं स सर्वविद्भजति मां सर्वभावेन भारत १९ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुद्ध्वा बुद्धिमान्स्या
त्कृतकृत्यश्च भारत २० इति श्रीमद्भगवद्गीतासूपनिष० पुराणपुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः १५

मेव वेद्य इति चोक्तमिदमुक्तं कथितं मया हे अनघ अपाप एतच्छास्त्रं यथादर्शितार्थं बुद्ध्वा बुद्धिमान् स्यात् भवेत् नान्यथा कृत
कृत्यश्च भारत कृतं कृत्यं कर्तव्यं कार्यं येन स कृतकृत्यो विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्तव्यं तत्सर्वं भगवत्तत्त्वे विदिते कृतं भवे
दित्यर्थः न चान्यथा कर्तव्यं परिसमाप्यते कस्यचिदित्यभिप्रायः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इति चोक्तं एतद्धि जन्मसा
मग्र्यं ब्राह्मणस्य विशेषतः प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथेति मानववचनं एतद्धि जन्मसामग्र्यमिति च मानवं वचनं
यस्मादेतत्परमार्थतत्त्वं मत्तः श्रुतवानसि अतः कृतार्थस्त्वं भारतेति २० इति श्रीमत्पर० पुराणपुरुषोत्तमयोगो नाम १५ अध्यायः

दैव्यासुरीराक्षसीति प्राणिनां प्रकृतयो नवमेऽध्याये सूचितास्तासां विस्तरेण प्रदर्शनाय अभयं सत्त्वसंशुद्धिरित्यादिरध्या
य आरभ्यते तत्र संसारमोक्षाय दैवी प्रकृतिः निबन्धनाय आसुरी राक्षसी चेति दैव्या आदानाय प्रदर्शनं क्रियते इतरयोः परि
वर्जनाय च भगवानुवाच अभयमभीरुता सत्त्वसंशुद्धिः सत्त्वस्यान्तःकरणस्य संव्यवहारेषु परवञ्चनामायानृतादिपरिव

गी॰भा॰ ७०

र्जनं शरूध्वसत्वभावेनव्यवहारइत्यर्थः ज्ञानयोगव्यवस्थितिः ज्ञानंशास्त्रतआचार्यतश्चात्मादिपदार्थानांअवगमोवगतानामिं
द्रियाद्युपसंहारेणैकाग्र्येणस्वात्मसंवेद्यतापादानंयोगः तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानंतन्निष्ठताएषाप्रधानादैवीसा
त्विकीसंपत्यत्रचयेषामधिकृतानांयाप्रकृतिरीदृशीसंभवतिसात्विकीसोच्यते दानंयथाशक्तिसंविभागोन्नादीनांदमश्चबाह्य
करणानामुपशमोंतःकरणस्योपशमंशांतिंवक्ष्यति यज्ञश्चश्रौतोग्निहोत्रादिस्मार्तश्चदेवयज्ञादिःस्वाध्यायऋग्वेदाद्य
ध्ययनमदृष्टार्थंतपोवक्ष्यमाणंशारीरादिआर्जवमृजुत्वंसर्वदा १ किंच अहिंसाहिंसनंप्राणिनांपीडावर्जनंसत्यमप्रियानृतवर्जि
तंयथाभूतार्थवचनंअक्रोधःपरैराक्रुष्टस्याभिहतस्यवाप्राप्तस्यक्रोधस्योपशमनंत्यागःसंन्यासःपूर्वंदानस्योक्तत्वात्शां
तिरंतःकरणस्योपशमः अपैशुनमपिशुनतापरस्मैपररंध्रप्रकटीकरणंपैशुन्यंतदभावोपैशुनंदयाकृपाभूतेषुदुःखि
तेषुअलोलुप्त्वंइंद्रियाणांविषयसंनिधानेविक्रियामार्दवंमृदुताअक्रौर्यंह्रीर्लज्जाअचापलंअसतिप्रयोजनेवाक्पाणिपा

श्रीभगवानुवाच अभयंसत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवं १ अहिंसा
सत्यमक्रोधस्त्यागःशांतिरपैशुनं दयाभूतेष्वलोलुप्त्वंमार्दवंह्रीरचापलं २ तेजःक्षमाधृतिःशौचमद्रोहोनातिमा
निता भवंतिसंपदंदैवीमभिजातस्यभारत ३ दंभोदर्पोभिमानश्चक्रोधःपारुष्यमेवच अज्ञानंचाभिजातस्यपार्थसंपद

दादीनामव्यापारयितृत्वं २ किंचतेजःप्रागल्भ्यंनत्वग्गतादीप्तिःक्षमाक्रुष्टस्यताडितस्यवांतर्विक्रियानुत्पत्तिरुत्पन्नाया
विक्रियायाःप्रशमनमक्रोधइत्यवोचामइत्थंक्षमायाअक्रोधस्यचविशेषःधृतिर्देहेंद्रियेष्ववसादंप्राप्तेषुतस्यप्रतिषेध
कोंतःकरणवृत्तिविशेषोयेनोत्तंभितानिकरणानिदेहश्चनावसीदंतिशौचंद्विविधंमृज्जलकृतंबाह्यमाभ्यंतरंमनोबुद्ध्योर्नै
र्मल्यंमायारागादिकालुष्याभावः एवंद्विविधंशौचंअद्रोहःपरिजिघांसाभावोऽहिंसनंनातिमानिताअत्यर्थंमानोतिमानः
सयस्यविद्यतेसोतिमानीतद्भावोतिमानितातात्मनःपूज्यतातिशयभावनाभावइत्यर्थःभवंत्यभयादीन्येतदंतानिसंपदमभि
जातस्यकिंविशिष्टांसंपदंदैवीदेवानांसंपदमभिलक्ष्यजातस्यदैवविभूत्यर्हस्यभाविकल्याणस्येत्यर्थःहेभारत ३ अथदा
नीमासुरीसंपदुच्यतेदंभोधर्मध्वजित्वंदर्पोधनस्वजनादिनिमित्तःउत्सेकोऽतिमानःपूर्वोक्तःक्रोधश्चपारुष्यमेवचपरुषव
चनंयथाकाणंचक्षुष्मान्विरूपंरूपवान्हीनाभिजनमुत्तमाभिजनइत्यादिअज्ञानंचाविवेकज्ञानंकर्तव्यादिमिथ्याप्रत्य
यविषयमभिजातस्यपार्थकिमभिजातस्येत्याह आसुराणांसंपदमासुरीतामभिजातस्येत्यर्थः ४ ॥

दैवसं

७०

161
1943

अनयोःसंपदोःकार्यमुच्यतेदैवीसंपद्याप्तासाविमोक्षायसंसारबंधनात् निबंधायनियतोबंधोनिबंधस्तदर्थःमासुरीसंपन्म
ताभिप्रेतातथाराक्षसीचतत्रैवमुक्तेअर्जुनस्यांतर्गतंभावंकिमहमासुरीसंपद्युक्तःकिंवादैवीसंपद्युक्तइत्येवमालोचनारूपमा
लक्ष्याहभगवान्माशुचःशोकंमाकार्षीःसंपदंदैवीमभिजातोसिअभिलक्ष्यजातोसिभाविकल्याणस्त्वमसीत्यर्थोहेपांडव
५ द्वौद्विसंख्याकौभूतसर्गौभूतानांमनुष्याणांसर्गौसृष्टीभूतसर्गौस्मिञ्जनेइतिसर्गाभूतान्येवसृज्यमानानिदैवासुरीसंपद्यु
क्तानीतिद्वौभूतसर्गावित्युच्येतेद्वयाहप्राजापत्यादेवाश्चासुराश्चेतिश्रुतेर्लोकेस्मिन्संसारइत्यर्थःसर्वेषांद्वैविध्योपपत्तेःको
तोभूतसर्गावित्युच्यतेप्रकृतावेवदैवआसुरएवचउक्तयोरेवपुनरनुवादेप्रयोजनमाहदैवोभूतसर्गोभयंसत्वसंशुद्धिरित्या
दिनाविस्तरशोविस्तरप्रकारैःप्रोक्तःकथितोनत्वासुरोविस्तरशइत्यतस्तत्परिवर्जनार्थमस्फुटंपदप्राणिविशेषणत्वेनप्र
हेपार्थमेशृणुममवचनादुच्यमानंविस्तरशःशृण्ववधारय ६ अध्यायपरिसमाप्तेरासुरीसंपद्दर्शितेप्रत्यक्षीकरणेनचश

दैवीसंपद्विमोक्षायनिबंधायासुरीमता माशुचःसंपदंदैवीमभिजातोसिपांडव ५ द्वौभूतसर्गौलोकेस्मिन्दैवआसु
रएवच दैवोविस्तरशःप्रोक्तआसुरंपार्थमेशृणु ६ प्रवृत्तिंचनिवृत्तिंचजनानविदुरासुराः नशौचंनापिचाचारोनस
त्यंतेषुविद्यते ७ असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं अपरस्परसंभूतंकिमन्यत्कामहैतुकं ८ ॥

क्यतेतस्याःपरिवर्जनंकर्तुमितिप्रवृत्तिंचप्रवर्तनंयस्मिन्पुरुषार्थसाधनेकर्तव्येप्रवृत्तिस्तांप्रवृत्तिंनिवृत्तिंचतद्विपरीतांयस्मा
दनर्थहेतोर्निवर्तितव्यंसानिवृत्तिस्तांचजनाअसुरानविदुःनजानंतिनकेवलंप्रवृत्तिनिवृत्तीएवनविदुःनशौचंविदुःनापि
चाचारोनसत्यंतेषुविद्यतेअशौचाअनाचारामायाविनोनृतवादिनोह्यासुराः ७ किंच असत्यंयथावयमनृतप्रायाः
स्तथेदंजगत्सर्वंअसत्यंअप्रतिष्ठंचनास्यधर्माधर्मौप्रतिष्ठातोप्रतिष्ठंचेतितेआसुराजनाजगदाहुरनीश्वरंनचधर्माधर्मस
व्यपेक्षकमस्यशासितेश्वरोविद्यतेइत्यतोनीश्वरंजगदाहुःकिंच अपरस्परसंभूतंकिमन्यज्जगतःकारणंनकिंचिददृष्टंधर्मा
धर्मादिकारणांतरंविद्यतेजगतःकामएवप्राणिनांकारणमितिलोकायतिकदृष्टिरियं ८ एतांदृष्टिमवष्टभ्याश्रित्यनष्टा
त्मानोनष्टस्वभावाविभ्रष्टपरलोकसाधनाअल्पबुद्धयोविषयविषयाल्पैवबुद्धिर्येषांतेअल्पबुद्धयःप्रभवंत्युग्रकर्माणःक्रूर
कर्माणोहिंसात्मकाःक्षयायजगतःप्रभवंतीतिसंबंधःजगतोहिताःशत्रवइत्यर्थः ९ एतांदृष्टिमवष्टभ्यनष्टात्मा
नोल्पबुद्धयः प्रभवंत्युग्रकर्माणःक्षयायजगतोहिताः ९ ॥

तेच काममाश्रित्यावष्टभ्य दुःपुरमशक्यपूरणं दंभमानमदान्विताः दंभश्च मानश्च मदश्च दंभमानमदास्तैरन्विताः दंभमानमदान्विताः मोहादविवेकतो गृहीत्वापाराया सद्ग्राहानशुभनिश्चयान् प्रवर्तंते लोके अशुचिव्रताः अशुचीनि व्रतानि येषां ते अशुचिव्रताः १० किंच चिंतामपरिमेयां च न परिमातुं शक्यते यस्याश्चिंताया इयत्ता सा अपरिमेया ताम् अपरिमेयां प्रलयांतां मरणांतां उपाश्रिताः सदा चिंतापरा इत्यर्थः कामोपभोगपरमाः काम्यंत इति कामाः शब्दादयस्तदुपभोगपरमा अयमेव परमः पुरुषार्थो यः कामोपभोग इत्येवं निश्चितात्मान एतावदिति निश्चिताः ११ आशापाशशतैः आशा एव पाशास्तच्छतैराशापाशशतैर्बद्धाः नियंत्रिताः संतः सर्वतः आकृष्यमाणाः कामक्रोधपरायणाः कामक्रोधौ परमं अयनं परमाश्रयो येषां ते कामक्रोधपरायणाः ईहंते चेष्टंते कामभोगार्थं कामभोगप्रयोजनाय न तु धर्मार्थम् अन्यायेनार्थसंचयान् अर्थनिचयान् अन्यायेन परस्वापहरणादिनेत्यर्थः १२ ईदृशश्च तेषामभिप्रायः इदमद्य इदानीं मया लब्धमिदं चान्यत् मनोरथं मनस्तुष्टिकरं प्राप्स्ये इदं चास्ति

चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः कामोपभोगपरमा एतावदिति निश्चिताः ११ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान् १२ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथं इदमस्तीदमपि मे भविष्यति पुनर्धनं १३ असौ मया हतः शत्रुर्हनिष्ये चापरानपि ईश्वरोहमहं भोगी सिद्धोहं बलवान्सुखी १४ आढ्योभिजनवानस्मि कोन्योस्ति सदृशो मया यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः १५ अनेकचित्तविभ्रांता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतंति नरकेशुचौ १६

इदमपि मे भविष्यति आगामिनि संवत्सरे पुनर्धनं तेनाहं धनी विख्यातो भविष्यामि १३ असौ देवदत्तनामा मया हतो दुर्जयः शत्रुः हनिष्ये चान्यान् वराकान् अपरानपि किं मे ते करिष्यंति तपस्विनः सर्वथापि नास्ति मत्तुल्य ईश्वरोहमहं भोगी सर्वप्रकारेण च सिद्धोहं संपन्नः पुत्रैर्नप्तृभिर्न केवलं मानुषोहं बलवान् सुखी चाहमेव १४ आढ्यो धनेन अभिजनवान् सप्तपुरुषं श्रोत्रियत्वादिसंपन्नः अस्ति नापि न मनुतुल्योस्ति कश्चित् को न्योस्ति सदृशस्तुल्यो मया किंच यक्ष्ये यागेनाप्यन्यानभिभविष्यामि दास्यामि नटादिभ्यो मोदिष्ये हर्षं चातिशयं प्राप्स्यामीत्येवमज्ञानेन विमोहिता अज्ञानविमोहिता अविवेकमापन्नाः १५ अनेकचित्तविभ्रांता उक्तैः प्रकारैरनेकैश्चित्तैर्विभ्रांता विविधं भ्रांता अनेकचित्तविभ्रांताः मोहजालसमावृताः मोहो विवेकोत्पन्नं तदेव जालमिवावरणात्मकत्वात् तेन समावृताः प्रसक्ताः कामभोगेषु तत्रैव निषण्णाः संतस्तेनोपचितकल्मषाः पतंति नरके अशुचौ वैतरण्यादौ १६ हेरंब ७१

143
1443

आत्मसंभाविताः सर्वगुणविशिष्टतया आत्मनैव आत्मनि संभाविताः स्तब्धा अप्रणतात्मानो दंडवत् धनमानमदान्विताः धननिमित्तो मानो धनमानः मदश्च ताभ्यां धनमानमदाभ्यां अन्विताः यजंते नामयज्ञैः नाममात्रैर्यज्ञैस्ते दंभेन धर्मध्वजतया अविधिपूर्वकं विहितांगेतिकर्तव्यतारहितैः १७ अहंकारमहंकरणमहंकारो विद्यमानैश्चागुणैरविद्यमानैश्चागुणैः आत्मनि अध्यारोपितैर्विशिष्टमात्मानमहमिति मन्यते सोऽहंकारोऽविद्याख्यः कष्टतमः सर्वदोषाणां मूलं सर्वानर्थप्रवृत्तीनां च तथा बलं पराभिभवनिमित्तं कामरागान्वितं दर्पं दर्पो नाम यस्योद्भवे धर्ममतिक्रामति सोयमंतःकरणाश्रयो दोषविशेषः क्रोधादीयस्यपि चित्ता दोषात्प्रेसुधर्मो हृष्यति हृप्तो दृप्यति दृप्तो हि धर्ममतिक्रामतीति श्रुतेः कामं स्त्र्यादिविषयं क्रोधमनिष्टविषयमेतानन्यांश्च महतो दोषान् संश्रिताः किंच ते मामीश्वरमात्मपरदेहेषु स्वपरदेहेषु च तद्बुद्धिकर्मसाक्षिभूतं मां प्रद्विषंतो मच्छासनातिवर्तित्वं प्रद्वेषस्तं कुर्वंतः अभ्यसूयकाः सन्मार्गस्थानां गुणेष्वसहमानाः १८ तानहं सन्मार्गप्रतिपक्षभूतान् साधुद्वेषिणो द्विषत

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकं १७ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः मामात्मपरदेहेषु प्रद्विषंतोभ्यसूयकाः १८ तानहं द्विषतः क्रूरान्संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु १९ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिं २० त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् २१

श्च मां क्रूरान् संसारेष्वेव नरकसंसारमार्गेषु नराधमान् अधर्मदोषवत्त्वात् क्षिपामि प्रक्षिपामि अजस्रं सततं अशुभान् अशुभकर्मकारिणः आसुरीष्वेव क्रूरकर्मप्रायासु व्याघ्रसिंहादियोनिषु क्षिपामीत्यनेन संबंधः १९ आसुरीं योनिमापन्नाः प्रतिपन्नाः मूढा अविवेकिनो जन्मनि जन्मनि प्रतिजन्म तमोबहुलास्वेव योनिषु जायमाना अधो गच्छंति मूढा मामीश्वरमप्राप्य अनासाद्यैव कौंतेय ततः तस्मादपि यांत्यधमां गतिं निकृष्टतमां गतिं मामप्राप्येति न मत्प्राप्तौ काचिदप्याशंकास्ति अतो मच्छिष्टसाधुमार्गमप्राप्येत्यर्थः २० सर्वस्या आसुर्याः संपदः संक्षेपोयमुच्यते यस्मिन् त्रिविधे सर्व आसुरी संपदंतोनंतोप्यंतर्भवति यत्परिहारे परिहृतश्च भवति यन्मूलं सर्वस्यानर्थस्य तदेतदुच्यते त्रिविधं त्रिःप्रकारं नरकस्य प्राप्तौ द्वारं नाशनमात्मनः यद्द्वारं प्रविशन्नेव नश्यत्यात्मा न कस्मैचित्पुरुषार्थाय योग्यो भवतीत्यत उच्यते द्वारं नाशनमात्मन इति किं तत्कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् यत एतद्द्वारं नाशनमात्मनस्तस्मात्कामादित्रयमेतत्त्यजेत् २१ गोविंद हेरंब राम

त्यागस्तु तिरियं एतै र्विमुक्तः कौंतेय तमोद्वारैस्तम सो नरकस्य दुःखमोहात्मकस्य द्वाराणि कामादयो विपेकलक्षणानि तैरेतै
स्त्रिभिर्विमुक्तो नर आचरत्यनुतिष्ठति किमात्मनः श्रेयो यत् प्रतिबंधः पूर्वं नाचरति तदपगमादाचरति ततस्तदाचरणात् याति पर
 गतिं मोक्षमपीति २२ सर्वस्यैतस्यासुरीसंपत्परिवर्जनस्य श्रेय आचरणस्य च शास्त्रं कारणं शास्त्रप्रमाणादुभयं शक्यं कर्तुं नान्य
थातः यः शास्त्रविधिं कर्तव्याकर्तव्यज्ञानकारणं विधिप्रतिषेधाख्यमुत्सृज्य वर्तते कामकारतः कामप्रयुक्तः सन्न स सिद्धिं
पुरुषार्थयोग्यतामाप्नोति नाप्यस्मिंल्लोके सुखं नापि परां प्रकृष्टां गतिं स्वर्गं मोक्षं वा २३ तस्मात् शास्त्रं प्रमाणं ज्ञानसाधनं ते तव कार्याका
र्यव्यवस्थितौ कर्तव्याकर्तव्यव्यवस्थायां अतो ज्ञात्वा बुध्वा शास्त्रविधानोक्तं विधिर्विधानं शास्त्रेण विधानं शास्त्रविधानं कुर्यान्न कु
र्यादित्येवंलक्षणं तेनोक्तं स्वकर्म यत्कर्तुमिहार्हसि इहेति कर्माधिकारभूमेः प्रदर्शनार्थमिति २४ इति श्रीमत्परमहंसपरिव्रा
ज० गीताभाष्ये दैवासुरसंपद्विभागयोगो नाम षोडशोध्यायः १६ ६७ तस्माच्छास्त्रं प्रमाणं ते इति भगवद्वाक्यात्

एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनः श्रेयस्ततो याति परां गतिं २२ यः शास्त्रविधिमुत्सृज्य वर्त
ते कामकारतः न स सिद्धिमवाप्नोति न सुखं न परां गतिं २३ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ज्ञात्वा शा
स्त्रविधानोक्तं कर्म कर्तुमिहार्हसि २४ हरिॐतत्स० १६ षोडशोध्यायः १६ १० ५

अर्जुन उवाच ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः १ ॥

लब्धप्रश्नबीजोर्जुन उवाच ये केचिदविशेषिताः शास्त्रविधिं शास्त्रविधानं श्रुतिस्मृतिशास्त्रचोदनामुत्सृज्य परित्यज्य य
जंते देवादीन् पूजयंति श्रद्धयास्तिक्यबुध्यान्विताः संयुक्ताः संतः श्रुतिलक्षणं स्मृतिलक्षणं वा कंचित् शास्त्रविधिमप
श्यंतो वृद्धव्यवहारदर्शनादेव श्रद्दधानतया ये देवादीन् पूजयंति त इह ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विता इति गृ
ह्यंते तेषामेवंभूतानां ये पुनः कंचिच्छास्त्रविधिमुपलभमाना एव तमुत्सृज्यायथाविधि देवादीन् पूजयंति ते इह ये शास्त्रविधि
मुत्सृज्य यजंत इति न परिगृह्यंते कस्मात् श्रद्धयान्वितत्वविशेषणात् देवादिपूजाविधिपरं किंचित् शास्त्रं पश्यंत एव तदु
त्सृज्याश्रद्दधानतया तद्विहितायां देवादिपूजायां श्रद्धयान्विताः प्रवर्तंत इति न शक्यं कल्पयितुं यस्मात्तस्मात् पूर्वो
क्ता एव ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विता इत्यत्र गृह्यंते तेषामेवंभूतानां निष्ठा तु का कृष्ण सत्वमाहो रजस्त
मः किं सत्वं निष्ठावस्थानं अहोस्वित् रजोऽथवा तम इति १ ॐ नमो भगवते वासुदेवाय नमः हेरंब राम

145
1948

यां तेषां देवादिविषया पूजा सा किं सात्विक्याहोस्विद्राजसी उत तामसीति। सामान्यविषयः प्रश्नोनाप्रविभज्य प्रतिवचनमर्हती
ति भगवानुवाच त्रिविधा त्रिःप्रकारा भवति श्रद्धा यस्यां निष्ठायां त्वं पृच्छसि देहिनां सा स्वभावजा जन्मांतरकृतो धर्मादिसंस्कारो
मरणकाले अभिव्यक्तः स्वभाव उच्यते ततो जाता स्वभावजा सात्विकी सत्वनिर्वृत्ता देवपूजादिविषया राजसी रजोनिर्वृत्ता यक्षरक्षः
पूजादिविषया तामसी तमसो निर्वृत्ता प्रेतपिशाचादिविषया एवं पूजा त्रिविधां तामुच्यमानां श्रद्धां शृणु २ सैवं त्रिविधा भवती
ति सत्वानुरूपा विशिष्टसंस्कारोपेतांतःकरणानुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवति भारत यद्येवं ततः किं स्यादित्युच्यते
श्रद्धामयः श्रद्धाप्रायः अयं पुरुषः संसारी जीवः कथं यो यच्छ्रद्धो या श्रद्धा यस्य जीवस्य स यच्छ्रद्धः स एव तच्छ्रद्धानुरूप एव त
त् स एव जीवः ३ ततश्च कार्येण लिंगेन देवादिपूजया सत्वादिनिष्ठानुमेयेत्याह यजंते पूजयंते सात्विकाः सत्वादिनिष्ठा

श्रीभगवानुवाच त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्विकी राजसी चैव तामसी चेति तां शृणु २ सत्वानु
रूपा सर्वस्य श्रद्धा भवति भारत श्रद्धामयोयं पुरुषो यो यच्छ्रद्धः स एव सः ३ यजंते सात्विका देवान् यक्षरक्षांसि राज
साः प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ४ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः दंभाहंकारसंयुक्ताः का
मरागबलान्विताः ५ कर्षयंतः शरीरस्थं भूतग्राममचेतसः मां चैवांतःशरीरस्थं तान्विध्यासुरनिश्चयान् ६

न् यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्च सप्तमातृकादींश्चान्ये यजंते तामसा जनाः ४ एवं कार्यतो निर्णीताः सत्वादिनि
ष्ठा शास्त्रविधुत्सर्गे तत्र कश्चिदेव सहस्रेषु देवपूजादितत्परः सत्वनिष्ठो भवति बाहुल्येन तु रजोनिष्ठास्तमोनिष्ठाश्चैव प्राणि
नो भवंति कथं अशास्त्रविहितं न शास्त्रविहितं घोरं पीडाकरं प्राणिनामात्मनश्च तपस्तप्यंते निर्वर्तयंति ये तपो जनास्ते च दं
भाहंकारसंयुक्ताः दंभश्च अहंकारश्च दंभाहंकारौ ताभ्यां संयुक्ताः दंभाहंकारसंयुक्ताः कामरागबलान्विताः कामश्च
रागश्च कामरागौ तत्कृतं बलं कामरागबलं तेनान्विताः कामरागबलान्विताः ५ कर्षयंतः कृशीकुर्वंतः शरीरस्थं भूतग्रामं
करणसमुदायमचेतसः अविवेकिनो मां चैवतत्कर्मबुद्धिसाक्षिभूतमंतःशरीरस्थं कर्षयंतो मदनुशासनाकरणमेव तत्कर्ष
णं तान्विध्यासुरनिश्चयान् आसुरो निश्चयो येषां ते आसुरनिश्चयास्तान् परिहरणार्थं विद्धि इत्युपदेशः ६ ॥

आहाराणां चरस्य स्निग्धादिवर्गत्रयरूपेण भिन्नानां यथाक्रमं सात्विकराजसतामसपुरुषप्रियत्वदर्शनमिह क्रियते रस्य स्नि
ग्धादिष्वाहारविशेषेष्वात्मनः प्रीत्यतिरेकेण लिंगेन सात्विकत्वं राजसत्वं तामसत्वं च बुध्वा रजस्तमोलिंगानां आहाराणां परिवर्जना
र्थं सत्वलिंगानां चोपादानार्थं तथा यज्ञादीनामपि सत्वादिगुणभेदेन त्रिविधत्वप्रतिपादनमिह राजसतामसानि बुध्वा कथं नु नाम प
रित्यजेत सात्विकान्येवानुतिष्ठेदित्येवमर्थमाह आहारस्त्वपि सर्वस्य भोक्तुस्त्रिविधो भवति प्रियः इष्टस्तथा यज्ञस्तथा दानं तथा त
पामाहारादीनां भेदमिमं वक्ष्यमाणं शृणु ७ आयुश्च सत्वं च बलं चारोग्यं च सुखं च प्रीतिश्च तासां विवर्धनाः आयुःसत्वबलारो
ग्यसुखप्रीतिविवर्धनाः ते च रस्या रसोपेताः स्निग्धाः स्नेहवंतः स्थिराश्चिरकालस्थायिनो देहे हृद्या हृदयप्रियाः आहाराः
सात्विकप्रियाः सात्विकस्येष्टाः ८ कटुश्चाम्लश्च लवणश्चात्युष्णः अतिशब्दः कट्वम्लादिषु सर्वत्र योज्यो अतिकटु अतितीक्ष्ण
त्येवं कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहारा राजसस्येष्टा दुःखशोकामयप्रदाः दुःखं च शोकं चामयं च प्रयच्छंतीति दुः

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ७ आयुःसत्वबलारोग्यसुखप्रीतिवि
वर्धनाः रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ८ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहारा राज
सस्येष्टा दुःखशोकामयप्रदाः ९ यातयामं गतरसं पूति पर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं १०
अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्विकः ११ अभिसंधाय तु फलं दंभार्थमपि
चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं १२ विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते १३

खशोकामयप्रदाः ९ यातयामं मंदपक्वं निर्वीर्यस्य गतरसेनाक्तत्वात् गतरसं रसवियुक्तं पूति दुर्गंधि पर्युषितं च पक्वं सत् रात्र्यंत
रितं यच्च तत् उच्छिष्टमपि भुक्तशिष्टमुच्छिष्टममेध्यमयज्ञार्हं भोजनमीदृशं तामसप्रियं १० अथेदानीं यज्ञस्त्रिविध उच्यते अफलाकां
क्षिभिः अफलार्थिभिर्यज्ञो विधिदृष्टः शास्त्रचोदनादृष्टो यो यज्ञ इज्यते निर्वर्त्यते यष्टव्यमेवेति यज्ञस्वरूपनिर्वर्तनमेव कार्यमिति म
नः समाधाय तेनानेन पुरुषार्थो मम कर्तव्य इत्येवं विनिश्चित्य स सात्विको यज्ञ उच्यते ११ अभिसंधाय तु दिश्य फलं दंभार्थमपि च
एवं यत् इज्यते हे भरतश्रेष्ठ तं यज्ञं विद्धि राजसं १२ विधिहीनं यथाचोदितविधिविपरीतमसृष्टान्नं ब्राह्मणेभ्यो न सृष्टमन्नं
दत्तं यस्मिन् यज्ञे सोऽसृष्टान्नस्तमसृष्टान्नं मंत्रहीनं मंत्रतः स्वरतो वर्णतश्च वियुक्तं मंत्रहीनं अदक्षिणमुक्तदक्षिणारहि
तं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते तमोनिर्वृत्तं कथयंति १३ ॥ ॥

147
1943

अथेदानीं तपस्त्रिविधमुच्यते देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञास्तेषां पूजनं शौचमार्जवं ऋजुत्वं ब्रह्मचर्य
महिंसा च शारीरं निर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव कार्यकरणादिभिः साध्यं शारीरं तप उच्यते १४ पंचैते तस्य हेतव इति वक्ष्य
ति अनुद्वेगकरं प्राणिनामदुःखकरं वाक्यं सत्यं प्रियहितं च यत् प्रियहिते दृष्टादृष्टार्थे अनुद्वेगकरत्वादिभिर्धर्मैर्वाक्यं विशेष्य
ते विशेषणधर्मसमुच्चयार्थश्चशब्दः परप्रत्ययनार्थं प्रयुक्तस्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वानामन्यतमेन द्वाभ्यां त्रिभि
र्वा विहीनता स्याद्यदि न तद्वाङ्मयं तपः तथा सत्यवाक्यस्येतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा हीनतायां न वाङ्मयं तपस्त्वं तथा प्रि
यवाक्यस्याप्यन्यतमेन द्वाभ्यां त्रिभिर्वा वियुक्तस्य न वाङ्मयं तपस्त्वं तथा हितवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा वियुक्त
स्य न वाङ्मयं तपस्त्वं किं पुनस्तत्तपो यत् सत्यं वाक्यमनुद्वेगकरं प्रियं हितं च यत्तत्परमं तपो वाङ्मयं यथा शांतो भव वत्स स्वाध्यायं
योगं चानुतिष्ठ तथा ते श्रेयो भविष्यतीति स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यत इति मनःप्रसादो मनसः प्रशांतिः स्वच्छता

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते १४ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते १५ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्तपो मानसमु
च्यते १६ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते १७ सत्कारमानपूजार्थं तपो दंभेन चैव

पादनं मनसः सौम्यत्वं यत्सौमनस्यमाहुर्मुखादिप्रसादकार्यान्तःकरणस्य वृत्तिर्मौनं वाक्संयमो हि मनःसंयमपूर्वको भवतीति
कार्येण कारणमुच्यते मनःसंयमो मौनमिति आत्मविनिग्रहो मनोनिरोधः सर्वतः सामान्यरूप आत्मविनिग्रहो वाग्विषयस्य
च मनसः संयमो मौनमिति विशेषः भावसंशुद्धिः परैर्व्यवहारकाले मायावित्वं भावसंशुद्धिरित्येतत्तपो मानसमुच्यते १६
यथोक्तं कायिकं वाचिकं मानसं च तपस्तप्तं नरैः सत्वादिभेदेन कथं त्रिविधं भवतीत्युच्यते श्रद्धया आस्तिक्यबुध्या परया प्रकृष्ट
या तप्तमनुष्ठितं तपस्तत्प्रकृतं त्रिविधं त्रिप्रकारं अधिष्ठानं नरैरनुष्ठातृभिरफलाकांक्षिभिः फलाकांक्षारहितैर्युक्तैः समा
हितैर्यदीदृशं तपस्तत्सात्विकं सत्वनिर्वृत्तं परिचक्षते कथयंति शिष्टाः १७ सत्कारमानपूजार्थं सत्कारः साधुकारः साधुरयं
तपस्वी ब्राह्मण इत्येवमर्थं मानो माननं प्रत्युत्थानाभिवादनादिस्तदर्थं पूजा पादप्रक्षालनार्चनाशनादिभिस्तदर्थं च त
पः सत्कारमानपूजार्थं दंभेन चैव यत् क्रियते तत्तप इह प्रोक्तं कथितं राजसं चलं कदाचित्कालमपहत्य कादाचित्का

रुक्तेनाध्रुवं १८ मूढग्राहेणाविवेकनिश्चयेनात्मनः पीडया क्रीयते तपः परस्योत्सादनार्थं वा विनाशार्थं वा तत्तपस्तामसमु
दाहृतं १९ इदानीं दानभेद उच्यते दातव्यमित्येवं मनः कृत्वा यद्दानं दीयते नुपकारिणे प्रत्युपकारासमर्थाय समर्थायापि निरपे
क्षं दीयते देशे पुण्ये कुरुक्षेत्रादौ काले संक्रान्त्यादौ पात्रे च षडंगविद्वेदपारग इत्यादौ तद्दानं सात्विकं स्मृतं २० यत्तु दानं प्रत्युपकारा
र्थं कालेत्वयं मां प्रत्युपकरिष्यतीत्येवमर्थं फलं वास्य दानस्य मे भविष्यत्यदृष्टमिति तदुद्दिश्य पुनः दीयते च परिक्लिष्टं खेदसंयु
क्तं तद्राजसं स्मृतं २१ अदेशकाले अपुण्ये देशे म्लेच्छाशुच्यादिसंकीर्णे अकाले पुण्यहेतुत्वेनाप्रख्याते संक्रान्त्यादिविशेषरहि
ते पात्रेभ्यश्च मूर्खतस्करादिभ्यो देशादि संपत्तौ वा सत्कृतं प्रियवचनपादप्रक्षालनपूजादिरहितमवज्ञातं पात्रपरिभवयुक्तं य
द्दानं तत्तामसमुदाहृतं २२ यज्ञदानतपःप्रभृतीनां सद्गुण्यकरणायायमुपदेश उच्यते ॐतत्सदित्येवं निर्देशो निर्दिश्यते
नेनेति निर्देशस्त्रिविधो नाम निर्देशो ब्रह्मणः स्मृतश्चिंतितो वेदान्तेषु ब्रह्मविद्भिर्ब्राह्मणास्तेन निर्देशेन त्रिविधेन दाश्चयज्ञ

क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं १८ मूढग्राहेणात्मनो यत्पीडया क्रियते तपः परस्योत्सादनार्थं वा तत्तामसमुदाहृतं १९
दातव्यमिति यद्दानं दीयतेनुपकारिणे देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं २० यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः दी
यते च परिक्लिष्टं तद्दानं राजसं स्मृतं २१ अदेशकाले यद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतं २२ ॐतत्स
दिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा २३ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां २४ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः
सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते २६

ज्ञाश्च विहिताः निर्मिताः पुरा पूर्वमिति २३ तन्निर्देशस्तुत्यर्थमुच्यते तस्मादोमित्युदाहृत्योच्चार्य यज्ञदानतपःक्रियाः यज्ञादिस्व
रूपाः क्रियाः प्रवर्तन्ते विधानोक्ताः विधिनोक्ताः शास्त्रचोदिताः सततं सर्वदा ब्रह्मवादिनां ब्रह्मवदनशीलानां २४ तदित्यनभिसंधाय त
दिति ब्रह्माभिधानमुच्चार्य अनभिसंधाय च कर्मणः फलं यज्ञतपःक्रिया यज्ञक्रियास्तपःक्रियाश्च यज्ञतपःक्रियाः दानक्रियाश्च विविधा
क्षेत्रहिरण्यप्रदानादिलक्षणाः क्रियन्ते निर्वर्त्यन्ते मोक्षकांक्षिभिर्मोक्षार्थिभिर्मुमुक्षुभिः २५ ॐतच्छब्दयोर्विनियोग उक्तोऽथेदानीं सच्छब्दस्य
विनियोगः कथ्यते सद्भावे सतः सद्भावे यथा अविद्यमानस्य पुत्रस्य जन्मनि तथा साधुभावे च असद्वृत्तस्यासाधोः सद्वृत्ततासाधुभावस्त
स्मिन् साधुभावे च सदित्येतदभिधानं ब्रह्मणः प्रयुज्यते तथा प्रशस्ते कर्मणि विवाहादौ च तथा सच्छब्दः पार्थ युज्यते २६

149
1943

इत्येतत् यज्ञे तपसि दाने च या स्थितिस्तत्परतया स्थितिः सदिति चोच्यते विद्वद्भिः कर्म चैव तदर्थीयं य
ज्ञदानतपोर्थीयं अथवा यस्याभिधानत्रयं प्रकृतं तदर्थः यं ईश्वरार्थीयमित्येतत् सदित्येवाभिधीयते तदेतद्यज्ञदानतप आदिक
र्मासात्विकं त्रिगुणमपि श्रद्धापूर्वकं ब्रह्मणोभिधानत्रयप्रयोगेण सद्गुणं सात्विकं सम्यक् संपादितं भवति २७ तत्र च सर्वत्र श्रद्धा
प्रधानतया सर्वं संपाद्यते यस्मात्तस्मात् अश्रद्धया हुतं हवनं कृतं दत्तं ब्राह्मणेभ्यो अश्रद्धया तप्तं तपः कृतं यत् अनुष्ठितमश्रद्धया
तथा श्रद्धयैव कृतं स्तवनस्तुतिनमस्कारादि तत्सर्वमसदित्युच्यते मत्प्राप्तिसाधनमार्गबाह्यत्वात् पार्थ न च तत् बहुलायासम
पि प्रेत्य फलाय नो अपि इहार्थं साधुभिः निंदितत्वादिति २८ इति श्रीम० शंकरभगवता कृतौ भगवद्गीतार्थे सप्तदशोध्यायः १७
सर्वस्यैव गीताशास्त्रस्यार्थोऽस्मिन् अध्याये उपसंहृत्य सर्वश्च वेदार्थो वक्तव्य इत्येवमर्थोयमध्याय आरभ्यते सर्वेषु अतीतेषु अ
ध्यायेषूक्तोऽर्थोऽस्मिन्नध्याये वगम्यते अर्जुनस्तु संन्यासत्यागशब्दार्थयोरेव विशेषं बुभुत्सुः अर्जुन उवाच संन्यासस्य संन्यास

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते कर्म चैव तदर्थीयं सदित्येवाभिधीयते २७ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च
यत् असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह २८ ॐतत्स० सप्तदशोध्यायः १७ अर्जुन उवाच संन्यासस्य महाबा
हो तत्त्वमिच्छामि वेदितुं त्यागस्य च हृषीकेश पृथक् केशिनिषूदन १ श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो
विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे ३

शब्दार्थस्येत्येतत् महाबाहो तत्त्वं तस्य भावस्तत्त्वं याथात्म्यमित्येतत् इच्छामि वेदितुं ज्ञातुं त्यागस्य च त्यागशब्दार्थस्येत्येतत् हृषीकेश
पृथक् इतरेतरविभागतः केशिनिषूदन केशी नाम हयच्छद्मा असुरस्तं निषूदितवान् भगवान् वासुदेवस्तेन तन्नाम्ना संबोध्यते अ
र्जुनेन १ तत्र तत्र निर्दिष्टौ संन्यासत्यागशब्दौ न निर्लुंठितार्थौ पूर्वेष्वध्यायेष्वतोऽर्जुनाय पृथक्त्वेन तन्निर्णयाय भगवानुवाच का
म्यानां अश्वमेधादीनां कर्मणां न्यासं परित्यागं संन्यासं संन्यासशब्दार्थमनुष्ठेयत्वेन प्राप्तस्यानुष्ठानं कवयः पंडिताः के चिद्वि
विजानंति नित्यनैमित्तिकानामनुष्ठीयमानानां सर्वकर्मणामात्मसंबंधितया प्राप्तस्य फलस्य परित्यागः सर्वकर्मफलत्यागस्तं प्रा
हुः कथयंति त्यागं त्यागशब्दार्थं विचक्षणाः पंडिताः २ यदि काम्यकर्मपरित्यागः फलपरित्यागो वार्थो वक्तव्यः सर्वथा परित्या
गमात्रं संन्यासत्यागशब्दयोरेकार्थः स्यान्न घटपटशब्दाविव जात्यंतरभूतार्थौ ननु नित्यनैमित्तिकानां कर्मणां फलमेव नास्ती
त्याहुः कथमुच्यते तेषां फलत्याग इति यथा वंध्याः पुत्रत्यागो नैष दोषो नित्यानामपि कर्मणां भगवता फलवत्त्वस्येष्टत्वात् यस्य

तिहि भगवान् त्यक्तनिष्टमिष्टमिति न तु सन्यासिनामिति च सन्यासिनामेव हि केवलं कर्मफलासंबंधं दर्शयन् सन्यासिनां नि
त्यकर्मफलप्राप्तिं प्रसंगं च वस्त्यागिनां प्रेत्यतिर्दर्शयति त्याज्यं त्यक्तव्यं दोषवत् दोष अस्यास्तीति दोषवत् किं तत् कर्म बंधहेतुत्वात् सर्वमे
वाथवा दोषो यथा रागादिस्त्यज्यते तद्वत्त्याज्यमित्येके कर्म प्राहुर्मनीषिणः पंडिताः सांख्यादिदृष्टिमाश्रिताः ननु ज्ञाननिष्ठाव्युत्था
यिनः सन्यासिनः अधिकृतानां कर्मिणामपीति तत्रैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे कर्मिण एवाधिकृतान् पश्ये
ते विकल्पाः ननु ज्ञाननिष्ठान् व्युत्थायिनः सन्यासिनोपेक्ष्य ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्तेति कर्माधिकारादपोद्धृ
तायेन तावत् ते प्रति चिंतानानु कर्मयोगेन योगिनामिस्य धिकृताः पूर्वं विभक्तनिष्ठा अपि इह सर्वशास्त्रोपसंहारप्रकरणे यथा विचा
र्यंते तथा सांख्यानपि ज्ञाननिष्ठान् विचारयितुमिति न तेषां मोहदुःखनिमित्तत्यागानुपपत्तेर्न कायक्लेशनिमित्तं दुःखं सांख्या आत्म
नि पश्यंति इच्छादीनां क्षेत्रधर्मत्वेनैव दर्शितत्वात् अतस्ते न कायक्लेशदुःखभयात्कर्म परित्यजंति नापि ते कर्माण्यात्मनि पश्यंति
येन नियतं कर्म मोहात्परित्यजेयुः गुणानां कर्म नैव किंचित्करोमीति हि ते सन्यस्यंति सर्वकर्माणि मनसा सन्यस्येत्यादिभिर्हि तत्त्व
विदः सन्यासप्रकार उक्तः तस्मात् येन्ये अधिकृताः कर्मण्यनात्मविदो येषां च मोहात्त्यागः संभवति कायक्लेशभयाच्च एते एवा

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ४

मसा त्यागिनो राजसा श्चेति निंद्यंते कर्मिणामनात्मज्ञानां कर्मफलत्यागस्तुत्यर्थं सर्वारंभपरित्यागी मौनी संतुष्टो येन केनचि
त् अनिकेतः स्थिरमतिरिति गुणातीतलक्षणे न च परमार्थसन्यासिनो विज्ञापितत्वात् वक्ष्यति च ज्ञानस्य या परा निष्ठेति तस्मा
त् ज्ञाननिष्ठाः सन्यासिनो नेह विवक्षिताः कर्मफलत्याग एव सात्विकत्वेन गुणेनतामसत्वाद्यपेक्षया सन्यास उच्यते न मुख्य
सर्वकर्मसन्यासः अनेककर्मसन्यासासंभववचनं हि देहभृत्त्वेतिहेतुवचनानामुख्यस्य वानिर्वत न हेतुवचनस्य स्तुत्यर्थता यथा
त्यागाच्छांतिरनंतरमिति कर्मफलत्यागस्तुतिरेव यथोक्तानेकपक्षानुष्ठानाशक्तिमंतम ज्ञमर्जुनं प्रति विधानात् तथेदमपि हेत्व
न हि देहभृता शक्यमिति कर्मफलत्यागस्तुत्यर्थवचनं न सर्वकर्माणि मनसा सन्यस्य नैव कुर्वन्न कारयन्नास्त इत्यस्य पक्षस्याप
वादः केनचिद्दर्शयितुं शक्यः तस्मात्कर्मण्यधिकृतानामेवैष सन्यासत्यागविकल्पः ये तु परमार्थदर्शिनः सांख्यास्तेषां ज्ञान ७५
निष्ठायामेव सर्वकर्मसन्यासलक्षणायामधिकारो नान्यत्रेति न ते विकल्पार्हाः तथोपपादितमस्माभिर्वेदाविनाशिनमित्यस्मि
न् प्रदेशे तृतीयादौ च तस्मात् ते तेषु विकल्पभेदेषु ३ निश्चयं शृणु अवधारय मे मम तत्र त्यागसन्यासविकल्पे यथादर्शि

157
1943

ते भरतसत्तम भरतानां साधुसत्तम त्यागो हि त्यागसन्यासशब्दवाच्यो हि योर्थः स एक एवेत्यभिप्रेत्याह त्यागो हीति पुरुषव्या
घ्र त्रिविधः त्रिःप्रकारस्तामसादिप्रकारैः संप्रकीर्तितः सम्यक्शास्त्रेषु कथितो यस्मात्तामसादिभेदेन त्यागः ४ सन्यासशब्दवा
च्यार्थो ऽधिकृतस्य कर्मिणो ऽनात्मज्ञस्य त्रिविधः संभवति न परमार्थदर्शिन इत्ययमर्थो दुर्ज्ञानः तस्माद्वक्तं नान्योवक्तुं समर्थ
स्तस्मान्निश्चयं परमार्थशास्त्रार्थविषयमध्यवसायमैश्वरं मे वचनं शृणु कः पुनरसौ निश्चय इत्याह यज्ञोदानं तप इत्येतत् त्रिविधं कर्म
न त्याज्यं न त्यक्तव्यं कार्यं करणीयमेव तत् कस्मात् यज्ञो दानं तपश्चैव पावनानि विशुद्धिकारणानि मनीषिणां फलानभिसंधीनामि
त्येतत् ५ एतान्यपि तु कर्माणि यज्ञदानतपांसि पावनान्युक्तानि संगमासक्तिं तेषु त्यक्त्वा फलानि च तेषां त्यक्त्वा परित्यज्य कर्तव्यानी
त्यनुष्ठेयानीति मे मम निश्चितं मतमुत्तमं निश्चयं शृणु मे तत्रेति प्रतिज्ञाय पावनत्वं च हेतुमुक्त्वा एतान्यपि कर्माणि कर्तव्यानीत्येत
त् निश्चितं मतमुत्तममिति प्रतिज्ञातार्थोपसंहार एव न अपूर्वार्थं वचनमेतान्यपीति प्रकृतसन्निकृष्टार्थत्वोपपत्तेः सासंगस्य फ

यज्ञोदानं तपः कर्म न त्याज्यं कार्यमेव तत् यज्ञो दानं तपश्चैव पावनानि मनीषिणां ५ एतान्यपि तु कर्माणि संगं त्यक्त्वा फला
नि च कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ६ नियतस्य तु सन्यासः कर्मणो नोपपद्यते मोहात्तस्य परित्यागस्तामसः
परिकीर्तितः ७ दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ८ ५

लार्थिनो बंधहेतूनि एतान्यपि मुमुक्षोः कर्तव्यानीत्यपिशब्दार्थो न तु अन्यानि कर्माण्यपेक्ष्य एतान्यपीत्युच्यते अन्ये तु वर्णयंति नित्यानां
कर्मणां फलाभावात् संगं त्यक्त्वा फलानि चेति नोपपद्यते एतान्यपीति यानि काम्यानि कर्माणि नित्येभ्यो ऽन्यानि एतान्यपि कर्तव्या
नि किमुत यज्ञदानतपांसि नित्यानीति तदसत् नित्यानामपि कर्मणां फलवत्त्वस्योपपादितत्वात् यज्ञो दानं तपश्चैव पावनानीत्या
दि वचनेन नित्यान्यपि कर्माणि बंधहेतुत्वाशंकया जिहासोर्मुमुक्षोः कुतः काम्येषु संगः दूरेणात्यवरं कर्मेति च निंदितत्वात् यज्ञार्था
त् कर्मणोन्यत्रेति च काम्यकर्मणां बंधहेतुत्वस्य निश्चितत्वात् त्रैगुण्यविषया वेदाः त्रैविद्या मां सोमपाः क्षीणे पुण्ये मर्त्यलोकं वि
शंतीति च दूरव्यवहितत्वाच्च न काम्येषु एतान्यपीति व्यपदेशः ६ तस्मादज्ञस्याधिकृतस्य मुमुक्षोः नियतस्य तु नित्यस्य सन्यासः प
रित्यागः कर्मणो नोपपद्यते अज्ञस्य पावनत्वस्येष्टत्वात् मोहादज्ञानात्तस्य नियतस्य परित्यागो नियतं चावश्यकर्तव्यं त्यज्यते चेति विप्रति
षिद्धमतो मोहनिमित्तः परित्यागस्तामसः परिकीर्तितो मोहश्च तम इति ७ किंच दुःखमित्येव यत्कर्म कायक्लेशभयात् शरीरदुःखभयात् त्यजेत् प
रित्यजेत् स कृत्वा राजसं त्यागं राजसं निर्वर्त्य त्यागं नैव त्यागफलं ज्ञानपूर्वस्य सर्वकर्मत्यागस्य फलं मोक्षाख्यं न लभेत न लभते ८ ७

गी०भा० कः पुनः सात्त्विकस्त्यागः कार्यं कर्तव्यमित्येव यत्कर्म नियतं नित्यं क्रियते निर्वर्त्यते हेऽर्जुन संगं त्यक्त्वा फलं चैव नित्यानां कर्मणां
फलवत्त्वे भगवद्वचनं प्रमाणमवोचाम अथवा यद्यपि फलं न श्रूयते नित्यस्य कर्मणस्तथापि नित्यं कर्म कृतमात्मसंस्कारं प्रत्यवायप
७६ रिहारं वा फलं करोत्यात्मन इति कल्प्यत एवाज्ञेन तत्रापि कल्पनां निवारयति फलं त्यक्त्वेत्यनेन अतः साधूक्तं संगं त्यक्त्वा फलं चे
ति स त्यागो नित्यकर्मसु संगफलत्यागः सात्त्विकः सत्त्वनिर्वृत्तो मतोऽभिमतः ९ ननु कर्मफलत्यागस्त्रिविधः संन्यास इति प्रकृत
स्तत्र तामसो राजसश्चोक्तस्त्यागः कथमिह संगफलत्यागस्तृतीयत्वेनोच्यते यथा त्रयो ब्राह्मणा आगतास्तत्र षडंगविदौ द्वौ
क्षत्रियस्तृतीय इति तद्वत् नैष दोषः त्यागसामान्येन स्तुत्यर्थत्वात् अस्ति हि कर्मसंन्यासस्य फलाभिसंधित्यागस्य च त्यागत्व
सामान्यं तत्र राजसतामसत्वेन कर्मत्यागनिंदया कर्मफलाभिसंधित्यागः सात्त्विकत्वेन स्तूयते स त्यागः सात्त्विको मत इति
यस्त्वधिकृतः संगं त्यक्त्वा कर्म करोति तस्य फलरागादिना अकलुषीक्रियमाणमंतःकरणं नित्यैश्च कर्मभिः संस्क्रियमाणं वि
शुध्यति तद्विशुद्धं प्रसन्नमात्मालोचनक्षमं भवतीति तस्यैव नित्यकर्मानुष्ठानेन विशुद्धांतःकरणस्यात्मज्ञानाभिमुखस्य

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ९ न द्वेष्ट्यकुशलं कर्म कुश
ले नानुषज्जते त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः १० नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥

क्रमेण यथा तन्निष्ठा स्यात् तद्वक्तव्यमित्याह न द्वेष्टि अकुशलं अशोभनं काम्यं कर्म शरीरारंभद्वारेण संसारकारणं किमनेनेत्येवं
कुशले शोभने नित्ये कर्मणि सत्त्वशुद्धिज्ञानोत्पत्तितन्निष्ठाहेतुत्वेन मोक्षकारणमिदमित्येवं नानुषज्जते तत्रापि प्रयोजनं न मन्यमान
स्यानुषंगं प्रीतिं न करोतीत्येतत् कः पुनरसौ त्यागी पूर्वोक्तेन संगफलत्यागेन तद्वान् त्यागी यः कर्मणि संगं त्यक्त्वा तत्फलं च नित्य
कर्मानुष्ठायी स त्यागी कदा पुनरसावकुशलं कर्म न द्वेष्टि कुशले नानुषज्जत इत्युच्यते सत्त्वसमाविष्टः यदा सत्त्वेनात्मानात्म
विवेकविज्ञानहेतुना समाविष्टः संव्याप्तः संयुक्त इत्येतत् अत एव मेधावी मेधया आत्मज्ञानलक्षणया प्रज्ञया संयुक्तस्तद्वान् मे
धावी मेधावित्वादेव छिन्नसंशयः छिन्नो विदारितः संशयो यस्यात्मस्वरूपावस्थानमेव परं निःश्रेयसं तत्साधनं नान्य
त्किंचिदित्येवं निश्चयेन छिन्नसंशयः १० योऽधिकृतः पुरुषः पूर्वोक्तेन प्रकारेण कर्मयोगानुष्ठानेन क्रमेण संस्कृतात्मा स ७६
न् जन्मादिविक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेन संबुद्धः स सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नासीनो
नैष्कर्म्यलक्षणां ज्ञाननिष्ठामश्नुत इत्येतत् पूर्वोक्तस्य कर्मयोगस्य प्रयोजनमनेन श्लोकेनोक्तं यः पुनरधिकृतः सन्

153
1943

देहात्माभिमानित्वेन देहभृदज्ञोऽबाधितात्मकर्तृत्वविज्ञानतयाऽहं कर्तेति निश्चितबुद्धिस्तस्याशेषकर्मपरित्यागस्याशक्य
त्वात् कर्मफलत्यागेन चोदितकर्मानुष्ठाने एवाधिकारो न तत्त्याग इत्येतमर्थं दर्शयितुमाह नहीति यस्माद्देहभृत् देहं बिभर्तीति
देहभृत् देहात्माभिमानवान् देहभृदुच्यते नहि विवेकी स हि वेदाविनाशिनमित्यादिना कर्तृत्वाधिकारान्निवर्तितोऽतस्तेन देह
भृता अज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माण्यशेषतो निःशेषेण तस्मात् यस्त्वज्ञोऽधिकृतो नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी क
र्मफलाभिसंधिमात्रसंन्यासी स त्यागीत्यभिधीयते कर्म्यपि सन्निति स्तुत्यभिप्रायेण तस्मात्परमार्थदर्शिनैवादेहभृता देहा
त्मभावरहितेनाशेषकर्मसंन्यासः शक्यते कर्तुं ११ किं पुनस्तत्प्रयोजनं यत् सर्वकर्मपरित्यागात्स्यादित्युच्यते अनिष्टं
नरकतिर्यगादिलक्षणं इष्टं देवादिलक्षणं मिश्रं इष्टानिष्टसंयुक्तं मनुष्यलक्षणं चैवं त्रिविधं त्रिःप्रकारं कर्मणो धर्माध
र्मलक्षणस्य फलं बाह्यानेककारकव्यापारनिष्पन्नं सदविद्याकृतमिंद्रजालमायोपमं महामोहकरं प्रत्यगात्मोपसंधारक

यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ११ अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं भवत्यत्यागिनां प्रेत्य न तु संन्या
सिनां क्वचित् १२ पंचैतानि महाबाहो कारणानि निबोध मे सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां १३

ल्गुतया लयमदर्शनं गच्छतीति फलमिति फलनिर्वचनं तदेतदेवंलक्षणं च फलं भवत्यत्यागिनामज्ञानां कर्मिणामपरमार्थ
संन्यासिनां प्रेत्य शरीरपातादूर्ध्वं न तु परमार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्वचित् नहि केवलसम्यक्
दर्शननिष्ठा अविद्यादिसंसारबीजं नोन्मूलयंति कदाचिदित्यर्थः १२ अतः परमार्थदर्शिन एवाशेषकर्मसंन्यासित्वं संभ
वत्यविद्याध्यारोपितत्वादात्मनि क्रियाकारकफलानां न त्वज्ञस्याधिष्ठानादीनि क्रियाकारकाण्यात्मत्वेन पश्य
तोऽशेषकर्मसंन्यासः संभवतीति तदेतदुत्तरैः श्लोकैर्दर्शयति पंचैतानि वक्ष्यमाणानि महाबाहो कारणानि निर्वर्तकानि
निबोध मे इत्युक्तं चेतसः समाधानार्थं वस्तुवैषम्यदर्शनार्थं तानि कारणानि ज्ञातव्यतया स्तौति सांख्ये ज्ञातव्याः
पदार्थाः संख्यायंते यस्मिन् शास्त्रे तत्सांख्यं वेदांतः कृतांत इति तस्यैव विशेषणं कृतमिति कर्मोच्यते तस्यांतः कृतस्य परिस
माप्तिः यत्र स कृतांतः कर्मांत इत्येतत् यावानर्थ उदपाने सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इत्यात्मज्ञाने संजाते स
र्वकर्मणां निवृत्तिं दर्शयति १३ रामगोविंद गोविंद रामराम गोविंद कृष्णगोविंद गोविंद कृष्ण कृष्ण गोविंद हरे

गी॰ भा॰ अतः तस्मिन्नात्मज्ञानार्थे सांख्ये कृतांते वेदांते प्रोक्तानि कथितानि सिध्यये निष्पत्त्यर्थं सर्वकर्मणां तानि कानीत्युच्यते अधिष्ठा
नमिच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयोऽधिष्ठानं शरीरं तथा कर्ता उपाधिलक्षणोऽहंकारोऽभोक्ता करणं च श्रोत्रादि श
७६ ब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं द्वादशसंख्यं विविधाश्च पृथक्चेष्टा वायवीयाः प्राणापानाद्या दैवं चैवात्र दैवमेवात्रैतेषु
चतुर्षु पंचमं पंचानां पूरणमादित्यादि चक्षुराद्यनुग्राहकं १४ शरीरवाङ्मनोभिर्यत्कर्म त्रिभिरेतैः प्रारभते निर्वर्तयति नरः
न्याय्यं वा धर्म्यं शास्त्रीयं विपरीतं वा अशास्त्रीयमधर्म्यं यच्चापि निमिषितचेष्टितादि जीवनहेतुस्तदपि पूर्वकृतधर्माधर्मयोरेव
कार्यमिति न्याय्यविपरीतयोरेव ग्रहणेन गृहीतं पंचैते यथोक्तास्तस्य सर्वस्यैव कर्मणो हेतवः कारणानि ननु अधिष्ठाना
दीनि सर्वकर्मणां निर्वर्तकानि कथमुच्यते शरीरवाङ्मनोभिः कर्म प्रारभत इति नैष दोषः विधिप्रतिषेधलक्षणं सर्वं कर्म शरी
रादित्रयप्रधानं तदंगतया दर्शनश्रवणादि च जीवनलक्षणं त्रिधैव राशीकृतमुच्यते शरीरादिभिरारभ्यत इति फलकाले
अधिष्ठानं तथा कर्ता करणं च पृथग्विधं। विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमं १४ शरीरवाङ्मनोभिर्यत्कर्म
प्रारभते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः १५ तत्रैवं सति कर्तारमात्मानं केवलं तु यः पश्यत्यकृतबु
द्धित्वान्न स पश्यति दुर्मतिः १६ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमाँल्लोकान्न हंति न निबध्य १७
पि तत्प्रधानैर्भुज्यत इति पंचानामेव हेतुत्वं न विरुध्यते १५ तत्रेति प्रकृतेन संबध्यते एवं सति एवं यथोक्तैः पंचभिर्हेतुभिर्नि
र्वर्त्ये सति कर्मणि तत्रैवं सतीति दुर्मतित्वस्य हेतुत्वेन संबध्यते तत्रैतेषु एवं पूर्वोक्तेषु आत्मानन्यत्वेन अधिष्ठानादिष्वनन्यत
यात्मन अन्यत्वेनाविद्यया परिकल्पितैः क्रियमाणस्य कर्मणः अहमेव कर्तेति कर्तारमात्मानं केवलं तु शुद्धं तु यः पश्यत्यबु
द्धिः कस्मात् वेदांताचार्योपदेशन्यायैरकृतबुद्धित्वात् असंस्कृतबुद्धित्वात् योऽपि देहादिव्यतिरिक्तात्मवादी आत्मान
मेव केवलं कर्तारं पश्यत्यसावप्यकृतबुद्धिरेवातोऽकृतबुद्धित्वान्न स पश्यत्यात्मनस्तत्त्वं कर्मणो वा तत्त्वमतो दुर्मतिः कुत्सि
ता विपरीता दुष्टा जन्मजननमरणप्रतिपत्तिहेतुभूता मतिरस्येति दुर्मतिः स पश्यन्नपि न पश्यति यथा तैमिरिकोऽनेक
चंद्रं यथा वाभ्रेषु धावत्सु चंद्रं धावंतं यथा वाहने उपविष्टोऽन्येषु धावत्स्वात्मानं धावंतं १६ कः पुनः सुमतिर्यः सम्यक्प
श्यतीत्युच्यते यस्य शास्त्राचार्योपदेशन्यायसंस्कृतात्मनो न भवत्यहंकृतोऽहं कर्तेत्येवंलक्षणो भावो भावना अहमेतस्य

135
1843

चाधिष्ठानादयो विद्ययात्मनि कल्पिताः सर्वकर्मणां कर्तारो नाहमहं तु तद्व्यापाराणां साक्षिभूतोऽप्राणो ह्यमनाः शुभ्रो
ह्यक्षरात्परतः परः केवलोऽविक्रिय इत्येवं पश्यतीत्येतत् बुद्धिरंतःकरणं यस्यात्मन उपाधिभूता न लिप्यते स सुमतिः स पश्य
ति हत्वापि स इमाँल्लोकान् सर्वान् प्राणिन इत्यर्थः न हंति हननक्रियां न करोति न निबध्यते नापि तत्कार्येणाधर्मफलेन संब
ध्यते ननु हत्वापि न हंतीति विप्रतिषिद्धमुच्यते यद्यपि स्तुतिः नैष दोषः लौकिकपारमार्थिकदृष्ट्यपेक्षयात् उपपत्तेः देहा
द्यात्मबुद्ध्याहं हंतेति लौकिकीं दृष्टिमाश्रित्य हत्वापीत्याह यथादर्शितां पारमार्थिकीं दृष्टिमाश्रित्य न हंति न निबध्यत
इति तदुभयमुपपद्यत एव ननु अधिष्ठानादिभिः संहत्यैवात्मा करोत्येव कर्तृत्वानुपपत्तेः विक्रियावतोऽन्यैः संहननं संभवति संहत्य वा कर्तृत्वं
स्यान्नत्वविक्रियस्यात्मनः केनचित्संहननमस्तीति न संभूय कर्तृत्वमुपपद्यते ततः केवलत्वमात्मनः स्वाभाविकमिति केवलत्वा
न्नुवादमात्रमविक्रियत्वं चात्मनः श्रुतिस्मृतिन्यायप्रसिद्धमविकार्योऽयमुच्यते गुणैरेव कर्माणि क्रियंते शरीरस्थोऽपि
न करोतीत्येतदसकृदुपपादितं गीतास्वेव तावत् श्रुतिषु च ध्यायतीव लेलायतीवेत्येवमाद्यासु न्यायतश्च निरवयवमप
रतंत्रमविक्रियमात्मतत्त्वमिति राजमार्गः विक्रियावत्त्वाभ्युपगमेऽप्यात्मनः स्वकीयैव विक्रिया स्वस्य भवितुमर्हति इति नाधिष्ठा
नादीनां कर्माण्यात्मकर्तृकाणि स्युः नहि परस्य कर्म परेणाकृतमागंतुमर्हति यत्तु विद्यया गमितं न तत्तस्य यथा तत्त्वं न शुक्ति
कायाः यथा वा तत्र मलिनत्वं वा लेगमितमविद्ययानाकाशस्य तथाधिष्ठानादिविक्रियापि तेषामेवेति नात्मनस्तस्मात्सुक्त
मेव अहंकृतत्वात्तत्त्वबुद्धिलेपाभावाद्विद्वान्न हंति न निबध्यत इति एवं च सति देहभृत्त्वाभिमानानुपपत्तेऽविद्याकृताशेषक
र्मसंन्यासादि हेतुवचनेनाविक्रियत्वमात्मन उक्त्वा वेदाविनाशिनमिति विदुषः कर्माधिकारनिवृत्तिं शास्त्रादौ संक्षेपत उ
क्त्वा मध्ये प्रसारितं तत्र तत्र प्रसंगं कृत्वेहोपसंहरति शास्त्रार्थपिंडीकरणाय विद्वान्न हंति न निबध्यत इति एवं च सति देह
भृत्त्वाभिमानानुपपत्तेऽविद्याकृताशेषकर्मसंन्यासोपपत्तेः संन्यासिनामनिष्टादि त्रिविधं कर्मणः फलं न भवतीत्युपपन्नं
तद्विपर्ययाच्चेतरेषां भवतीत्येतच्चापरिहार्यमित्येष गीताशास्त्रस्यार्थ उपसंहृतः स एष सर्ववेदार्थसारो निपुणम
तिभिः पंडितैर्विचार्य प्रतिपत्तव्य इति तत्र तत्र प्रकरणविभागेन दर्शितोऽस्माभिः शास्त्रन्यायानुसारेण १७ अथे
दानीं कर्मणां प्रवर्तकमुच्यते ज्ञानं ज्ञानमनेनेति सर्वविषयमविशेषेणोच्यते तथा ज्ञेयं ज्ञातव्यं तदपि सामान्येनैव स

LIBRARY OF THE BOMBAY BRANCH OF THE ASIATIC SOC.

र्वमुच्यते तथापरिज्ञातोपाधिलक्षणो विद्यया कल्पितोपाधिभोक्ता इत्येतत्त्रयमेषामविशेषेण सर्वकर्मणां प्रवर्तिका त्रिविधा त्रि
प्रकारा कर्मचोदना ज्ञानादीनां हि त्रयाणां सन्निपाते हानोपादानादि प्रयोजनः सर्वः कर्मारंभः स्यात्ततः पंचभिरधिष्ठानादिभि
रारब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु करणादिषु संगृह्यत इत्येतदुच्यते करणं क्रियतेऽनेनेति बाह्यं श्रोत्रा
दि अंतस्थं बुद्ध्यादि कर्मेप्सिततमं कर्तुः क्रियया व्याप्यमानं कर्ता करणानां व्यापारयितोपाधिलक्षण इति त्रिविधः त्रिःप्रका
रः कर्मसंग्रहः संगृह्यतेऽनेनेति संग्रहः कर्मणः संग्रहः कर्मसंग्रहः कर्म एषु हि त्रिषु समवैतीति तेनायं त्रिविधः कर्मसंग्रहः १८
अथेदानीं क्रियाकारकफलानां सर्वेषां गुणात्मकत्वात् सत्त्वरजस्तमोगुणभेदेन त्रिविधो भेदो वक्तव्य इत्यारभ्यते ज्ञानं कर्म च क
र्म क्रिया न कारकं पारिभाषिकमीप्सिततमं कर्म कर्ता च निर्वर्तकः कर्मणां त्रिविध एवावधारणं गुणव्यतिरिक्त जात्यंतराभावप्रद
र्शनार्थं गुणभेदतः सत्त्वादिभेदेनेत्यर्थः प्रोच्यते कथ्यते गुणसंख्याने कापिले शास्त्रे कापिलमपि गुणसंख्यानं शास्त्रं तदपि गु

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः १८ ज्ञानं कर्म च कर्ता च त्रिधैव गुण
भेदतः प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि १९ सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तत्
ज्ञानं विद्धि सात्त्विकं २० पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं २१

णभोक्तृविषये प्रमाणमेव परमार्थब्रह्मैकत्वविषये यद्यपि विरुध्यते ते हि कापिला गुणगौणव्यापारनिरूपणे अभियुक्ता
इति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेनोपादीयत इति न विरोधः यथावद्यथान्यायं यथाशास्त्रं शृणु तान्यपि ज्ञानादी
नि तद्भेदजातानि च गुणभेदकृतानि शृणु वक्ष्यमाणे अर्थे मनःसमाधिं कुर्वित्यर्थः १९ ज्ञानस्य तावत्त्रिविधत्वमुच्यते सर्वभूते
षु अव्यक्तादि स्थावरांतेषु भूतेषु येन ज्ञानेनैकं भाववस्तु भावशब्दो वस्तुवाची एकमात्मवस्त्वित्यर्थः अव्ययं न व्येति स्वात्मना स्व
धर्मैर्वा कूटस्थं नित्यमित्यर्थः ईक्षते येन ज्ञानेन पश्यति तं च भावं अविभक्तं प्रतिदेहं विभक्तेषु देहभेदेषु न विभक्तं तदात्मव
स्तु व्योमवन्निरंतरमित्यर्थः तज्ज्ञानमद्वैतात्मदर्शनं सात्त्विकं सम्यग्दर्शनं विद्धीति २० यानि द्वैतदर्शनान्यसम्यग्भूतानि
राजसानि तामसानि चेति नेसाक्षात् संसारोच्छित्तये भवंति पृथक्त्वेन तु भेदेन प्रतिशरीरमन्यत्वेन यत्तु ज्ञानं नानाभावान्भि
न्नानात्मनः पृथग्विधान्पृथक्प्रकारान्भिन्नलक्षणानित्यर्थः वेत्ति विजानाति यज्ज्ञानं सर्वेषु भूतेषु ज्ञानस्य कर्तृत्वा
संभवात् येन ज्ञानेन वेत्तीत्यर्थः तज्ज्ञानं विद्धि राजसं रजोनिर्वृत्तं २१ ॥ ॥ ७

157/1943

यत्तु ज्ञानं कृत्स्नवत्समस्तवत्सर्वविषयमिवैकस्मिन्कार्ये देहे बहिर्वा प्रतिमादौ सक्तमेतावानेवात्मा ईश्वरो वा नातः परमस्ती
ति यथा नग्नक्षपणकादीनां शरीरानुवर्ती देहपरिमाणो जीव ईश्वरो वा पाषाणदार्वादिमात्रमित्येवमेकस्मिन्कार्ये सक्तमहेतु
कं हेतुवर्जितं अयुक्तिकमतत्त्वार्थवत् यथाभूतार्थस्तत्त्वार्थः सोऽस्यास्ति यज्ञ्ज्ञानं तत्त्वार्थवत् न तत्त्वार्थवदतत्त्वार्थवदहे
तुकत्वादेवाल्पं चाल्पविषयत्वादल्पफलत्वाद्वा तत्तामसमुदाहृतं तामसानां हि प्राणिनामविवेकिनां ज्ञानमीदृशं दृश्यते २२
अथेदानीं कर्मणस्त्रैविध्यमुच्यते नियतं नित्यं संगरहितमासक्तिवर्जितमरागद्वेषतः कृतं रागप्रयुक्तेन द्वेषप्रयुक्तेन च कृतं
रागद्वेषतः कृतं तद्विपरीतमरागद्वेषतः कृतमफलप्रेप्सुना फलं प्रेप्सतीति फलप्रेप्सुः फलतृष्णः तद्विपरीतेनाफलप्रेप्सुना क
र्त्रा कृतं कर्म यत्तत्सात्त्विकमुच्यते २३ यत्तु कामेप्सुना कर्मफलप्रेप्सुनेत्यर्थः कर्म साहंकारेण वेति नेत तत्त्वज्ञानापेक्षया किंत
र्हि लौकिकश्रोत्रियनिरहंकारापेक्षया यो हि परमार्थनिरहंकार आत्मवित्तस्य कामेप्सुत्वबहुलायासकर्तृत्वप्राप्तिरस्तिसा

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहेतुकं अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं २२ नियतं संगरहितमरागद्वेषतः कृतं
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते २३ यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः क्रियते बहुलायासं तद्राजसमुदाह
तं २४ अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मोहादारभ्यते कर्म यत्तत्तामसमुच्यते २५ मुक्तसंगोऽनहंवादी धृत्युत्सा
हसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते २६

ति कस्यापि कर्मणो नाम वित्साहंकारः कर्ता किमुत राजसतामसयोः लोके अनात्मविदपि श्रोत्रियो निरहंकार उच्यते निरहंकारोऽयं
ब्राह्मण इति तस्मात्तदपेक्षयैव साहंकारेण वेत्युक्तं पुनःशब्दः पादपूरणार्थः क्रियते बहुलायासं कर्त्रा महतायासेन निर्वर्त्यते तत्कर्म
राजसमुदाहृतं २४ अनुबंधपश्चाद्भावि यद्वस्तु तदनुबंध उच्यते तं चानुबंधं क्षयं यस्मिन्कर्मणि क्रियमाणे शक्तिक्षयो अर्थक्षयो वा स्या
त्तं क्षयं हिंसां प्राणिपीडनमनपेक्ष्य च पौरुषं पुरुषकारं शक्नोमीदं कर्म परिसमापयितुमित्येवमात्मसामर्थ्यमित्येतान्यनुबंधादीन्य
नपेक्ष्य च पौरुषं तानि मोहादविवेकत आरभ्यते यत्कर्म तत्तामसं तमोनिर्वृत्तमुच्यते २५ मुक्तसंगो मुक्तः परित्यक्तः संयोगेन समुक्त
संगो येन स मुक्तसंगोऽनहंवादी नाहं वदनशीलो धृत्युत्साहसमन्वितो धृतिर्धारणमुत्साह उद्यमस्ताभ्यां समन्वितः संयुक्तो धृत्यु
त्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः क्रियमाणस्य कर्मणः फलसिद्ध्यावसिद्धौ च सिद्ध्यसिद्ध्योर्निर्विकारः केवलं शास्त्र
प्रमाणप्रयुक्तो न फलरागादिना अयुक्तो यः स निर्विकार उच्यते एवंभूतः कर्ता यः स सात्त्विक उच्यते २६ हेरंब राम

गी०भा० रागीरागस्यास्तीति रागी कर्मफलप्रेप्सुः कर्मफलार्थी लुब्धः परद्रव्येषु संजाततृष्णः तीर्थादौ स्वद्रव्यापरित्यागी हिंसात्मकः प
रपीडात्मकस्वभावोऽशुचिः बाह्यांतःशौचवर्जितः हर्षशोकान्वितः इष्टप्राप्तौ हर्षोऽनिष्टप्राप्तौ इष्टवियोगे च शोकस्ताभ्यां हर्षशो
७८ काभ्यां समन्वितः संयुक्तस्तस्यैव वा कर्मणः संपत्तिविपत्त्योर्हर्षशोकौ स्यातां ताभ्यां संयुक्तोऽयः कर्ता स राजसः परिकीर्तितः २७
अयुक्तोऽसमाहितचेताः प्राकृतोऽत्यंतासंस्कृतबुद्धिर्बालसमः स्तब्धो दंडवन्नमति कस्मैचिन्न शठः मायावी शक्तिगूहनकारी
नैष्कृतिकः परवृत्तिच्छेदनपरः अलसोऽप्रवृत्तिशीलः कर्तव्येष्वपि विषादी सर्वदावसन्नस्वभावो दीर्घसूत्री च कर्तव्यानां दीर्घप्र
सारणः सर्वदा मंदस्वभावः यदद्यश्वो वा कर्तव्यं तन्मासेनापि न करोति यश्चैवंभूतः कर्ता तामस उच्यते २८ बुद्धेर्भेदं धृतेश्चै
व भेदं गुणतः सत्त्वादिगुणतस्त्रिविधं शृण्विति सूत्रोपन्यासः प्रोच्यमानं कथ्यमानमशेषेण निरवशेषं पृथक्त्वेन वि
वेकतो धनंजय दिग्विजये मानुषं दैवं च प्रभूतं धनमर्जयत् तेनासौ धनंजयोऽर्जुनः २९ प्रवृत्तिं च प्रवृत्तिः प्रवर्तनं बंधहेतुः कर्ममा

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः २७ अयुक्तः प्राकृतः स्तब्धः शठो
नैष्कृतिकोऽलसः विषादी दीर्घसूत्री च कर्ता तामस उच्यते २८ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु प्रोच्यमानमशेषेण पृ
थक्त्वेन धनंजय २९ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ३० यया धर्ममधर्मं च
कार्यं चाकार्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ३१ अधर्मं धर्ममिति या मन्यते तमसावृता सर्वार्थान्
विपरीतांश्च बुद्धिः सा पार्थ तामसी ३२

र्गो निवृत्तिं च निवृत्तिर्मोक्षहेतुः संन्यासमार्गः बंधमोक्षसमान्यवाक्यत्वात् प्रवृत्तिनिवृत्तिकर्मसंन्यासमार्गावित्यवगम्यते
कार्याकार्ये विहितप्रतिषिद्धे कर्तव्याकर्तव्ये करणाकरणे इत्येतत् कस्मिंश्चित् कालाद्यपेक्षया दृष्टादृष्टार्थानां कर्मणां भया
भये बिभेत्यस्मादिति भयं चोरव्याघ्रादि न भयमभयं चाभयं च भयाभये दृष्टादृष्टार्थयोर्भयाभययोः कारणमित्यर्थः बंधं हेरंब
सहेतुकं यो वेत्ति विजानाति बुद्धिः सा पार्थ सात्विकी तत्र ज्ञानं बुद्धेर्वृत्तिः बुद्धिस्तु वृत्तिमती धृतिरपि वृत्तिविशेष एव बुद्धेः ३०
यया धर्मं शास्त्रचोदितं अधर्मं च तत्प्रतिषिद्धं कार्यं चाकार्यमेव च पूर्वोक्ते एव कार्याकार्ये अयथावत् यथावन्न सर्वतो निर्ण ७८
येन प्रजानाति या बुद्धिः सा पार्थ राजसी ३१ अधर्मं प्रतिषिद्धं धर्मं विहितमिति या मन्यते जानाति तमसावृता सती
सर्वार्थान् विपरीतांश्च विपरीतानेव विजानाति बुद्धिः सा पार्थ तामसी ३२ गोविंद हेरंब ओं नमो भगवते वासुदेव

159/1943

धृत्या यया अव्यभिचारिण्या इत्यव्यवहितेन संबंधो धारयते किं मनः प्राणेंद्रियक्रियाः मनश्च प्राणश्चेंद्रियाणि च मनःप्राणेंद्रि
याणि च तेषां क्रियाः चेष्टास्ता उच्छास्त्रमार्गप्रवृत्तेर्धारयति धृत्या हि धार्यमाणा उच्छास्त्रमार्गविषया न भवंति योगेन समाधिनाव्य
भिचारिण्या नित्यं समाध्यनुगतयेत्यर्थः एतदुक्तं भवति अव्यभिचारिण्या धृत्या मनःप्राणेंद्रियक्रिया धार्यमाणा योगेन धारयतीति
या एवंलक्षणा धृतिः सा पार्थ सात्त्विकी ३३ यया तु धर्मकामार्थान् धर्मं च कामं चार्थं च तान् धर्मकामार्थान् धृत्या यया धारयते
मनसि नित्यमेव कर्तव्यरूपान् अवधारयत्यर्जुन प्रसंगेन यस्य यस्य धर्मादेर्धारणप्रसंगस्तेन तेन प्रसंगेन च फलाकांक्षी च भवति
यः पुरुषस्तस्य धृतिः सा पार्थ राजसी ३४ यया स्वप्नं निद्रां भयं चास्तं शोकं संतापं विषादं मदं विषण्णतां मदं विषयसेवामा
त्मनो बहु मन्यमानो मत्त इव मदमेव च मनसि नित्यमेव कर्तव्यरूपतया कुर्वन् न विमुंचति धारयत्येव दुर्मेधाः कुत्सितमेधाः पुरु
षो यस्तस्य धृतिः सा तामसी मता ३५ गुणभेदेन क्रियाणां कारकाणां च त्रिविधो भेद उक्तोऽथेदानीं फलस्य सुखस्य त्रिविधो भेद

धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ३३ यया तु धर्मकामार्थान् धृत्या धारयते
ऽर्जुन प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ३४ यया स्वप्नं भयं शोकं विषादं मदमेव च न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ३५
सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ३६ यत्तदग्रे विषमिव परिणामेऽमृतोपमं त
त्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजं ३७ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं परिणामे विषमिव तत्सुखं राजसं स्मृतं ३८

उच्यते सुखं त्विदानीं त्रिविधं शृणु समाधानं कुर्वित्येतत् मे मम भरतर्षभ अभ्यासात् परिचयादावृत्तेः रमते रतिं प्रपद्यते यत्र यस्मि
न् सुखानुभवे दुःखांतं च दुःखावसानं दुःखोपशमनं च निगच्छति निश्चयेन प्राप्नोतीति ३६ यत्तत्सुखमग्रे पूर्वं प्रथमसन्निपाते ज्ञा
नवैराग्यध्यानसमाध्यारंभे अत्यंतायासपूर्वकत्वाद्विषमिव दुःखात्मकं भवति परिणामे ज्ञानवैराग्यादिपरिपाकजं सुखममृ
तोपमं तत्सुखं सात्त्विकं प्रोक्तं विदुषां आत्मनो बुद्धिरात्मबुद्धिः प्रसादो नैर्मल्यं सलिलवत्स्वच्छता तेनाजातमात्मबुद्धिप्रसा
दजं आत्मविषया वा आत्मालंबना बुद्धिस्तत्प्रसादप्रकर्षाज्जातमित्येतत्तस्मात्सात्विकं तत् ३७ विषयेंद्रियसंयो
गात् यत्सुखं जायते तदग्रे प्रथमक्षणेऽमृतोपममपि तत्सर्वं परिणामे विषमिव बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहे
तुत्वात् अधर्मं तज्जनितनरकादिहेतुत्वाच्च परिणामत उपभोगविपरिणामांते विषमिव तत्सुखं राजसं स्मृतं ३८

यदग्रे चानुबंधे चावसाने तत्काले सुखं मोहनं मोहकरमात्मनो निद्रालस्यप्रमादोत्थं निद्रा चालस्यं च प्रमादश्च तेभ्य उत्तिष्ठ
तीति निद्रालस्यप्रमादोत्थं तत्तामससमुदाहृतं ३९ अथेदानीं प्रकरणोपसंहारार्थः न तदस्ति तन्नास्ति पृथिव्यां वा मनुष्या
दिषु सत्त्वं प्राणिजातमन्यद्वा प्राणि दिवि देवेषु वा पुनः सत्त्वं प्रकृतिजैः प्रकृतितो जातैरेभिस्त्रिभिर्गुणैः सत्त्वादिभिर्विमुक्तं परि
त्यक्तं यत्स्यादुद्भवेन्न तदस्तीति पूर्वेण संबंधः सर्वः संसारः क्रियाकारकफललक्षणः सत्त्वरजस्तमोगुणात्मको विद्याकल्पितः स
मूलोऽनर्थ उक्तो वृक्षरूपकल्पनया चोर्ध्वमूलमित्यादिना तं चासंगशस्त्रेण दृढेन छित्वा ततः पदं तत्परिमार्गितव्यमिति चोक्तं
तत्र च सर्वस्य त्रिगुणात्मकत्वात्संसारकारणनिवृत्त्यनुपपत्तौ प्राप्तायां यथा तन्निवृत्तिः स्यात्तद्वक्तव्यं सर्वश्च गीताशास्त्रार्थ उपसं
हर्तव्य एतावानेव च सर्वो वेदस्मृत्यर्थः ४० पुरुषार्थमिच्छद्भिरनुष्ठेय इत्येवमर्थं च ब्राह्मणक्षत्रियविशामित्यादिरारभ्यते ब्राह्मणा
श्च क्षत्रियाश्च विशश्च ब्राह्मणक्षत्रियविशस्तेषां ब्राह्मणक्षत्रियविशां शूद्राणामसमासकरणमेकजातित्वे सति वेदानधिका

यदग्रे चानुबंधे च सुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९ न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४० ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ४१

रात्हे परंतप कर्माणि प्रविभक्तानि इतरेतरविभागेन व्यवस्थापितानि केन स्वभावप्रभवैर्गुणैः स्वभाव ईश्वरस्य प्रकृतिस्त्रिगुणात्मि
का माया सा प्रभवो येषां गुणानां ते स्वभावप्रभवास्तैः शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनामथवा ब्राह्मणस्वभावस्य सत्त्व
गुणः प्रभवः कारणं तथा क्षत्रियस्य स्वभावस्य सत्त्वोपसर्जनं रजः प्रभवः वैश्यस्वभावस्य तम उपसर्जनं रजः प्रभवः शूद्रस्वभावस्य
रज उपसर्जनं तमः प्रभवः प्रशांत्यैश्वर्येहामूढस्वभावदर्शनाच्चतुर्णामथवा जन्मांतरकृतसंस्कारः प्राणिनां वर्तमानजन्म
नि स्वकार्याभिमुखत्वेनाभिव्यक्तः स्वभावः स प्रभवो येषां गुणानां ते स्वभावप्रभवाः गुणा गुणप्रादुर्भावस्य निःकारणत्वा
उपपत्तेः स्वभावः कारणमिति कारणविशेषोपादानं एवं स्वभावप्रभवैः प्रकृतिप्रभवैः सत्त्वरजस्तमोभिर्गुणैः स्वकार्यानु
रूपेण शमादीनि कर्माणि प्रविभक्तानि ननु शास्त्रविहितानि ब्राह्मणादीनां शमादीनि कर्माणि कथमुच्यते सत्त्वादिगुणप्र
विभक्तानीति नैष दोषः शास्त्रेणापि ब्राह्मणादीनां शमादीनि कर्माणि प्रविभक्तानि न गुणानपेक्ष्येति शास्त्रप्रविभ
क्तान्यपि कर्माणि गुणप्रविभक्तानीत्युच्यंते ४१ रामराम हेरंब जगद्गुरु ॐ नमो भगवते वासुदेवाय नमः

हेरंब

८०

161
1943

कानि पुनस्तानि कर्माणीत्युच्यंते शमो दमो यथा व्याख्यातार्थौ तपो यथोक्तं शारीरादि शौचं व्याख्यातं क्षांतिः क्षमा आर्जवमृजु
तैव च ज्ञानं विज्ञानमुक्तार्थमास्तिक्यं अस्तिभावः श्रद्दधानता आगमार्थेषु ब्रह्मकर्म ब्राह्मणजातेः कर्म ब्रह्मकर्म स्वभावजं यदुक्तं
स्वभावप्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति ४२ शौर्यं शूरस्य भावः तेजः प्रागल्भ्यं धृतिर्धारणं सर्वावस्थास्व
नवसादो भवति यथा धृत्योत्तंभितस्य दाक्ष्यं दक्षस्य भावः सहसा प्रत्युत्पन्नेषु कार्येष्वव्यामोहेन प्रवृत्तिर्युद्धे चाप्यपलायनम
पराङ्मुखीभावः शत्रुभ्यः दानं देयद्रव्येषु मुक्तहस्तता ईश्वरभावश्च ईश्वरस्य भावः प्रभुशक्तिप्रकटीकरणमीशितव्यान्प्र
ति क्षत्रकर्म क्षत्रजातेर्विहितं कर्म क्षात्रं कर्म स्वभावजं ४३ कृषिगोरक्ष्यवाणिज्यं कृषिश्च गोरक्ष्यं च वाणिज्यं च कृषिगोरक्ष्यवा
णिज्यं कृषिर्भूमेर्विलेखनं गोरक्ष्यं गा रक्षयतीति गोरक्षस्तस्य भावो गोरक्ष्यं पाशुपाल्यमित्यर्थः वाणिज्यं च वणिक्कर्म क्रयवि
क्रयादिलक्षणं वैश्यकर्म वैश्यजातेः कर्म वैश्यकर्म स्वभावजं परिचर्यात्मकं शुश्रूषास्वभावं च कर्म शूद्रस्यापि स्वभावजं ४४

शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं ४२ शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चा
प्यपलायनं दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजं ४३ कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं परिचर्यात्मकं कर्म
शूद्रस्यापि स्वभावजं ४४ स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ४५
यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ४६ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठि

एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गः प्राप्तिः फलं स्वभावतो वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय
ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यंत इत्यादिस्मृतिभ्यः पुराणे च वर्णिनामाश्र
मिणां च लोकफलभेदविशेषस्मरणात्तु कारणांतरात्किंचिद्वक्ष्यमाणं फलं तत्तदुच्यते स्वे स्वे यथोक्तलक्षणभेदे कर्मण्यभिरतः
तत्परः संसिद्धिं स्वकर्मानुष्ठानादशुद्धिक्षये सति कार्येंद्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां संसिद्धिं लभते प्राप्नोति नरोऽधि
कृतः पुरुषः किं स्वकर्मनिष्ठात एव साक्षात्संसिद्धिं न कथं तर्हि स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण विंदति तच्छृणु ४५ य
तः यस्मात्प्रवृत्तिरुत्पत्तिश्चेष्टा वा यस्मादंतर्यामिण ईश्वराद्भूतानां प्राणिनां स्यात् येनेश्वरेण सर्वमिदं जगत्ततं व्याप्तं स्वकर्मणा पूर्वो
क्तेन प्रतिवर्णं तमीश्वरमभ्यर्च्य पूजयित्वाराध्य केवलं ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं विंदति मानवो मनुष्यः यत एवमतः ४६
श्रेयान्प्रशस्यतरः स्वो धर्मः स्वधर्मो विगुणोपीत्यपिशब्दो द्रष्टव्यः परधर्मात्स्वनुष्ठितात् स्वभावनियतं स्वभावेन नियतं यदुक्तं

गी० भा०

८२

स्वभावजमिति तदेवोक्तं स्वभावनियतमिति यथा विषजातस्य कृमेर्विषं न दोषकरं तथा स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषं पापं स्वभावनियतं कर्म कुर्वाणो विषजइव कृमिः किल्बिषं नाप्नोतीत्युक्तं ४७ परधर्मस्य भयावह इत्यनात्मज्ञस्य न हि कश्चित्क्षणमपि कर्मकृत्तिष्ठतीत्यतः सहजं जन्मनैवोत्पन्नं किं कर्म सहजं कर्म कौंतेय सदोषमिति त्रिगुणात्मकत्वान्न त्यजेत् सर्वारंभाः आरभ्यंत इत्यारंभाः सर्वकर्माणीत्येतत्प्रकरणात् यः कश्चिदारंभः स्वधर्मः परधर्मश्चेति ते सर्वे सदोषाः हि यस्मात्त्रिगुणात्मकत्वमत्र हेतुस्त्रिगुणात्मकत्वाद्दोषेण धूमेन सहजो नाग्निरिवावृताः सहजस्य कर्मणः स्वधर्मस्य स्वपरित्यागेन परधर्मानुष्ठानेपि दोषान्नैव मुच्यते भयावहश्च परधर्मो न च शक्यते ऽशेषतस्त्यक्तुमज्ञेन कर्म यतस्तस्मान्न त्यजेदित्यर्थः किमशेषतस्त्यक्तुं शक्यं कर्मेति न त्यजेत् किं वा सहजस्य कर्मणस्त्यागे दोषो भवतीति किं चातो यदि तावदशेषतस्त्यक्तुमशक्यमिति न त्याज्यं सहजं कर्म तर्ह्यशेषतस्त्यागे गुण एव स्यादिति सिद्धं भवति सत्यमेवमशेषतस्त्यागस्त्वनोपपद्यत इति चेत् किं नित्यप्रचलितात्मकः पुरुषो यथा सांख्यानां गुणाः किं वा क्रियैव कारकं यथा बौद्धानां पंचस्कंधाः क्षणप्रध्वंसिनः उभयथापि कर्मणो ऽशेषतस्त्यागो न संभवत्येव

स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषं ४७ सहजं कर्म कौंतेय सदोषमपि न त्यजेत् सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः ४८

तीयो ऽपि पक्षो यदा करोति तदा सक्रियं वस्तु यदा न करोति तदा निःक्रियं तदेव तत्रैवं सति शक्यं कर्माशेषतस्त्यक्तुमयं तस्मिन्नन्तीयपक्षे विशेषो न नित्यप्रचलितं वस्तु नापि क्रियैव कारकं किं तर्हि व्यवस्थिते द्रव्ये ऽविद्यमाना क्रियोत्पद्यते विद्यमाना च विनश्यति शुद्धं द्रव्यं शक्तिमदवतिष्ठत इत्येवमाहुः काणादास्तदेव च कारणमित्यस्मिन्पक्षे को दोष इत्ययमेव तु दोषो यत्त्वभागवतं मतमिदं कथं यज्ञापयत आह भगवान् नासतो विद्यते भाव इत्यादि काणादानां ह्यसतो भावः सतश्चाभाव इतीदं मतमभागवतं तथापि न्याययत्वे को दोष इति चेदुच्यते दोषवत्त्वमिदं सर्वप्रमाणविरोधात् कथं यदि तावद्व्यणुकादि द्रव्यं प्रागुत्पत्तेरत्यंतमेवासदुत्पन्नं च स्थितं कंचित्कालं पुनरत्यंतमेवासत्त्वमापद्यते तथा च सत्यसदेव सज्जायते ऽभावो भावो भवति भावश्चाभाव इति तत्राभावो जायमानः प्रागुत्पत्तेः शशविषाणकल्पः समवाय्यसमवायिनिमित्ताख्यं कारणमपेक्ष्य जायत इति न चैवमभाव उत्पद्यते कारणं चापेक्षत इति शक्यं वक्तुमसत्त्वाच्छशविषाणादीनामदर्शनात् भावात्मकाश्चेत् घटादय उत्पद्यमानाः किंचिदभिव्यक्तिमात्रकारणमपेक्ष्योत्पद्यंत इति शक्यं प्रतिपत्तुं किं वा सत्त्वस्य सद्भावे सतश्चासद्भावे न क्वचित्प्रमाणप्रमेयव्यवहारे विश्वासः कस्यचित्स्यात् सदेवासदसदेवेति निश्चयानुपपत्तेः किं चासद्यत इति ह्यणुकादेर्द्रव्यस्य स्वकारणसत्तासंबंधमाहुः प्रागुत्पत्तेश्चासत्

देवदु

८३

श्चात्कारकव्यापारमपेक्ष्य समवायिकारणैः परमाणुभिः स्वसत्तया च समवायलक्षणेन संबंधेन संबध्यते संबंधः सत्कारणसमवेते सत् भवति तत्र वक्तव्यं कथमसतः सत्कारणं भवेत् संबंधो वा केन चित्स्यात् न हि वंध्यापुत्रस्य संबंधो वा कारणं वा केन चित्प्रमाणेन कल्पयितुं शक्यं ननु नैवं वैशेषिकैरभाववस्य संबंधः कल्प्यते ह्यणुकादीनां हि द्रव्याणां स्वकारणेन समवायलक्षणः संबंधः सत्तामेवोच्यत इति न संबंधात्प्राक्सत्त्वानभ्युपगमात् न हि वैशेषिकैः कुलालचक्रदंडचक्रादिव्यापारात्प्राक्घटादीनामस्तित्वमिष्यते न च मृद एव घटाद्याकारप्राप्तिमिच्छंति तत्रश्चासत एव संबंधः पारिशेष्यादिष्टो भवति ननु असतोपि समवायलक्षणः संबंधो न विरुध्यते न वंध्यापुत्रादीनामदर्शनात् घटादेरेव प्रागभावस्य स्वकारणसंबंधो भवति न वंध्यापुत्रादेरभावस्य तुल्यत्वेपि विशेषो ऽभावस्य न कश्चिदेकस्याभावो द्वयोरभावः सर्वस्याभावः प्रागभावः प्रध्वंसाभाव इतरेतराभावो ऽत्यंताभाव इति लक्षणतो न केनचित्विशेषो दर्शयितुं शक्यते सति च विशेषे घटस्य प्रागभावः कुलालादिभिर्घटभावमापद्यते संबध्यते च भावेन कपालाख्येन स्वकारणेन संबंधः सर्वव्यवहारयोग्यश्च भवति ननु घटस्यैव प्रध्वंसाभावो ऽभावत्वे सत्यपीति प्रध्वंसाद्यभावानां न कश्चिद्व्यवहारयोग्यत्वं प्रागभावस्यैव द्व्यणुकादिद्रव्याख्यस्योत्पत्त्यादिव्यवहारार्हत्वं इत्येतदसमंजसं अभावत्वाविशेषादत्यंतप्रध्वंसाभावयोरिव ननु नैवास्माभिः प्रागभावस्य भावापत्तिरुच्यते किं तर्हि भावस्यैव हि भावापत्तिः यथा घटस्य घटापत्तिर्यथा घटस्य वा घटापत्तिः एतदप्यभावस्य भावापत्तिवदेव प्रमाणविरुद्धं सांख्यस्यापि यः परिणामपक्षः सोप्यपूर्वधर्मोत्पत्तिविनाशांगीकरणाद्वैशेषिकपक्षान्न विशिष्यते अभिव्यक्तितिरोभावांगीकरणाद्यभिव्यक्तितिरोभावयोर्विद्यमानत्वाविद्यमानत्वनिरूपणे पूर्ववदेव प्रमाणविरोधः एतेन कारणस्यैव संस्थानमुत्पत्त्यादीत्येतदपि प्रत्युक्तं पारिशेष्यात् सदेकमेवावस्तु विद्योत्पत्तिविनाशादिधर्मैर्नटवदनेकधा विकल्प्यत इतीदं भागवतं मतमुक्तं नासतो विद्यते भाव इत्यस्मिन् श्लोके सत्प्रत्ययस्याव्यभिचारात् व्यभिचाराच्चेतरेषामिति कथं तर्हि आत्मनो विक्रियत्वेनाशेषतः कर्मणस्त्यागो नोपपद्यत इति यदि वस्तुभूता गुणा यदि वा ऽविद्याकल्पिता तद्धर्मः कर्म तदात्मन्यविद्याध्यारोपितमेवेत्यविद्वान्न हि कश्चित्क्षणमप्यशेषतस्त्यक्तुं शक्नोतीत्युक्तं विद्वांस्तु पुनर्विद्ययाविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुं अविद्याध्यारोपितस्य शेषानुपपत्तेः न हि तैमिरिकदृष्ट्याध्यारोपितस्य द्विचंद्रादेस्तिमिरापगमेपि शेषो ऽवतिष्ठत एवं च सतीदं वचनमुपपन्नं सर्वकर्माणि मनसेत्यादि स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इति च या कर्मजा सिद्धिरुक्ता ज्ञाननिष्ठायोग्यतालक्षणा

163
1963

गी०भा० तस्याः फलभूता नैष्कर्म्यसिद्धिर्ज्ञाननिष्ठालक्षणा च वक्तव्येति श्लोक आरभ्यते ४९ असक्तबुद्धिरसक्ता संगरहिता बुद्धिरंतः
करणं यस्य सो सक्तबुद्धिः सर्वत्र पुत्रदारादिष्वासक्तिनिमित्तेषु जितात्मा जितो वशीकृत आत्मा अंतःकरणं यस्य स जितात्मा वि
८२ गतस्पृहो विगता स्पृहा तृष्णा देहजीवितभोगेषु यस्मात्स विगतस्पृहो य एवंभूत आत्मज्ञः स नैष्कर्म्यसिद्धिं निर्गतानि कर्माणि यस्
मान्निष्क्रियब्रह्मात्मसंबोधात्स निःकर्मा तस्य भावो नैष्कर्म्यं नैष्कर्म्यं च तत्सिद्धिश्च सा नैष्कर्म्यस्य वा सिद्धिर्निष्क्रियात्मस्वरूपा
वस्थानलक्षणस्य सिद्धिर्निष्पत्तिस्तां नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्मजसिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासे
न सम्यग्दर्शनेन तत्पूर्वकेण वा सर्वकर्मसंन्यासेनाधिगच्छति प्राप्नोति ५ १३ तथा चोक्तं सर्वकर्माणि मनसा संन्यस्य नैव कु
र्वन्न कारयन्नास्त इति पूर्वोक्तेन स्वकर्मानुष्ठानेन ईश्वराभ्यर्चनरूपेण जनितां प्रागुक्तलक्षणां सिद्धिं प्राप्तस्योत्पन्नात्मविवेक
ज्ञानस्य केवलात्मज्ञाननिष्ठारूपा नैष्कर्म्यलक्षणा सिद्धिर्येन क्रमेण भवति तद्वक्तव्यमित्याह सिद्धिं प्राप्तः स्वकर्मणेश्व
रं समभ्यर्च्य तत्प्रसादजां कायेंद्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्तः सिद्धिं प्राप्त इति तदनुवाद उत्तरार्थः॥

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ४९ सिद्धिं प्राप्तो
यथा ब्रह्म तथाप्नोति निबोध मे समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा ५०

किंतु तदुत्तरं यदर्थोनुवाद इत्युच्यते यथा येन प्रकारेण ज्ञाननिष्ठारूपेण ब्रह्म परमात्मानमाप्नोति तथा तं प्रकारं ज्ञाननि
ष्ठाप्राप्तिक्रमं मे मम वचनान्निबोध त्वं निश्चयेनावधारयेत्येतत् किं विस्तरेण नेत्याह समासेनैव संक्षेपेणैव हे कौंतेय य
था ब्रह्म प्राप्नोति तथा निबोधेति अनेन या प्रतिज्ञाता ब्रह्मप्राप्तिस्तामिदं तया दर्शयितुमाह निष्ठा ज्ञानस्य या परेति निष्ठा पर्य
वसानं परिसमाप्तिरित्येतत् कस्य ब्रह्मज्ञानस्य या परिसमाप्तिः कीदृशी सा यादृश आत्मज्ञानं कीदृक् तत् यादृश आत्मा की
दृशो सौ यादृशो सौ यादृशो भगवतोक्त उपनिषद्वाक्यैश्च न्यायतश्च ननु विषयाकारं ज्ञानं न विषयो नाप्याकारवानात्मेष्य
ते क्वचित् ननु आदित्यवर्णं भारूपः स्वयंज्योतिरित्याकारवत्त्वमात्मनः श्रूयते न तमोरूपत्वप्रतिषेधार्थत्वात्तेषां वाक्यानां द्र
व्यगुणाद्याकारप्रतिषेधे आत्मनस्तमोरूपत्वे प्राप्ते तत्प्रतिषेधार्थमादित्यवर्ण इत्यादि अरूपमिति च विशेषतो रूपप्रतिषेधादविषय ८२
त्वाच्च न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं अशब्दमस्पर्शमित्यादेस्तस्मा

165
1943

दात्माकारं ज्ञानमित्यनुपपन्नं कथं तर्ह्यात्मज्ञानं सर्वं हि यद्विषयं ज्ञानं तत्तदाकारं भवति निराकारश्चात्मेत्युक्तं ज्ञानात्म
नोरुभयोर्निराकारत्वे कथं तद्भावनानिष्ठेति नात्यंतनिर्मलत्वस्वच्छत्वसूक्ष्मत्वोपपत्तेरात्मनो बुद्धेश्चात्मवन्नैर्मल्याद्युप
पत्तेरात्मचैतन्याकाराभासत्वोपपत्तिर्बुद्ध्याभासं मनस्तदाभासानींद्रियाणींद्रियाभासश्च देहोतो लौकिकैर्देहमात्र ए
वात्मदृष्टिः क्रियते देहचैतन्यवादिनश्च लोकायतिकाश्चैतन्यविशिष्टः कायः पुरुष इत्याहुः अथान्ये इंद्रियचैतन्यवादि
नोन्ये मनश्चैतन्यवादिनोन्ये बुद्धिचैतन्यवादिनस्ततोप्यनंतरमव्यक्तमव्याकृताख्यमविद्यावस्थमात्मत्वेन प्रतिपन्नाः के
चित् सर्वत्र हि बुद्ध्यादिदेहांते आत्मचैतन्याभासतात्मभ्रांतिकारणमित्यतस्मादात्मविषयं ज्ञानं न विधातव्यं किं तर्हि नामरूपा
द्यनात्माध्यारोपणनिवृत्तिरेव कार्या नात्मचैतन्यविज्ञानं अविद्याध्यारोपितसर्वपदार्थाकारैर्विशिष्टतया गृह्यमाणत्वा
दिति अत एव हि विज्ञानवादिनो बौद्धा विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः प्रमाणांतरनिरपेक्षतां च स्वसंविदि
तत्वाभ्युपगमेन तस्मादविद्याध्यारोपणनिराकरणमात्रं ब्रह्मणि कर्तव्यं न तु ब्रह्मविज्ञाने यत्नोत्यंतप्रसिद्धत्वादविद्याक
ल्पितनामरूपविशेषाकारापहृतबुद्धित्वादत्यंतप्रसिद्धं सुविज्ञेयमासन्नतरमात्मभूतमप्यप्रसिद्धं दुर्विज्ञेयमतिदूरमन
न्यदिव प्रतिभाति अविवेकिनां बाह्याकारनिवृत्तबुद्धीनां तु लब्धगुर्वात्मप्रसादानां नातः परं सुखं सुप्रसिद्धं सुविज्ञेयं स्वास
न्नमस्ति तथा चोक्तं प्रत्यक्षावगमं धर्म्यमित्यादि केचित्तु पंडितंमन्या निराकारत्वादात्मवस्तु नोपैति बुद्धिरतो दुःसाध्या
सम्यग्ज्ञाननिष्ठेत्याहुः सत्यमेवं गुरुसंप्रदायरहितानामश्रुतवेदांतानामत्यंतबहिर्विषयासक्तबुद्धीनां सम्यक्प्रमाणे
ष्वकृतश्रमाणां तद्विपरीतानां तु लौकिकग्राह्यग्राहकद्वैतवस्तुनि सद्बुद्धिर्नितरां दुःसंपाद्या आत्मव्यतिरेकेण वस्त्वंतरस्या
नुपलब्धेर्यथा चैतदेवमेव नान्यथेति अवोचाम उक्तं च भगवता यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति तस्माद्बाह्याकार
भेदबुद्धिनिवृत्तिरेवात्मस्वरूपालंबने कारणं न ह्यात्मा नाम कस्यचित्कदाचिदप्रसिद्धः प्राप्यो हेय उपादेयो वा अप्रसि
द्धे हि तस्मिन्नात्मनि स्वार्थाः सर्वाः प्रवृत्तयो व्यर्थाः प्रसज्येरन्न च देहाद्यचेतनार्थत्वं शक्यं कल्पयितुं न च सुखार्थं सुखं दुःखार्थं वा
दुःखमात्मावगत्यवसानार्थत्वाच्च सर्वव्यवहारस्य तस्माद्यथा स्वदेहस्य परिच्छेदाय न प्रमाणांतरापेक्षा ततोप्यात्मनोंतरतम
त्वात्तदवगतिं प्रति न प्रमाणांतरापेक्षेत्यात्मज्ञाननिष्ठा विवेकिनां सुप्रसिद्धेति सिद्धं येषामपि निराकारं ज्ञानमप्रत्यक्षं ते
षामपि ज्ञानवशेनैव ज्ञेयावगतिरिति ज्ञानमत्यंतं प्रसिद्धं सुखादिवदेवाभ्युपगंतव्यं जिज्ञासानुपपत्तेश्चाप्रसिद्धं चेज्ज्ञा

गी० भा० ज्ञानं ज्ञेयं च जिज्ञास्यं न यथा ज्ञेयं घटादि लक्षणं ज्ञानेन ज्ञातुमिच्छति तथा ज्ञानमपि ज्ञानांतरेण ज्ञातुमिच्छेन्न चैव
स्ति अतोऽत्यंतप्रसिद्धं ज्ञानं ज्ञाताप्यत्यंतप्रसिद्ध इति तस्मात् ज्ञाने यत्नो न कर्तव्यः किं त्वनात्मज्ञात्मबुद्धि निवृत्तावेव तस्मा
८२ त् ज्ञानं सुसंपाद्यं सेयं ज्ञानस्य परा निष्ठोच्यते ५० कथं कार्येति बुध्याध्यवसायात्मिकया विशुद्धया मायारहितया युक्तः सं
पन्नो धृत्या धैर्येणात्मानं कार्यकरणसंघातं नियम्य च नियमनं कृत्वा वशीकृत्य शब्दादीन् शब्दआदिर्येषां ते शब्दादयस्तान् वि
षयांस्त्यक्त्वा सामर्थ्यात् शरीरस्थितिमात्रान् केवलान्मुक्त्वा ततोऽधिकान् सुखार्थान् त्यक्त्वेत्यर्थः शरीरस्थित्यर्थत्वेन प्राप्तेषु च रागद्वेषौ
व्युदस्य च परित्यज्य ततः ५१ विविक्तसेवी अरण्यनदीपुलिनगिरिगुहादीन् देशान् सेवितुं शीलमस्येति विविक्तसेवी लघ्वाशी ल
घ्वशनशीलो विविक्तसेवालघ्वशनयोर्निद्रादिदोषनिवर्तकत्वेन चित्तप्रसाददेतुत्वात् ग्रहणं वाक्कायमानसो वाक्कायमानसं
यतानि संयतानि यस्य ज्ञाननिष्ठस्य ज्ञाननिष्ठो यतिर्यतवाक्कायमानसः स्यादेवमुपरतसर्वकरणः सन् ध्यानयोगपरो ध्यानमात्म

बुध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ५१ विविक्त
सेवी लघ्वाशी यतवाक्कायमानसः ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ५२ अहंकारं
बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ५३ ८

स्वरूपचिंतनं योग आत्मविषय एकाग्रीकरणं तौ ध्यानयोगौ परत्वेन कर्तव्यौ यस्य स ध्यानयोगपरो नित्यं नित्यग्रहणं मंत्रज
पाद्यन्यकर्तव्याभावप्रदर्शनार्थं वैराग्यं विरागभावो दृष्टादृष्टेषु विषयेषु वैतृष्ण्यं समुपाश्रितो नित्यमेवेत्यर्थः ५२ किं च अहंक
रणमहंकारो देहादिषु तं बलं सामर्थ्यं कामरागादियुक्तं न तरं शरीरादिसामर्थ्यं स्वाभाविकत्वेन त्यागस्याशक्यत्वात् दर्पो नाम
हर्षानंतरभावी धर्मातिक्रमहेतुर्हृष्टो दृप्यति दृप्तो धर्ममतिक्रामतीति स्मरणात्तं च कामं क्रोधं परिग्रहं परिग्रह
मिंद्रियमनोगतदोषपरित्यागेऽपि शरीरधारणप्रसंगेन धर्मानुष्ठाननिमित्तेन वा बाह्यपरिग्रहः प्राप्तस्तं च विमुच्य परित्यज्य परमहं
सपरिव्राजको भूत्वा देहजीवनमात्रेऽपि निर्गतममभावो निर्ममोऽत एव शांत उपरतो हर्षायासौ यतिर्ज्ञाननिष्ठो ब्रह्मभूयाय ब्र
ह्मभवनाय कल्पते समर्थो भवति ५३ अत्र किंचिद्भाष्यं गलितमिवाभाति टीकानुसारादिति ८ ॥

167/1943

अनेन क्रमेण ब्रह्मभूतो ब्रह्मप्राप्तः प्रसन्नात्मा लब्धाध्यात्मप्रसादो न शोचति किंचिदर्थवैकल्यमात्मनो वा वैगुण्यं चोद्दिश्य न
शोचति न संतप्यते न कांक्षति न ह्यप्राप्तविषयाकांक्षा ब्रह्मविद उपपद्यते अतो ब्रह्मभूतस्यायं स्वभावो ऽनूद्यते न शोचति न कांक्ष
तीति न हृष्यतीति वा पाठः समः सर्वेषु भूतेषु आत्मौपम्येन भूतेषु सुखं दुःखं वा सममेव पश्यतीत्यर्थो नात्मसमदर्शनमिह तस्य व
क्ष्यमाणत्वात् भक्त्या मामभिजानातीति य एवंभूतो ज्ञाननिष्ठो मद्भक्तिं मयि परमेश्वरे भक्तिं भजनं परामुत्तमां ज्ञानलक्षणां चतुर्थीं
लभते चतुर्विधा भजंते मामित्युक्तं ततो ज्ञानलक्षणया ५४ भक्त्या मामभिजानाति भक्तिरतः करणेन भजनं सेवनं यावानहमुपा
धिकृतविस्तारभेदः यश्चाहं विध्वस्तसर्वोपाधिभेद उत्तमपुरुष आकाशकल्पस्तं मामद्वैतं चैतन्यमात्रैकरसमजममरमभयमनि
धनं तत्त्वतोऽभिजानाति ततो मामेवं तत्त्वतो ज्ञात्वा विशते तदनंतरं मामेव न अत्र ज्ञानानंतरं प्रवेशक्रिये भिन्ने विवक्षिते ज्ञात्वा विशते त
दनंतरमिति ५५ किं तर्हि फलांतराभावात् ज्ञानमात्रमेव क्षेत्रज्ञं चापि मां विद्धीत्युक्तत्वात् ननु विरुद्धमिदमुक्तं ज्ञानस्य याप

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ५४
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ५५

रा निष्ठा तया मामभिजानातीति कथं विरुद्धमपि चेदुच्यते यदैव यस्मिन् विषये ज्ञानमुत्पद्यते ज्ञातुस्तदैव तं विषयमभिजानाति वि
ज्ञातेति न ज्ञाननिष्ठां ज्ञानावृत्तिलक्षणामपेक्षत इति तस्माज्ज्ञानेन नाभिजानाति ज्ञानावृत्त्या तु ज्ञाननिष्ठयाभिजानातीति नैष दो
षो ज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्य प्रतिपक्षविहीनस्य यदात्मानुभवनिश्चयावसानत्वं तस्य निष्ठाशब्दाभिलापात् शा
स्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारिकारणं बुद्धिविशुद्ध्यादि अमानित्वादिगुणं चापेक्ष्य जनितस्य क्षेत्रज्ञपरमा
त्मैकत्वज्ञानस्य कर्त्रादिकारकभेदबुद्धिनिबंधनसर्वकर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानं सा परा ज्ञान
निष्ठेत्युच्यते सेयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता तया परया भक्त्या भगवंतं तत्त्वतोऽभिजानाति यद
नंतरमेवेश्वरक्षेत्रज्ञभेदबुद्धिरशेषतो निवर्तते अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न विरुध्यते अत्र च सर्वं निवृ
त्तिविधायि शास्त्रं वेदांतेतिहासपुराणस्मृतिलक्षणं न्यायप्रसिद्धमर्थवद्भवति विदित्वा व्युत्थायाथ भिक्षाचर्यं चरंति न्यास इमानि तपांसि
अत्यरिक्तमाहुः न्यास एवात्यरेचयदिति न्यासः कर्मणां संन्यासो वेदानिमं च लोकममुं च परित्यज्य त्यज धर्ममधर्मं च इत्यादि इह च दर्शि

तानि वाक्यानि न चैतेषां वाक्यानां आनर्थक्यं युक्तं न चार्थवादत्वं स्वप्रकरणस्थत्वात् प्रत्यगात्मविक्रिय स्वरूपनिष्ठताया मोक्षस्य
नहि पूर्वसमुद्रं जिगमिषोः प्रातिलोम्येन प्रत्यक्समुद्रं जिगमिषुणा समानमार्गत्वं संभवति प्रत्यगात्मविषयप्रत्ययसंतानकरणाभिनि
वेशश्च ज्ञाननिष्ठा साच प्रत्यक्समुद्रगमनवत् कर्मणा सहभावित्वेन विरुध्यते पर्वतसर्षपयोरिवांतरवान्विरोधः प्रमाणविदां निश्चित
स्तस्मात् सर्वकर्मसन्न्यासेनैव ज्ञाननिष्ठा कार्येति सिद्धिं स्वकर्मणा भगवतोभ्यर्चनभक्तियोगस्य सिद्धिः प्राप्तिः फलं ज्ञाननिष्ठायोग्य
तायन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना सभगवद्भक्तियोगोधुना स्तूयते शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थनिश्चयदार्ढ्याय
सर्वकर्माण्यपि प्रतिषिद्धान्यपि सदा कुर्वाणोनुतिष्ठन् मद्व्यपाश्रयो अहं वासुदेव ईश्वरो व्यपाश्रयो यस्य मम व्यपाश्रयो मय्यर्पितसर्वा
त्मभाव इत्यर्थः सोपि मत्प्रसादात् ममेश्वरस्य प्रसादादवाप्नोति शाश्वतं नित्यं वैष्णवं पदमव्ययं ५६ यस्मादेवं चेतसा विवेकबुद्ध्या
सर्वकर्माणि दृष्टादृष्टार्थानि मयीश्वरे सन्न्यस्य यत्करोषि यद्श्नासीत्युक्तन्यायेन न्यस्य शरणत्वं मच्चित्तो मय्येवार्पितं यस्य तव सत्वंमद्भ

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ५६ चेतसा सर्वकर्माणि मयि सन्न्यस्य मत्परः बु
द्धियोगमुपाश्रित्य मच्चित्तः सततं भव ५७ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ५८
यदहंकारमाश्रित्य न योत्स्य इति मन्यसे मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ५९ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ६० ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ६१

त्तोमय्येव चित्तं यस्य तव स त्वं मच्चित्तः सततं सर्वदा भव ५७ मच्चित्तः सर्वदुर्गाणि सर्वाणि दुस्तराणि संसारहेतुजातानि मत्प्रसादात्तरि
ष्यसि अतिक्रमिष्यसि अथ चेद्यदि त्वं मदुक्तमहंकारात् पंडितोहमिति न श्रोष्यसि न ग्रहीष्यसि ततस्त्वं विनंक्ष्यसि विनाशं गमिष्यसि ५८
इदं च त्वया न मंतव्यं स्वतंत्रोहं किमर्थं परोक्तं करिष्यामीति यद्येतत्त्वमहंकारमाश्रित्य न योत्स्य इति युद्धं करिष्यामीति मन्यसे चिंतयसि नि
श्चयं करोषि मिथ्यैष व्यवसायो निश्चयस्ते तव यस्मात्प्रकृतिः क्षत्रस्वभावस्त्वां नियोक्ष्यति यस्माच्च ५९ स्वभावजेन शौर्यादिना यथो
क्तेन कौंतेय निबद्धो निश्चयेन बद्धः स्वेनात्मीयेन कर्मणा कर्तुं नेच्छसि यत्कर्म मोहादविवेकतः करिष्यस्यवशोपि परवश एव तत्कर्म
यस्मात् ६० ईश्वर ईशनशीलो नारायणः सर्वभूतानां सर्वप्राणिनां हृद्देशे हृदयप्रदेशेर्जुन शुक्लांतरात्मस्वभावो विशुद्धांतःकर
ण इति अहश्च कृष्णमहरर्जुनं चेति दर्शनात् तिष्ठति स्थितिं लभते स कथं तिष्ठतीत्याह भ्रामयन् भ्रमणं कारयन् सर्वभूतानि यंत्राढ
ढानिवाधिष्ठितानीवेति विवक्षितः यद्दारु यंत्रकृतपुरुषादीनि यंत्रारूढानि मायया छद्मना भ्रामयन् तिष्ठतीति संबंधः ६१

169
1943

तमेव ईश्वरं शरणमाश्रयं संसारार्तिहरणार्थं गच्छ आश्रय सर्वभावेन सर्वात्मना हे भारत तत्प्रसादादीश्वरानुग्रहात्परां
प्रकृष्टां शांतिमुपरतिं स्थानं च मम विष्णोः परमं पदमवाप्स्यसि शाश्वतं नित्यं ६२ इत्येतत्ते तुभ्यं ज्ञानमाख्यातं कथितं गुह्याद्गोप्या
द्गुह्यतरं अतिशयेन गुह्यं रहस्यमित्यर्थः मया सर्वज्ञेनेश्वरेण विमृश्य विमर्शनमालोचनं कृत्वैतद्यथोक्तं शास्त्रमशेषेण सम
स्तं यथोक्तं चार्थजातं यथेच्छसि तथा कुरु यथा भूयोपि मयोच्यमानं शृणु ६३ सर्वगुह्यतमं सर्वेभ्यो गुह्येभ्योत्यंतरहस्यमुक्तमप्य
सकृद्भूयः पुनः शृणु मे मम परमं प्रकृष्टं वचो वाक्यं न भयान्नाप्यर्थकारणाद्वा वक्ष्यामि किं तर्हि इष्टः प्रियोसि मम दृढमव्यभिचा
रीति कृत्वा ततस्तेन कारणेन वक्ष्यामि कथयिष्यामि ते तव हितं परं ज्ञानप्राप्तिसाधनं ६४ तद्धि सर्वहितानां हिततमं किं तदित्या
ह मन्मना भव मच्चित्तो भव मद्भक्तो भव मद्भजनशीलो भव मद्याजी मद्यजनशीलो भव मां नमस्कुरु नमस्कारमपि ममैव कुरु त
त्रैवं वर्तमानो वासुदेव एव सर्वसमर्पितसाध्यसाधनप्रयोजनो मामेवैष्यसि आगमिष्यसि सत्यं ते तव प्रतिजाने सत्यां प्रतिज्ञां क

तमेव शरणं गच्छ सर्वभावेन भारत तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ६२ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यत
रं मया विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ६३ सर्वगुह्यतमं भूयः शृणु मे परमं वचः इष्टोसि मे दृढमिति ततो वक्ष्यामि
ते हितं ६४ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे ६५ सर्वधर्मान्परित्य
ज्य मामेकं शरणं व्रज अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ६६ ॥ ॥

रोमि एतस्मिन्वस्तुनीत्यर्थः यतः प्रियोसि मे एवं भगवतः सत्यप्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेरवश्यंभाविमोक्षफलमवधार्य भगवच्छ
रणैकपरायणो भवेदिति वाक्यार्थः ६५ सर्वकर्मयोगनिष्ठायाः परमं रहस्यमीश्वरशरणतामुपसंहृत्याथेदानीं कर्मयोगनिष्ठा
फलं सम्यग्दर्शनं सर्ववेदांतविहितं वक्तव्यमित्याह सर्वधर्मान् सर्वे च ते धर्माश्च सर्वधर्माः धर्मशब्देनाधर्मोपि गृह्यते नैष्कर्म्यस्य
विवक्षितत्वात् नाविरतो दुश्चरितादित्यत्र धर्ममधर्मं चेत्यादिश्रुतिस्मृतिभ्यः सर्वधर्मान्परित्यज्य सन्न्यस्य सर्वकर्माणीत्येतत् मा
मेकं सर्वात्मानं समं सर्वभूतस्थमीश्वरं अच्युतं गर्भजन्मजरामरणविवर्जितं ईश्वरमहमेवेत्येवमेकं शरणं व्रज न मत्तोन्यदस्तीति
त्येतदवधारयेत्यर्थः अहं त्वा त्वामेवं निश्चितबुद्धिं सर्वपापेभ्यः सर्वधर्माधर्मबंधनरूपेभ्यो मोक्षयिष्यामि स्वात्मभावप्रकाशीकर
णेन उक्तं नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति अतो मा शुचः शोकं मा कार्षीरित्यर्थः ६६ अस्मिन्गीताशास्त्रे परम
निःश्रेयससाधनं निश्चितं किं ज्ञानं किं वा कर्म आहोस्विदुभयमिति कुतः संशयः यज्ज्ञात्वा मृतमश्नुत इत्येवमादीनि ज्ञानाद्विचाते

गी॰शां॰भा॰ तदनंतरमित्यादीनि वाक्यानि केवलाद् ज्ञानान्निःश्रेयसप्राप्तिं दर्शयंति कर्मण्येवाधिकारस्ते कुरु कर्मैव तस्मात्त्वमित्यादीनि
कर्मणामवश्यकर्तव्यतां दर्शयंति एवं ज्ञानकर्मणोः कर्तव्यतोपदेशात् समुच्चितयोरेव निःश्रेयसहेतुत्वं स्यादिति भवेन्मतिः अथायं
किंपुनरत्र मीमांसाफलं नन्वेतदेवैतावन्यतमस्य परमनिःश्रेयससाधनता कथाराणामतो विस्तीर्णतममीमांसमेनदात्मज्ञानस्य
६५ तु केवलस्य निःश्रेयसहेतुत्वं भेदप्रत्ययनिवर्तकत्वेन कैवल्यफलावसानत्वात् क्रियाकारकफलभेदबुद्धिरविद्ययात्मनि नित्यं प्रवृत्ता
मम कर्माहं कर्तामुष्मै फलायेदं कर्म करिष्यामीति यमविद्यानादिकालप्रवृत्ता अस्या विद्याया निवर्तकमयमहमस्मि केवलोऽकर्ता
क्रियाफलशून्यो न मत्तोऽन्योस्ति कश्चिदित्येवंरूपमात्मविषयं ज्ञानमुत्पद्यमानं कर्मप्रवृत्तिहेतुभूताया भेदबुद्धेर्निवर्तकत्वात्तु शब्दः
पक्षव्यावृत्त्यर्थः न केवलेभ्यः कर्मभ्यः न च ज्ञानकर्मभ्यां समुच्चिताभ्यां निःश्रेयसप्राप्तिरिति पक्षद्वयं निवर्तयति मा कार्यत्वान्निः
श्रेयसस्य कर्मसाधनतानुपपत्तिः न हि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते केवलं ज्ञानमप्यनर्थकं तर्हि नाविद्यानिवर्तकत्वे सति
दृष्टकैवल्यफलावसानत्वात् विद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफलावसानत्वं रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तक
दीपप्रकाशफलवद्विनष्टसर्पविकल्परज्जुकैवल्यफलावसानं हि प्रकाशफलं तथा ज्ञानं तथा दृष्टार्थानां च्छिदिक्रियाग्निमंथना
दीनां व्यापृतकर्त्रादिकारकाणां द्वैधीभावाग्निदर्शनादिफलादन्यफले कर्मांतरे वा व्यापारानुपपत्तिर्यथा तथा ज्ञाननिष्ठाक्रिया
यां दृष्टार्थायां व्यापृतस्य ज्ञात्रादिकारकस्यात्मकैवल्यफलादन्यफले कर्मांतरे प्रवृत्तिरनुपपन्नेति न ज्ञाननिष्ठा कर्मसहितोपपद्य
ते भुज्याग्निहोत्रादिक्रियावत्स्यादिति चेन्न कैवल्यफले ज्ञाने क्रियाफलार्थित्वानुपपत्तेः कैवल्यफले हि ज्ञाने प्राप्ते सर्वतः संप्लुतो
दकफले कूपतडागादिक्रियाफलार्थित्वाभाववत् फलांतरे तत्साधनभूतायां वा क्रियायामर्थित्वानुपपत्तिर्न हि राज्यं प्राप्तवतः क्षेत्र
मणिव्याप्तस्य क्षेत्रमात्राभिफले व्यापार उपपद्यते तद्विषयं वार्थित्वं तस्मान्न कर्मणोस्ति निःश्रेयससाधनत्वं न च ज्ञानकर्मणोः समु
च्चितयोर्नापि ज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षाविद्यानिवर्तकत्वेन विरोधात् न हि तमस्तमसो निवर्तकं अतः केव देहत्व
लमेव ज्ञानं निःश्रेयससाधनमिति न नित्याकरणे प्रत्यवायप्राप्तेः कैवल्यस्य च नित्यत्वात् यत्तावत्केवलात् ज्ञानात् कैवल्यस्य
प्राप्तिरित्येतदसत् यतो नित्यानां कर्मणां श्रुत्युक्तानामकरणे प्रत्यवायो नरकादिप्राप्तिलक्षणः स्यात् ननु एवं तर्हि कर्मभ्यो मो ६८
क्षो नास्तीत्यनिर्मोक्ष एव नैष दोषो नित्यत्वान्मोक्षस्य नित्यानां कर्मणामनुष्ठानात् प्रत्यवायाप्राप्तिः प्रतिषिद्धस्य चाकरणात् अ
निष्टशरीरानुपपत्तिः काम्यानां च वर्जनादिष्टशरीरानुपपत्तिर्वर्तमानशरीरारंभकस्य च कर्मणः फलोपभोगात् क्षये पतितेऽस्मिन्शरी

67/1943

शरीरे देहांतरोत्पत्तौ च कारणाभावाद्रागादीनां चाकरणे स्वरूपावस्थानमेव कैवल्यमित्ययत्नसिद्धं कैवल्यमिति अतिक्रां
तानेकजन्मांतरकृतस्य स्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगानुपपत्तेः क्षयाभाव इति चेन्न नित्यकर्मानुष्ठानायास
दुःखोपभोगस्य तत्फलोपभोगत्वोपपत्तेः प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थानि च नित्यकर्माण्यारब्धानां चोपभोगेनैव क्षी
णत्वादपूर्वाणां च कर्मणामनारंभे अयत्नसिद्धं कैवल्यमिति न तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति विद्यायाः
अन्यः पंथा मोक्षाय न विद्यत इति श्रुतेश्चर्मवदाकाशवेष्टनासंभववदविदुषो मोक्षासंभवश्रुतेः ज्ञानात्तु कैवल्यमाप्नोतीति च पु
राणाच्चेतरनारब्धफलानां कर्मणां पुण्यानां क्षयानुपपत्तेश्च यथा पूर्वोपात्तानां दुरितानामनारब्धफलानां संभवस्तथा पुण्याना
मप्यनारब्धफलानां कर्मणां पुण्यानां क्षयानुपपत्तेश्च यथा पूर्वोपात्तानां दुरितानामनारब्धफलानां संभवः स्यात्तथा पुण्याना
मप्यनारब्धफलानां स्यात् संभवस्तेषां च देहांतरमकृत्वा क्षयानुपपत्तौ मोक्षानुपपत्तिः धर्माधर्महेतूनां च रागद्वेषमोहानामप्य
न्यथात्मज्ञानादुच्छेदानुपपत्तेर्धर्माधर्मोच्छेदानुपपत्तिः नित्यानां कर्मणां पुण्यफलत्वश्रुतेर्वर्णाश्रमाश्च स्वकर्मनिष्ठा इत्यादिस्मृ
तेश्च कर्मक्षयानुपपत्तिः ये त्वाहुर्नित्यानि कर्माणि दुःखरूपत्वात्पूर्वकृतदुरितकर्मणां फलमेव न तु तेषां स्वरूपव्यतिरेकेणान्य
त्फलमस्ति अश्रुतत्वात् जीवनादिनिमित्ते च विधानादिति नाप्रवृत्तानां कर्मणां फलदानासंभवात् दुःखफलविशेषानुपपत्ति
श्च स्यात् यदुक्तं पूर्वजन्मकृतदुरितानां कर्मणां फलं नित्यकर्मानुष्ठानायासदुःखं भुज्यत इति तदसत् न हि मरणकाले फल
दानायांकुरीभूतस्य कर्मणः फलमन्यत्कर्मारब्धे जन्मन्युपभुज्यत इत्युपपत्तिरन्यथा स्वर्गफलोपभोगायाग्निहोत्रादिकर्मा
रब्धे जन्मनि नरककर्मफलोपभोगोपपत्तिः स्यात्तस्य दुरितदुःखविशेषफलत्वानुपपत्तेश्च अनेकेषु हि दुरितेषु संभवत्सु भिन्न
दुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषु कल्प्यमानेषु द्वंद्वरोगादिबाधानिमित्तं दुःखं स्यादिति न हि शक्यते
कल्पयितुं नित्यकर्मानुष्ठानायासदुःखमेव पूर्वोपात्तदुरितफलं न शिरसा पाषाणवहनादिदुःखमिति अप्रकृतं चेदमुच्यते नि
त्यकर्मानुष्ठानायासदुःखं पूर्वकृतदुरितकर्मफलमिति कथमप्रसूतफलस्य हि पूर्वकृतदुरितस्य क्षयानुपपत्तिर्नोपपद्यत इति प्र
कृतं न त्वप्रसूतफलस्य कर्मणः फलं नित्यकर्मानुष्ठानायासदुःखमेव फलमिति विशेषणमयुक्तं नित्यकर्मानुष्ठानकर्तुर्वि
ध्यानर्थक्यप्रसंगश्चोपभोगेनैव प्रसूतफलस्य दुरितकर्मणः क्षयोपपत्तेः किंच श्रुतस्य नित्यस्य दुःखं कर्मणश्चेत्फलं नि
त्यकर्मानुष्ठानायासादेव तन्न दृश्यते व्यायामादिवत्तदन्यस्येति कल्पनानुपपत्तेः जीवनादिनिमित्ते च विधानान्नित्यानां कर्मणां

प्रायश्चित्तपूर्वकं दुरितफलत्वानुपपत्तिः यस्मिन् पापकर्मणि निमित्ते यद्विहितं प्रायश्चित्तं न तु तस्य पापस्य तत्फलमथ तस्यैव पाप
स्य निमित्तस्य प्रायश्चित्तदुःखं फलं जीवनादिनिमित्तमपि नित्यकर्मायासदुःखं जीवनादिनिमित्तस्यैव फलं प्रसज्येत नित्यप्रायश्चित्त
योर्नैमित्तिकत्वाविशेषात् किं चान्यत् नित्यस्य काम्यस्य चाग्निहोत्रादेरनुष्ठानायासदुःखस्य तुल्यत्वान्नित्यानुष्ठानायासदुः
खमेव पूर्वकृतदुरितस्य फलं न तु काम्यानुष्ठानायासदुःखमिति विशेषो नास्ति नित्तदपि पूर्वकृतदुरितफलं प्रसज्येत न तथा च स
ति नित्यानां फलाश्रवणात् द्विधानान्यथानुपपत्तेश्च नित्यानुष्ठानायासदुःखं पूर्वकृतदुरितफलमित्यर्थापत्तिकल्पना चानु
पपन्ना एवं विधानान्यथानुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमानाच्च नित्यानां विरोधाच्च विरुद्धं चेदमुच्यते
नित्यकर्मण्यनुष्ठीयमानेऽन्यस्य कर्मणः फलं भुज्यत इत्यभ्युपगम्यमाने स एवोपभोगो नित्यस्य फलमिति नित्यस्य कर्मणः फ
लाभाव इति विरुद्धमुच्यते किं च काम्याग्निहोत्रादावनुष्ठीयमाने नित्यमप्यग्निहोत्रादितंत्रेणैवानुष्ठितं भवतीति तदाया
सदुःखेनैव काम्याग्निहोत्रादिफलमुपक्षीणं स्यात् तंत्रत्वादथ काम्याग्निहोत्रादिफलमन्यदेव स्वर्गादि तदनुष्ठानायासदुः
खमपि भिन्नं प्रसज्येत न च तदस्ति दृष्टविरोधान्न हि काम्यानुष्ठानायासदुःखात्केवलनित्यानुष्ठानायासदुःखं भिन्नं दृष्ट
ं किं चान्यदविहितमप्रतिषिद्धं च कर्म तत्कालफलं न तु शास्त्रचोदितप्रतिषिद्धं वा तत्कालफलं भवेद्यदि भवेत्तदा स्वर्गा
दिष्वप्यदृष्टफलानां शास्त्रेनोद्यमानस्यादग्निहोत्रादीनामेव कर्मस्वरूपविशेषेऽनुष्ठानायासदुःखमात्रेणोपक्षयः काम्याना
ं च स्वर्गादिमहाफलत्वमंगेतिकर्तव्यताद्याधिक्यं च सति फलकामित्वमात्रेण तेन शक्यं कल्पयितुं तस्माच्च न नित्यानां क
र्मणामदृष्टफलाभावः कदाचिदप्युपपद्यते अतश्चाविद्यापूर्वकस्य कर्मणो विधेयं शुभस्याशुभस्य वाशेषकारणमज्ञो
ना न नित्यकर्मानुष्ठानमविद्याकामबीजं हि सर्वमेव कर्म तथा चोपपादितमविद्वद्विषयं कर्म विद्वद्विषया सर्वकर्मसंन्यास
पूर्विका ज्ञाननिष्ठा उभौ तौ न विजानीतो वेदाविनाशिनं नित्यं ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् अज्ञानां कर्मसंगि
नां नत्वविभुगुणागुणेषु वर्तंत इति मत्वा न सज्जते सर्वकर्माणि मनसा संन्यस्यास्ते नैव किंचित्करोमीति युक्तो मन्येत तत्त्व देरुव
विदर्थादज्ञः करोमीत्यारुरुक्षोः कर्म कारणमारूढस्य योगारूढस्य शम एव कारणमुदारास्त्वेवोऽप्यज्ञज्ञानी त्वात्मैव मे मतं अज्ञा
कर्मिणो गतागतं कामकामा लभन्ते अनन्याश्चिंतयंतो मां नित्ययुक्ता यथोक्तमात्मानमाकाशकल्पमुपासते ददामि बुद्धि ८८
योगं तं येन मामुपयांति ते अर्थादज्ञः कर्मिणो ज्ञा उपयांति भगवत्कर्मकारिणो ये युक्ततमा अपि कर्मिणोऽज्ञास्ते उत्तरोत्तरहीनफल

173
1943

त्यागांशसाधनाऽ अद्वेष्टा सर्वभूतानामित्यध्यायपरिसमाप्त्युक्तसाधनाः क्षेत्राध्यायाद्यध्यायत्र
योक्तज्ञानसाधनास्तेषां यथोक्तवचनां अधिष्ठानादिपंचहेतुसर्वकर्मसंन्यासिनामात्मैकत्वाकर्तृत्वज्ञानवतां परस्यां ज्ञाननिष्ठा
यां वर्तमानानां भगवत्तत्त्वविदां अनिष्टादिकर्मफलत्रयं परमहंसपरिव्राजकानामेव लब्धभगवत्स्वरूपात्मैकत्वशरणानां न भवति
भवत्येवान्येषामज्ञानां कर्मिणामसंन्यासिनामित्येष गीताशास्त्रोक्तस्य कर्तव्यार्थस्य विभागो अविद्यापूर्वकत्वं सर्वस्य कर्मणोऽसिद्ध
मिति चेन्न ब्रह्महत्यादिवत् यथा पितृशास्त्रावगतं नित्यं कर्म तत्तथाप्यविद्यावत एव भवतीति यथा प्रतिषेधशास्त्रावगतमपि ब्रह्महत्या
दिलक्षणं कर्मानर्थकारणमविद्याकामादिदोषवतो भवत्यन्यथा प्रवृत्त्यनुपपत्तेस्तथा नित्यनैमित्तिककाम्यान्यपीति व्यतिरिक्ता
त्मन्यज्ञाते प्रवृत्तिर्नित्यादिकर्मस्वनुपपन्नेति चेन्न चलनात्मकस्य कर्मणोऽनात्मकर्तृकस्याहं करोमीति प्रवृत्ति दर्शनाद्दे
हादिसंघातेऽहंकारो गौणो न मिथ्येति चेन्न तत्कार्येष्वपि गौणत्वोपपत्तेरात्मीये देहादिसंघातेऽहंप्रत्ययो गौणो यथात्मीये पु
त्र आत्मैव पुत्रनामासीति लोके च ममप्राण एवायं गौरिति तद्वत् नैव मिथ्याप्रत्ययो मिथ्याप्रत्ययस्तु स्थाणुपुरुषयोरगृहीतमाग
विशेषयोर्न गौणप्रत्ययस्य मुख्यकार्यार्थत्वमधिकरणस्तुत्यर्थत्वात् लुप्तोपमाशब्दो न यथा सिंहो देवदत्तोऽग्निर्माणवक इति
सिंहवदग्निवच्च क्रौर्यपैंगल्यादिसामान्यवत्त्वात् देवदत्तमाणवकाधिकरणस्तुत्यर्थमेव न तु सिंहकार्यमग्निकार्यं वा गौणशब्द
प्रत्ययनिमित्तं किंचित्साध्यते मिथ्याप्रत्ययकार्यं त्वनर्थमनुभवति गौणप्रत्ययविषयं च जानाति नैष सिंहो देवदत्तो नायमग्निरिति त
था गौणेन देहादिसंघातेनात्मना कृतं कर्म न मुख्येनाहंप्रत्ययविषयेणात्मना कृतं स्यात् न हि गौणसिंहाग्निभ्यां कृतं कर्म मुख्यसिंहाग्निभ्या
ं कृतं स्यान्न च क्रौर्येण पैंगल्येन वा मुख्यसिंहाग्न्योः कार्यं किंचित् क्रियते स्तुत्यर्थत्वेनोपक्षीणत्वात् स्तूयमानौ
च जानीतो नाहं सिंहो नाहमग्निरिति न हि सिंहस्य कर्म ममाग्नेश्चेति तथा न संघातस्य कर्म मम मुख्यस्यात्मन इति प्रत्ययो युक्तत
रः स्यान्न पुनरहं कर्ता मम कर्मेति यच्चाहुरात्मीयैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्मा करोतीति न तेषां मिथ्याप्रत्ययपूर्वकत्वा
त् मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वका हि स्मृतीच्छाप्रयत्नादयः यथास्मिन् जन्मनि देहादिसं
घाताभिमानरागद्वेषादिकृतौ धर्माधर्मौ तत्फलानुभवश्च तथातीतेऽतीततरेऽपि जन्मनीत्यनादिरविद्याकृतः संसारोऽतीतोऽना
गतश्चानुमेयस्ततश्च सर्वकर्मसंन्यासात् ज्ञाननिष्ठाया आत्यंतिकः संसारोपरम इति सिद्धम् अविद्यात्मकत्वाच्च देहाभिमानस्य तन्नि
वृत्तौ देहाद्यनुपपत्तेः संसारानुपपत्तिः देहादिसंघाते आत्माभिमानो ऽविद्यात्मको न हि लोके गवादिभ्योऽन्योऽहं मत्तश्चान्ये गवादय इति

गी॰ भा॰

८७

ज्ञानवन्तं चाहमिति प्रत्ययं मन्यते कश्चिदज्ञस्तु स्थाणौ पुरुषविज्ञानवदविवेकतो देहादिसंघाते कुर्यादहमिति प्रत्ययं न विवेकतो ना
न नु यस्त्वात्मैव पुत्र नामासीति पुत्रेहं प्रत्ययः स तु जन्यजनकसंबंधनिमित्तो गौणो गौणेन त्वात्मना भोजनादिवत्परमार्थकार्यं न श
क्यते कर्तुं गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवददृष्टविषयचोदनाप्रामाण्यादात्मकर्तव्यं गौणो ऽहं देहादिभिः क्रियत इति चेन्नावि
द्याकृतात्मकत्वात्तेषां गौणआत्मनो देहाद्यः किं तर्हि मिथ्याप्रत्ययेनैवासंगस्यात्मनः संगात्मत्वमापद्यते न ज्ञानेनाविद्यानिवृत्तेरभावे
वाभावाद्विवेकिनोऽनुत्पन्नज्ञानकाले बालानां दृश्यते दीर्घोऽहं गौरोऽहमिति देहादिसंघातेऽहंप्रत्ययो न तु विवेकिनामन्योऽहं देहादिसं
घातादिति ज्ञानवतां तत्काले देहादिसंघातेऽहंप्रत्ययो भवतीति स्मात् मिथ्याप्रत्ययाभावे ऽभावात्तत्कृत एव गौणः पृथक्गृह्यमाण
विशेषसामान्ययोर्हि सिंहदेवदत्तयोरग्निमाणवकयोर्वा गौणः प्रत्ययः शब्दप्रयोगो वा स्यात् न गृह्यमाणसामान्यविशेषयोर्य
त्तूक्तं श्रुतिप्रामाण्यादिति तन्न तत्प्रामाण्यस्यादृष्टविषयत्वात् प्रत्यक्षादिप्रमाणानुपलब्धे हि विषये अग्निहोत्रादिसाध्यसाधनसं
बंधे श्रुतेः प्रामाण्यं न प्रत्यक्षादिविषये ऽदृष्टदर्शनार्थविषयत्वात् प्रामाण्यस्य तस्मान्न दृष्टमिथ्याज्ञाननिमित्तस्याहंप्रत्ययस्य
देहादिसंघाते गौणत्वं कल्पयितुं शक्यं न हि श्रुतिशतमपि शीतोऽग्निरप्रकाशो वेति ब्रुवत् प्रामाण्यमुपैति यदि ब्रूयाच्छीतोऽग्नि
रप्रकाशो वेति तथाप्यर्थान्तरं श्रुतेर्विवक्षितं कल्प्यं प्रामाण्यान्यथानुपपत्तेर्न तु प्रमाणान्तरविरुद्धं स्ववचनविरुद्धं वा कर्मणो मि
थ्याप्रत्ययवत्कर्तृकत्वात् कर्तुरभावे श्रुतेरप्रामाण्यमिति चेत् न ब्रह्मविद्यायामर्थवत्त्वोपपत्तेः कर्मविधिश्रुतिवत् ब्रह्मविद्यावि
धिश्रुतेरप्रामाण्यप्रसंग इति चेन्न बाधकप्रत्ययानुपपत्तेः यथा च ब्रह्मविद्याविधिश्रुत्यात्मन्यवगते देहादिसंघातेऽहंप्रत्ययो बाध्य
ते तथात्मन्येवावगतिर्न कदाचित्केनचित्कथंचिदपि वा बाधितुं शक्या फलाव्यतिरेकादवगतेर्यथाग्निरुष्णः प्रकाशश्चेति न
च कर्मविधिश्रुतेरप्रामाण्यं पूर्वपूर्वप्रवृत्तिनिरोधेनोत्तरोत्तरापूर्वप्रवृत्तिजननस्य प्रत्यगात्माभिमुख्यप्रवृत्त्यादनार्थत्वात् मि
थ्यात्वेऽप्युपायस्योपेयसत्यतया सत्यत्वमेव स्याद्यथार्थवादानां विधिशेषाणां लोकेऽपि बालोन्मत्तादीनां पय आदौ पाययितव्ये च उप
वर्णनादिवचनं प्रकारान्तरस्थानां च साक्षादेव प्रामाण्यसिद्धिः प्रागात्मज्ञानाद्देहाभिमाननिमित्तप्रत्यक्षादिप्रामाण्यवत् यत्तु
न्यसे स्वयमव्यापृतमपि प्रमाणोऽप्यात्मा सन्निधिमात्रेण करोति तदेव मुख्यं कर्तृत्वमात्मनो यथा राजा युध्यमानेषु योधेषु युध्यत इति
प्रसिद्धं स्वयमयुध्यमानोऽपि संनिधानादेव जितः पराजितश्चेति तथा सेनापतिर्वाचैव करोति क्रियाफलसंबंधश्च राज्ञः सेनाप
तेश्च दृष्टो यथा च ऋत्विक्कर्म यजमानस्य तथा देहादीनां कर्म आत्मकृतं स्यात्तत्फलस्यात्मगामित्वात् यथा च भ्रामकस्य लोहभ्रा

हेरंब

८७

मणकर्तृत्वात्तस्यैव मुख्यमेव कर्तृत्वं तथा चात्मन इति तदसदकुर्वतः कारकत्वप्रसंगात् कारकमनेकप्रकारमिति चेन्न राज
प्रभृतीनां मुख्यस्यापि कर्तृत्वस्य दर्शनात् राजा तावत्स्वव्यापारेणापि युध्यते योधानां च योधयितृत्वेन धनदानेन च मुख्यमेव कर्तृ
त्वं तथा जयपराजयफलोपभोगेन तथा यजमानस्यापि प्रधानत्यागे दक्षिणादानेन च मुख्यमेव कर्तृत्वं तस्मादव्यापृतस्य कर्तृत्वोपचा
रो यः स गौण इत्यवगम्यते यदि मुख्यमव्यापृतकर्तृत्वं स्वव्यापारलक्षणं नोपलक्ष्येत राजयजमानप्रभृतीनां तदा संनिधिमात्रेणापि कर्तृ
त्वं मुख्यं परिकल्प्येत तथा भ्रामकस्य लोहभ्रामणेन तथा राजयजमानादीनां स्वव्यापारो नोपलभ्यते तस्मात्संनिधिमात्रेण कर्तृत्वं गौ
णमेव तथा च सति तत्फलसंबंधोऽपि गौण एव स्यात् न गौणेन मुख्यं कार्यं निर्वर्त्यते तस्मादसदेवैतद्गीयते देहादीनां व्यापारेणाव्या
पृतेन आत्मा कर्ता भोक्ता स्यादिति भ्रांतिनिमित्तं सर्वं चोपपद्यते यथा स्वप्नमायायां चैवं च देहाद्यात्मप्रत्ययभ्रांतिसंतानविच्छेदेषु सुषु
प्तसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते तस्माद्भ्रांतिनिमित्त एवायं संसारभ्रमो न तु परमार्थ इति सम्यग्दर्शनादत्यंतमेवो
परम इति सिद्धं सर्वं गीताशास्त्रमुपसंहृत्यास्मिन्नध्याये विशेषतश्चान्ते इह शास्त्रार्थदार्ढ्याय संक्षेपत उपसंहारं कृत्वाथेदानीं शा

इदं ते नातपस्काय नाभक्ताय कदाचन न चाशुश्रूषवे वाच्यं न च मां यो ऽभ्यसूयति ६७ य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ६८

स्त्रसंप्रदायविधिमाह इदं शास्त्रं ते तव हिताय मयोक्तं संसारविच्छित्तये अतपस्कायातपोरहिताय न वाच्यमिति व्यवहितेन संबध्यते त
पस्विने ऽप्यभक्ताय गुरौ देवे च भक्तिरहिताय कदाचन कस्यांचिदप्यवस्थायां न वाच्यं भक्तो ऽपि तपस्व्यपि सन्नशुश्रूषुर्यो भवति तस्मा अपि न वा
च्यं न च मां यो वासुदेवं मनुष्यं प्राकृतं मत्वाभ्यसूयत्यात्मप्रशंसादिदोषाध्यारोपेण ममेश्वरत्वमजानन् न सहते ऽसावप्ययोग्यः तस्मा अ
पि न वाच्यं भगवत्यनसूयायुक्ताय शुश्रूषवे भक्ताय तपस्विने तत्फलकाय मेधाविने चावाच्यं शुश्रूषाभक्तिवियुक्ताय न तपस्विने नापि
मेधाविने वाच्यं भगवत्यसूयायुक्ताय समस्तगुणवते ऽपि न वाच्यं गुरुशुश्रूषाभक्तिमते च वाच्यं इत्येष शास्त्रसंप्रदायविधिः ६७ संप्र
दायस्य कर्तुः फलमिदानीमाह य इमं यथोक्तं परमं परमनिःश्रेयसार्थं केशवार्जुनयोः संवादरूपं ग्रंथं गुह्यं गोप्यतमं मद्भक्तेषु मयि
भक्तिमत्स्वभिधास्यति वक्ष्यति ग्रंथतोऽर्थतश्च स्थापयिष्यतीत्यर्थः यथा त्वयि मया भक्तेः पुनर्ग्रहणात् भक्तिमात्रेण केवलेन शास्त्र
संप्रदाने पात्रं भवतीति गम्यते कथमभिधास्यतीत्युच्यते भक्तिं मयि परां कृत्वा भगवतः परमगुरोरच्युतस्य शुश्रूषा मया क्रियत
इत्येवं कृत्वेत्यर्थः तस्येदं फलं मामेवैष्यति मुच्यत एव च संशयो न कर्तव्यः ६८ ८७ ॥

121
1963

गी॰ शां॰ भा॰ किंच न च तस्मात् शास्त्रसंप्रदायकृतो मनुष्येषु मनुष्याणां मध्ये कश्चिन्मे मम प्रियकृत्तमः अतिशयेन प्रियकारी अन्यः प्रियकृत्
मो नास्त्येवेत्यर्थो वर्तमानेषु न भविता च भविष्यत्यपि काले तस्मात् द्वितीयोन्यः प्रियतरो भुवि लोके अस्मिन् अतिशयेनापि ६९ अध्येष्यते
८८ च य इमं धर्म्यं धर्मादनपेतं धर्म्यं संवादरूपं ग्रंथं आवयोस्तेनेदं कृतं स्यात् ज्ञानयज्ञेन विधिजपोपांशुमानसानां यज्ञानां ज्ञान
यज्ञो मानसत्वाद्विशिष्टतम इत्यतस्तेन ज्ञानयज्ञेन गीताशास्त्राध्ययनं स्तूयते फलविधिरेव वा देवतादिविषयज्ञानयज्ञफलतुल्यमस्य फ
लं भवति इत्यनेनाध्ययनेनाहमिष्टः पूजितः स्यां भवेयमिति मम मतिर्निश्चयः ७० अथ श्रोतुरिदं फलं श्रद्धावाननसूयश्च श्रद्धाननसूयश्च
यावर्जितः सन् इमं ग्रंथं शृणुयादपि यो नरोपिशब्दात् किमुतार्थज्ञानवान् सोपि मुक्तः पापात् शुभान् प्रशस्तान् लोकान् प्राप्नुयात् पुण्य
कर्मणां अग्निहोत्रादिकर्मवतां शिष्यस्य शास्त्रार्थग्रहणाग्रहणविवेकबुभुत्सया पृच्छति तदग्रहणे ज्ञाते पुनर्ग्राहयिष्याम्युपायांतरेणेति प्रष्टुर
भिप्रायो यत्नांतरं चास्थाय शिष्यः कृतार्थः कर्तव्य इत्याचार्यधर्मः प्रदर्शितो भवति ७१ कच्चित् किमेतन्मयोक्तं श्रुतं श्रवणेनावधारितं

नच तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः भविता न च मे तस्मादन्यः प्रियतरो भुवि ६९ अध्येष्यते च य इमं धर्म्यं संवादमावयोः
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ७० श्रद्धावाननसूयश्च शृणुयादपि यो नरः सोपि मुक्तः शुभाँल्लोकान् प्राप्नुयात्पुण्य
कर्मणां ७१ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ७२ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्म
याच्युत स्थितोस्मि गतसंदेहः करिष्ये वचनं तव ७३ संजय उ॰ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिममश्रौषमद्भुतं रोमहर्षणं ७४

पार्थ किं त्वया एकाग्रेण चेतसा एकाग्रेण चित्तेन किं वा प्रमादितं कच्चिदज्ञानसंमोहोऽज्ञाननिमित्तः संमोहो विचित्तभावो विवेकतास्वाभावि
कः किं प्रणष्टः यदर्थोयं शास्त्रश्रवणायासस्तव मम चोपदेष्टृत्वायासः प्रनष्टस्ते धनंजय ७२ नष्टो मोहोऽज्ञानजः समस्तसंसा
रानर्थहेतुः सागर इव दुस्तरः स्मृतिश्चात्मतत्त्वविषयालब्धा यस्या लाभात् सर्वहृदयग्रंथीनां विप्रमोक्षः त्वत्प्रसादात्तव प्रसादा
त् मया त्वत्प्रसादमाश्रितेनाच्युत अनेन मोहनाशप्रश्नप्रतिवचनेन सर्वशास्त्रार्थज्ञानफलमेतावदेवेति निश्चितं दर्शितं भवति य
दुताज्ञानसंमोहनाशः आत्मस्मृतिलाभश्चेति तथा च श्रुतात्मविच्छोकं तरतीति उपन्यस्याऽऽत्मज्ञाने सर्वग्रंथिविप्रमोक्ष उक्तो भिद्य
ते हृदयग्रंथिस्तत्र को मोहः कः शोक एकत्वमनुपश्यतीति च मंत्रवर्णः अथेदानीं त्वच्छासने स्थितोस्मि गतसंदेहो मुक्तसंशयः क
रिष्ये वचनं तव अहं त्वत्प्रसादात् कृतार्थो न मम कर्तव्यमस्तीत्यभिप्रायः ७३ परिसमाप्तः शास्त्रार्थोऽथेदानीं कथासंबंधप्रद
र्शनार्थं संजय उवाच इत्येवमहं वासुदेवस्य पार्थस्य च महात्मनः संवादमिमं यथोक्तं मश्रौषं श्रुतवानस्म्यद्भुतमत्यंतविस्मयकरं रोम
हर्षणं रोमांचकरं ७४ ८८

गी॰ शां॰ भा॰ तच्चेमं व्यासप्रसादात्तस्मादिव्यं चक्षुर्लाभात् श्रुतवानिमं संवादं गुह्यमहं परं योगं योगार्थत्वात् ग्रंथोपि योगः संवादमि
मं योगमेव वा योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयं न परंपरया ७५ हे राजन् धृतराष्ट्र संस्मृत्य संस्मृत्य संवादमि
८९ ममद्भुतं केशवार्जुनयोः पुण्यं श्रवणेनापि पापहरं श्रुत्वा हृष्यामि च मुहुर्मुहुः प्रतिक्षणं ७६ ७७

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं ७५
राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतं केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ७६
तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ७७
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ७८
ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मो
क्षसंन्यासयोगो नाम अष्टादशोऽध्यायः १८ श्रीगोविंद हेरंब वासुदेव सांब ७

किं बहुना यत्र यस्मिन् पक्षे योगेश्वरः सर्वयोगानामीश्वरः सर्वयोगबीजस्य तत्प्रभवत्वात्सर्वयोगबीजस्य कृष्णो यत्र पा
र्थो यस्मिन् पक्षे धनुर्धरो गांडीवधन्वा तत्र श्रीः तस्मिन् पांडवानां पक्षे विजयः तत्रैव भूतिः श्रियो विशेषो विस्तारो ध्रुवा नीतिः ध्रुवा अ
व्यभिचारिणी नीतिर्नय इत्येवं मतिर्ममेति ७८ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदपादपूज्यशिष्यश्रीशंक
र भगवतः कृतौ गीताभाष्ये मोक्षसंन्यासयोगो नाम अष्टादशोऽध्यायः १८ राम हेरंब वासुदेव शाके १७४० पार्थिवाब्दे

हेरंब ८८
हेरंब ८९

171/1943

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इति शांकरभाष्यगीतासमाप्तः